२०८३-अनुगादिन् शब्दके उत्तर ठक् प्रत्यय हो, जैसे-अनुगदति इति=अनुगादी, स एव=आनुगादिकः ॥

२०८४ विसारिणो मत्स्ये ।५।४।१६॥

अण् स्यात् । वैसारिणः । मत्स्ये इति किम् । विसारी देवदत्तः ॥

२०८४-मत्स्यार्थमें विसारिन् शब्दके उत्तर अण् प्रत्यय हो, जैसे-वैसारिणः । मत्स्यभिन्नार्थमें अण् प्रत्यय न होगा, जैसे-विसारी देवदत्तः ॥

२०८५ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । ५ । ४ । १७ ॥

अभ्यावृत्तिर्जन्म । क्रियाजन्मगणनवृत्तेः संख्याशब्दात्स्वार्थे कृत्वसुच् स्यात् । पञ्चकृत्वो भुङ्क्ते । संख्यायाः किम् । भूरिवारान् भुङ्क्ते॥

२०८५-क्रियाकी उत्पत्ति गणनवृत्ति संख्यावाचक शब्दके उत्तर स्वार्थमें कृत्वसुच् प्रत्यय हो, जैसे-पञ्चकृत्वो भुंक्ते । संख्यावाचक न होनेपर, भूरिवारान् भुंक्ते ॥

२०८६ द्वित्रिचतुर्भ्यः सुच् ।५।४।१८॥

कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिः । रात्सस्य । चतुः ॥

२०८६-द्वि, त्रि और चतुर् शब्दके उत्तर सुच् प्रत्यय हो, यह सूत्र कृत्वसुच् प्रत्ययका विशेषक है, जैसे-द्विर्भुंक्ते । त्रिः । "रात्सस्य २८०" इस सूत्रसे सुच्सम्बन्धी सकारका लोप होनेपर 'चतुः' पद सिद्ध हुआ ॥

२०८७ एकस्य सकृच्च । ५ । ४ ।१९॥

सकृदित्यादेशः स्याच्चात्सुच् । सकृद्भुङ्क्ते । संयोगान्तस्येति सुचो लोपः । न तु हल्ङ्याबिति । अभैत्सीदित्यत्र सिच इव सुचोऽपि तदयोगात् ॥

२०८७-एक शब्दके स्थानमें सकृत् आदेश हो और चकारसे सुच् प्रत्यय भी हो, जैसे-सकृद्भुंक्ते, यहां "संयोगान्तस्य० ५४" इस सूत्रसे सुच् प्रत्यका लोप हुआ "हल्ङ्याप्० २५२" इस सूत्रसे तो 'अभैत्सीत्' इस स्थलमें सिच्की समान सुच्का भी लोप नहीं होसकताहै ॥

२०८८ विभाषा बहोर्धाऽविप्रकृष्टकाले । ५ । ४ । २० ॥

अविप्रकृष्ट आसन्नः । बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते । आसन्नकाले किम् । बहुकृत्वो मासस्य भुङ्क्ते ॥

२०८८-अविप्रकृष्ट अर्थात् आसन्नकाल होनेपर बहु शब्दके उत्तर विकल्प करके धा प्रत्यय हो, जैसे-बहुधा, बहुकृत्वा वा दिवसस्य भुंक्ते । आसन्नकालार्थ न होनेपर, जैसे-बहुकृत्वो मासस्य भुंक्ते ॥

२०८९ तत्प्रकृतवचने मयट् ।५।४।२१॥

प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनम् । भावेऽधिकरणे वा ल्युट् । आद्ये, प्रकृतमन्नमन्नमयम् । अपूपमयम् । यवागूमयी । द्वितीये, अन्नमयो यज्ञः । अपूपमयं पर्व ॥

२०८९-तत्प्रकृतवचने अर्थात् प्राचुर्यसे जो प्रस्तुत उसको प्रकृत कहतेहैं, उसका वचन, अर्थात् प्रतिपादन अर्थमें मयट् प्रत्यय हो, 'वचनम्' इसमें भाव वा अधिकरण वाच्यमें ल्युट् प्रत्यय हुआहै । आद्य अर्थात् भाव ल्युडन्त पक्षमें, जैसे-प्रकृतमन्नम्=अन्नमयम् । अपूपमयम् । यवागूमयम् । अधिकरणल्युडन्त पक्षमें, जैसे-अन्नमयो यज्ञः । अपूपमयं पर्व ॥

२०९० समूहवच्च बहुषु । ५ । ४ ।२२॥

सामूहिकाः प्रत्यया अतिदिश्यन्ते चान्मयट् । मोदकाः प्रकृताः । मौदकिकम् । मोदकमयम् । शाष्कुलिकम् । शष्कुलीमयम् । द्वितीयेऽर्थे । मौदकिको यज्ञः । मोदकमयः ॥

२०९०-बहुत्व अर्थमें समूहवत् प्रत्यय और चकारसे मयट् प्रत्यय हो, जैसे-मोदकाः प्रकृताः=मौदकिकम्, मोदकमयम् । शाष्कुलिकम्, शष्कुलीमयम् । द्वितीय पक्षमें, जैसे-मौदकिको यज्ञः, मोदकमयः ॥

२०९१ अनन्तावसथेतिहभेषजाञ्ञ्यः । ५ । ४ । २३ ॥

अनन्त एवानन्त्यम् । आवसथ एवावसथ्यम् । इतिहेति निपातसमुदायः । ऐतिह्यम् । भेषजमेव भैषज्यम् ॥

२०९१-अनन्त, आवसथ, इतिह और भेषज शब्दके उत्तर ञ्य प्रत्यय हो, जैसे-अनन्त एव=आनन्त्यम् । आवसथ एव=आवसथ्यम् । 'इतिह' यह निपातसमुदाय है,इतिह एव=ऐतिह्यम् । भेषजमेव=भैषज्यम् ।

२०९२ देवतान्तात्तादर्थ्ये यत् ।५।४।२४॥

तदर्थ एव तादर्थ्यम् । स्वार्थे ष्यञ् । अग्निदेवतायै इदमग्निदेवत्यम् । पितृदेवत्यम् ॥

२०९२-देवतान्त शब्दके उत्तर तादर्थ्यमें यत् प्रत्यय हो, तदर्थ एव=तादर्थ्यम्, यहां स्वार्थमें ष्यञ् है, जैसे-अग्निदेवतायै इदम्=अग्निदेवत्यम् । पितृदेवत्यम् ॥

२०९३ पादार्घाभ्यां च । ५ । ४ ।२५॥

पादार्थमुदकं पाद्यम् । अर्घ्यम् ॥ नवस्य नू आदेशः, त्नप्तनप्खाश्च प्रत्यया वक्तव्याः ॥ * ॥ नूत्नम् । नूतनम् । नवीनम् ॥ नश्च पुराणे प्रात् ॥ * ॥ पुराणार्थे वर्तमानात्प्रशब्दान्नो वक्तव्यः । चात्पूर्वोक्ताः । प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ॥ भागरूपनामभ्यो धेयः ॥ * ॥ भाग-

धेयम् । रूपधेयम् । नामधेयम् ॥ आग्नीध्रसाधारणादञ् ॥ * ॥ आग्नीध्रम् । साधारणम् । स्त्रियां ङीष् । आग्नीध्री । साधारणी ॥

२०९३–पाद और अर्घ शब्दके उत्तर यत् प्रत्यय हो, जैसे–पादार्थमुदकम्=पाद्यम् । अर्घ्यम् ।

नव शब्दके स्थानमें नू आदेश और उसके उत्तर त्नप्, तनप् और ख प्रत्यय हो * नूत्नम् । नूतनम् । नवीनम् ।

पुराणार्थमें वर्त्तमान प्र शब्दके उत्तर न प्रत्यय और चकारसे पूर्वोक्त प्रत्यय भी हों * जैसे–प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ।

भाग, रूप और नाम शब्दके उत्तर धेय प्रत्यय हो * जैसे–भागधेयम् । रूपधेयम् । नामधेयम् ।

आग्नीध्र और साधारण शब्दके उत्तर अञ् प्रत्यय हो * जैसे–आग्नीध्रम् । साधारणम् । स्त्रीलिङ्गमें ङीप् प्रत्यय होगा, जैसे–अग्नीध्री । साधारणी ॥

२०९४ अतिथेर्ञ्यः । ५ । ४ । २६ ॥

तादर्थ्य इत्येव । अतिथये इदमातिथ्यम् ॥

२०९४–अतिथि शब्दके उत्तर तादर्थ्यमें ञ्य प्रत्यय हो, जैसे–अतिथये इदम्=आतिथ्यम् ॥

२०९५ देवात्तल् । ५ । ४ । २७ ॥

देव एव देवता ॥

२०९५–देव शब्दके उत्तर स्वार्थमें तल् प्रत्यय हो, जैसे–देव एव=देवता ॥

२०९६ अवेः कः । ५ । ४ । २८ ॥

अविरेवाविकः ॥

२०९६–अवि शब्दके उत्तर स्वार्थमें क प्रत्यय हो, जैसे–अविरेव=अविकः ॥

२०९७ यावादिभ्यः कन् । ५ । ४ । २९ ॥

याव एव यावकः । मणिकः ॥

२०९७–यावादि शब्दोंके उत्तर स्वार्थमें कन् प्रत्यय हो, जैसे–याव एव=यावकः । मणिकः ॥

२०९८ लोहितान्मणौ । ५ । ४ । ३० ॥

लोहित एव मणिर्लोहितकः ॥

२०९८–मणि होनेपर लोहित शब्दके उत्तर स्वार्थमें कन् प्रत्यय हो, लोहित एव=लोहितको मणिः ॥

२०९९ वर्णे चानित्ये । ५ । ४ । ३१ ॥

लोहितकः कोपेन ॥ लोहिताल्लिङ्गबाधनं वा ॥ * ॥ लोहितिका, लोहिनिका कोपेन ॥

२०९९–अनित्य वर्ण होनेपर लोहित शब्दके उत्तर कन् प्रत्यय हो, जैसे–लोहितकः कोपेन ।

लोहित शब्दके उत्तर विकल्प करके लिङ्गबाध न हो * जैसे–लोहितिका, लोहिनिका कोपेन ॥

२१०० रक्ते । ५ । ४ । ३२ ॥

लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन् स्यात् । लिङ्गबाधनं वेत्येव । लोहितिका, लोहिनिका, शाटी ॥

२१००–लाक्षादिसे रक्तमें वर्त्तमान जो लोहित शब्द उसके उत्तर कन् प्रत्यय हों, विकल्प करके लिङ्गबाधन भी होगा, जैसे–लोहितिका, लोहिनिका शाटी ॥

२१०१ कालाच्च । ५ । ४ । ३३ ॥

वर्णे चानित्ये रक्ते इति द्वयमनुवर्तते । कालकं मुखं वैलक्ष्येण । कालकः पटः । कालिका शाटी ॥

२१०१–अनित्य वर्ण होनेपर और लाक्षादिसे रक्त होनेपर काल शब्दके उत्तर कन् प्रत्यय हो, जैसे–कालकं मुखं वैलक्ष्येण । कालकः पटः । कालिका शाटी ॥

२१०२ विनयादिभ्यष्ठक् । ५ । ४ । ३४ ॥

विनय एव वैनयिकः । सामयिकः ॥ उपायो ह्रस्वत्वं च ॥ औपयिकः ॥

२१०२–विनयादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे–विनय एव–वैनयिकः । सामयिकः ।

उपाय शब्दको ह्रस्व भी हो * जैसे–औपयिकः ॥

२१०३ वाचो व्याहृतार्थायाम् । ५ । ४ । ३५ ॥

सन्दिष्टार्थायां वाचि विद्यमानाद्वाक्शब्दात्स्वार्थे ठक् स्यात् । संदेशवाग्वाचिकं स्यात् ॥

२१०३–व्याहृतार्थ अर्थात् सन्दिष्टार्थ वचनमें विद्यमान वाच् शब्दके उत्तर स्वार्थमें ठक् प्रत्यय हो, जैसे–संदेशवाक् वाचिकं स्यात् ॥

२१०४ तद्युक्तात्कर्मणोऽण् । ५ । ४ । ३६ ॥

कर्मैव कार्मणम् । वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः ॥

२१०४–तद्युक्त कर्मन् शब्दके उत्तर स्वार्थमें अण् प्रत्यय हो, जैसे–कर्म एव=कार्मणम् अर्थात् सन्दिष्ट वाणीको सुनकर क्रियमाण कर्म ॥

२१०५ ओषधेरजातौ । ५ । ४ । ३७ ॥

स्वार्थेऽण् । औषधं पिबति । अजातौ किम् । ओषधयः क्षेत्रे रूढाः ॥

२१०५–जातिभिन्न होनेपर ओषधि शब्दके उत्तर स्वार्थमें अण् प्रत्यय हो, जैसे–औषधं पिबति । जाति होनेपर, ओषधयः क्षेत्रे रूढाः ॥

२१०६ प्रज्ञादिभ्यश्च । ५ । ४ । ३८ ॥

प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ॥

२१०६–प्रज्ञादि शब्दोंके उत्तर स्वार्थमें अण् प्रत्यय हो, जैसे–प्रज्ञ एव=प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ॥

२१०७ मृदस्तिकन् । ५ । ४ । ३९ ॥

मृदेव मृत्तिका ॥

२१०७–मृद् शब्दके उत्तर स्वार्थमें तिकन् प्रत्यय हो, जैसे–मृदेव=मृत्तिका ॥

२१०८ सस्नौ प्रशंसायाम् ।५।४।४० ॥

रूपपोऽपवादः । प्रशस्ता मृत्, मृत्सा । मृत्स्ना। उत्तरसूत्रेऽन्यतरस्यांग्रहणान्नित्योऽयम् ॥

२१०८–प्रशंसार्थमें मृद् शब्दके उत्तर स और स्न प्रत्यय हो, यह प्रत्यय रूपप् प्रत्ययका विशेषक है, जैसे–प्रशस्ता मृत्= मृत्सा । मृत्स्ना । इस सूत्रके परवर्ती सूत्रमें ' अन्यतरस्याम् ' पदका ग्रहण करनेसे यह विधि नित्य है ॥

२१०९ बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् । ५ । ४ । ४२ ॥

बहूनि ददाति बहुशः । अल्पानि अल्पशः॥ बह्वल्पार्थान्मंगलाऽमंगलवचनम् ॥ * ॥ नेह । बहूनि ददात्यनिष्टेषु । अल्पं ददात्याभ्युदयिकेषु॥

२१०९–बहु और अल्पार्थक कारकके उत्तर विकल्प करके शस् प्रत्यय हो, जैसे–बहूनि ददाति=बहुशः । अल्पानि=अल्पशः ।

बहु और अल्पार्थक शब्दसे क्रमसे मंगल और अमंगल गम्यमान होनेपर ही उक्त प्रत्यय हो * इस कारण बहूनि ददाति अनिष्टेषु अल्पं ददाति अभ्युदयेषु, इस स्थलमें विपरीत होनेसे शस् प्रत्यय नहीं हुआ ॥

२११० संख्यैकवचनाच्च वीप्सायाम्। ५ । ४ । ४३ ॥

द्वौ द्वौ ददाति द्विशः । माषंमाषं माषशः । प्रस्थशः परिमाणशब्दावृत्तावेकार्था एव । संख्यैकवचनात्किम् । घटंघटं ददाति । वीप्सायां किम् । द्वौ ददाति । कारकादित्येव । द्वयोर्द्वयोः स्वामी ॥

२११०–वीप्सार्थमें संख्यावाचक शब्द और एकार्थप्रतिपादक शब्दके उत्तर शस् प्रत्यय हो, जैसे–द्वौद्वौ ददाति= द्विशः । माषंमाषम्=माषशः । प्रस्थशः । परिमाणवाचक शब्द वृत्तिमें एकार्थ ही है, संख्यैकवचन न होनेपर घटंघटं ददाति । वीप्सार्थ न होनेपर द्वौ ददाति । कारक न होनेपर, जैसे–द्वयोर्द्वयोः स्वामी, इस स्थलमें शस् प्रत्यय नहीं हुआ ॥

२१११ प्रतियोगे पञ्चम्यास्तसिः । ५ । ४ । ४४ ॥

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात् । प्रद्युम्नः कृष्णतः प्रति ॥ आद्यादिभ्य उपसंख्यानम् ॥ * ॥ आदौ आदितः । मध्यतः । अन्ततः । पृष्ठतः॥पार्श्वतः। आकृतिगणोऽयम् । स्वरेण स्वरतः । वर्णतः ॥

२१११–कर्मप्रवचनीय प्रति शब्दके योगमें जो पञ्चमी विहित हो, तदन्तके उत्तर तसि प्रत्यय हो, जैसे–प्रद्युम्नः कृष्णतः प्रति ।

आद्यादि शब्दोंके उत्तर भी तसि प्रत्यय हो, जैसे–आदौ= आदितः । मध्यतः । अन्ततः । पृष्ठतः । पार्श्वतः । यह आकृतिगण है, इससे स्वरेण=स्वरतः । वर्णतः, यह सब सिद्ध हुए ॥

२११२ अपादाने चाऽहीयरुहोः । ५ । ४ । ४५ ॥

अपादाने या पञ्चमी तदन्तात्तसिः स्यात् । ग्रामादागच्छति । ग्रामतः । अहीयरुहोः किम् । स्वर्गाद्धीयते । पर्वतादवरोहति ॥

२११२–अपादानमें जो पञ्चमी, तदन्तके उत्तर तसि प्रत्यय हो, हीय और रुहके योगमें न हो, जैसे–ग्रामात् आगच्छति=ग्रामतः । हीय और रुहके योग होनेपर, जैसे–स्वर्गाद्धीयते । पर्वतादवरोहति ॥

२११३ अतिग्रहाऽव्यथनक्षेपेष्वकर्तरि तृतीयायाः । ५ । ४ ।४६ ॥

अकर्तरि तृतीयान्ताद्वा तसिः स्यात् । अतिक्रम्य ग्रहोऽतिग्रहः।चारित्रेणातिगृह्यते।चारित्रतोऽतिगृह्यते।चारित्रेणान्यानतिक्रम्य वर्तत इत्यर्थः। अव्यथनमचलनम् । वृत्तेन न व्यथते वृत्ततो न व्यथते । वृत्तेन न चलतीत्यर्थः । क्षेपे, वृत्तेन क्षिप्तः । वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । अकर्तरीति किम् । देवदत्तेन क्षिप्तः ॥

२११३–अतिग्रह, अव्यथन और क्षेप (निन्दा) अर्थमें कर्तृकारकभिन्न तृतीयान्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, अतिक्रम्य ग्रहः अतिग्रहः, अतिक्रमपूर्वक ग्रहणको 'अतिग्रह' कहतेहैं, जैसे–चारित्र्येणातिगृह्यते=चारित्रतोऽतिगृह्यते, चारित्रेणान्यानतिक्रम्य वर्त्तते इत्यर्थः । अव्यथन शब्दसे अचलन जानना, जैसे–वृत्तेन न व्यथते=वृत्ततो न व्यथते, वृत्तेन न चलति इत्यर्थः । क्षेपार्थ,जैसे–वृत्तेन क्षिप्तः । वृत्ततः क्षिप्तः । वृत्तेन निन्दितः इत्यर्थः । तृतीयान्त कर्तृकारक होनेपर, जैसे– देवदत्तेन क्षिप्तः ॥

२११४ हीयमानपापयोगाच्च।५।४।४७॥

हीयमानपापयुक्तादकर्तरि तृतीयान्ताद्वा तसिः । वृत्तेन हीयते । वृत्तेन पापः । वृत्ततः । क्षेपस्याऽविवक्षायामिदम् । क्षेपे तु पूर्वेण सिद्धम्। अकर्तरि किम् । देवदत्तेन हीयते ॥

२११४–हीयमान और पापयुक्त कर्तृकारक भिन्न तृतीयान्त पदके उत्तर विकल्प करके तासि प्रत्यय हो, जैसे–वृत्तेन हीयते

वृत्ततो हीयते । वृत्तेन पापः—वृत्ततः पापः । क्षेपकी अविवक्षामें यह सूत्र लगेगा, क्षेपार्थमें तो पूर्व सूत्रसे ही सिद्ध है । कर्तृकारक तृतीयान्त होनेपर देवदत्तेन हीयते ॥

२११५ षष्ठ्या व्याश्रये । ५ । ४ ।४८॥

षष्ठ्यन्ताद्वा तसिः स्यान्नानापक्षसमाश्रये । देवा अर्जुनतोऽभवन् । आदित्याः कर्णतोऽभवन् । अर्जुनस्य कर्णस्य पक्षे इत्यर्थः । व्याश्रये किम् । वृक्षस्य शाखा ॥

२११५—नानापक्षसमाश्रय अर्थ होनेपर षष्ठी विभक्त्यन्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, जैसे—देवा अर्जुनतोऽभवन् । आदित्याः कर्णतोऽभवन्, अर्जुनस्य कर्णस्य पक्षे इत्यर्थः । व्याश्रय न होनेपर, जैसे—वृक्षस्य शाखा ॥

२११६ रोगाच्चापनयने । ५ । ४ ।४९॥

रोगवाचिनः षष्ठ्यन्ताद्वा तसिश्चिकित्सायाम् । प्रवाहिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः । अपनयने किम् । प्रवाहिकायाः प्रकोपनं करोति ॥

२११६—चिकित्सार्थमें रोगवाचक षष्ठ्यन्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, जैसे—प्रवाहिकातः कुरु, प्रतीकारमस्याः कुरु इत्यर्थः । चिकित्सार्थ न होनेपर प्रवाहिकायाः प्रकोपनं करोति ॥

२११७ कृभ्वस्तियोगे संपद्यकर्तरि च्विः । ५ । ४ । ५० ॥

अभूततद्भाव इति वक्तव्यम् ॥ * ॥ विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे ॥

२११७—कृ, भू और अस्धातुनिष्पन्न पदके योगमें विकारात्मताको प्राप्त किये प्रकृतिमें वर्तमान विकारवाचक शब्दके उत्तर स्वार्थमें विकल्प करके च्वि प्रत्यय हो ।

अभूततद्भावमें हो, ऐसा कहना चाहिये * ॥

२११८ अस्य च्वौ । ७ । ४ ।३२ ॥

अवर्णस्य ईत्स्यात् च्वौ । वेर्लोपः । च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः संपद्यते, तं करोति कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ॥ अव्ययस्य च्वावीत्वं नेति वाच्यम् ॥*॥ दोषाभूतमहः । दिवाभूता रात्रिः । एतच्चाव्ययीभावश्चेतिसूत्रे भाष्ये उक्तम् ॥

२११८—च्वि प्रत्यय परे रहते अकार और आकारके स्थानमें ईकार हो । च्वि प्रत्ययसम्बन्धी वि—का लोप हुआ, और च्विप्रत्ययान्तत्वके कारण अव्ययत्व हुआ, जैसे—अकृष्णः कृष्णः सम्पद्यते तं करोति=कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ।

च्वि प्रत्यय परे रहते अव्ययसंज्ञक शब्दके अवर्णके स्थानमें ई नहीं हो* जैसे—दोषाभूतमहः । दिवाभूतारात्रिः । यह विषय "अव्ययीभावश्च २ । ४ । १८" इस सूत्रके भाष्यमें कहाहै ॥

२११९ क्यच्व्योश्च । ६ । ४ । १५२ ॥

हलः परस्यापत्ययकारस्य लोपः स्यात् क्ये च्वौ च परतः । गार्गीभवति ॥

२११९—क्यच् और च्वि प्रत्यय परे रहते हल् वर्णके परे स्थित अपत्य यकारका लोप हो, जैसे—गार्गीभवति ॥

२१२० च्वौ च । ७ । ४ । २६ ॥

च्वौ परे पूर्वस्य दीर्घः स्यात् । शुचीभवति । पटूस्यात् । अव्ययस्य दीर्घत्वं नेति केचित्, तन्निर्मूलम् । स्वस्ति स्यादिति तु महाविभाषया च्वेरभावात्सिद्धम् । स्वस्तीस्यादित्यपि पक्षे स्यादिति चेदस्तु । यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यते इत्यस्तु । रीङ् ऋतः । मात्रीकरोति ॥

२१२०—च्वि प्रत्यय परे रहते पूर्वपदको दीर्घ हो, जैसे—शुचीभवति । पटूस्यात् ।

कोई २ कहतेहैं कि, अव्ययसंज्ञक शब्दको दीर्घ न हो, उसका प्रमाण कुछ भी नहीं है, 'स्वस्ति स्यात्' ऐसा पद तो महाविभाषासे च्वि प्रत्ययके अभाव पक्षमें सिद्ध है 'स्वस्तीस्यात्' ऐसा प्रयोग भी विकल्प पक्षमें होगा, ऐसा कहो तो हो, यदि न होता हो तो अनभिधानके कारण च्वि प्रत्ययकी भी उत्पत्ति न हो "रीङृतः १२३४" इससे ऋदन्त अङ्गको रीङ् आदेश होकर मात्रीकरोति ॥

२१२१ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च । ५ । ४ । ५१ ॥

एषां लोपः स्यात् च्विश्च । अरूकरोति । उन्मनीस्यात् । उच्चक्षूकरोति । विचेतीकरोति । विरहीकरोति । विरजीकरोति ॥

२१२१—अरुष्, मनष्, चक्षुस्, चेतस्, रहस् और रजस् शब्दके उत्तर च्वि प्रत्यय और सकारका लोप हो, जैसे—अरूकरोति । उन्मनीस्यात् । उच्चक्षूकरोति। विचेतीकरोति । विरहीकरोति । विरजीकरोति ॥

२१२२ विभाषा साति कार्त्स्न्ये । ५ । ४ । ५२ ॥

च्विविषये सातिर्वा स्यात्साकल्ये ॥

२१२२—च्वि प्रत्ययके विषयमें साकल्यार्थमें विकल्प करके साति प्रत्यय हो ॥

२१२३ सात्पदाद्योः । ८ । ३ । १११॥

सस्य षत्वं न स्यात् । दधि सिञ्चति । कृत्स्नं शस्त्रमग्निः सम्पद्यतेऽग्निसाद्भवति । अग्नीभवति ।

महाविभाषया वाक्यमपि। कार्त्स्न्ये किम्। एकदेशेन शुक्लीभवति पटः ॥

२१२३-साति प्रत्ययके सकार और पदादि सकारको षत्व न हो, जैसे-दधि सिञ्चति। कृत्स्नं शस्त्रम् अग्निः सम्पद्यते अग्निसाद्भवति, अग्नीभवति। महाविभाषासे वाक्य भी होगा। कार्त्स्न्यार्थ न होनेपर, जैसे-शुक्लीभवति पटः, अर्थात् एक देशसे शुक्ल होताहै ॥

२१२४ अभिविधौ सम्पदा च।५।४।५३॥

सम्पदा कृभ्वस्तिभिश्च योगे सातिर्वा स्याद्व्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। सम्पदा तु वाक्यमेव। अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रम्। अग्नीभवति। जलसात्सम्पद्यते जलीभवति लवणम्। एकस्या व्यक्तेः सर्वावयवावच्छेदेनाऽन्यथाभावः कार्त्स्न्यम्। बह्वीनां व्यक्तीनां किंचिदवयवाऽवच्छेदेनान्यथात्वं त्वभिविधिः ॥

२१२४-अभिविधि अर्थात् व्याप्ति होनेपर संपूर्वक पद् धातु और कृ, भू, अस् धातुके योगमें विकल्प करके साति प्रत्यय हो, पक्षमें कृ, भू, अस् धातुके योगमें च्वि प्रत्यय होगा, संपूर्वक पद् धातुके योगमें तो वाक्य ही होगा, जैसे-अग्निसात् सम्पद्यते, अग्निसाद्भवति शस्त्रम्, अग्नीभवति शस्त्रम्। जलसात् सम्पद्यते, जलसाद्भवति, जलीभवति लवणम्। एक व्यक्तिका सर्वावयवावच्छेदसे जो अन्यथाभाव उसको कार्त्स्न्य कहतेहैं, और बहुतसी व्यक्तियोंका किंचित् अवयवावच्छेदसे जो अन्यथात्व उसको अभिविधि कहतेहैं ॥

२१२५ तदधीनवचने।५।४।५४॥

सातिः स्यात्कृभ्वस्तिभिः सम्पदा च योगे। राजसात्करोति। राजसात्संपद्यते। राजाधीनमित्यर्थः ॥

२१२५-तदधीनार्थमें कृ, भू, अस् और संपूर्वक पद् धातुके योगमें साति प्रत्यय हो, जैसे-राजसात् करोति। राजसात् सम्पद्यते, अर्थात् राजाधीन करताहै ॥

२१२६ देये त्रा च।५।४।५५॥

तदधीने देये त्रा स्यात्सातिश्च कृभ्वादियोगे। विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रासंपद्यते। पक्षे विप्रसात्करोति। देये किम्। राजसाद्भवति राष्ट्रम् ॥

२१२६-तदधीनार्थमें और देयार्थमें कृ, भू, अस् और संपूर्वक पद् धातुके योगमें त्रा और साति प्रत्यय हो, जैसे-विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रासम्पद्यते। पक्षमें विप्रसात् करोति। देयार्थ न होनेपर, जैसे-राजसात् भवति राष्ट्रम् ॥

२१२७ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्।५।४।५६॥

एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वन्दे रमे वा। बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः ॥

२१२७-द्वितीयान्त और सप्तम्यन्त देव, मनुष्य, पुरुष, पुरु और मर्त्य शब्दके उत्तर त्रा प्रत्यय हो, जैसे-देवत्रा वन्दे रमे वा। बहुल दके ग्रहणसे अन्य स्थलमें भी त्रा प्रत्यय होगा, जैसे-बहुत्रा जीवतो मनः ॥

२१२८ अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्।५।४।५७॥

द्व्यच् अवरं न्यूनं न तु ततो न्यूनमनेकाजिति यावत्तादृशमर्द्धं यस्य तस्माड्डाच् स्यात्कृभ्वस्तिभिर्योगे ॥ डाचि विवक्षिते द्वे बहुलम् ॥ * ॥ नित्यमाम्रेडिते डाचीति वक्तव्यम् ॥ * ॥ डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटाकरोति। अव्यक्तानुकरणात्किम्। दृषत्करोति। द्व्यजवरार्धात्किम्। श्रत्करोति। अवरेति किम्। खरटखरटाकरोति। त्रपटत्रपटाकरोति। अनेकाच इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम्। अनितौ किम्। पटिति करोति ॥

२१२८-कृ, भू और अस् धातुके योगमें अनेकाच् आधा भाग है जिसके ऐसे अव्यक्तानुकरण प्रातिपदिक शब्दके उत्तर डाच् प्रत्यय हो इति शब्द परे रहते नहीं हो।

डाच् प्रत्यय विवक्षित होनेपर बहुल करके द्वित्व हो * डाच् प्रत्यय परे रहते जो आम्रेडित हो, वह परे रहते पूर्व और पर वर्णको पर रूप हो * इससे तकार और पकारके स्थानमें पकार हुआ, जैसे-पटपटाकरोति। अव्यक्तानुकरण न होनेपर दृषत् करोति। द्व्यजवरार्द्ध न होनेपर, श्रत्करोति। अवर न होनेपर, खरटखरटाकरोति। त्रपटत्रपटाकरोति।

"अनेकाचः" ऐसाही सूत्र करना ठीक था, इससे 'डाचि' यह पर सप्तमी ही द्वित्वविधायक वार्त्तिकमें सुवच होतीहै ऐसा जानना। इति शब्द परे होनेपर, पटिति करोति ॥

२१२९ कृञो द्वितीयतृतीयशम्बबीजात्कृषौ । ५ । ४ । ५८ ॥

द्वितीयादिभ्यो डाच् स्यात्कृञ एव योगे कर्षणेऽर्थे । बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम् । द्वितीयं तृतीयं कर्षणं करोति, द्वितीयाकरोति, तृतीयाकरोति । शम्बशब्दः प्रतिलोमे । अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति शम्बाकरोति । बीजेन सह कर्षति बीजाकरोति ॥

२१२९-कर्षणार्थमें कृ धातुके ही योगमें द्वितीय, तृतीय, शम्ब और बीज शब्दके उत्तर डाच् प्रत्यय हो । बहुलोक्तिके कारण अव्यक्तानुकरणसे भिन्नको डाच् प्रत्यय परे (द्वित्व) नहीं होगा, जैसे-द्वितीयं तृतीयं कर्षणं करोति=द्वितीयाकरोति, तृतीयाकरोति। शम्ब शब्द प्रतिलोमवाचक है, अनुलोम क्षेत्रको पुनर्वार प्रतिलोम कर्षण करताहै, इस अर्थमें शम्बाकरोति । बीजेन सह कर्षति=बीजाकरोति ॥

२१३० संख्यायाश्च गुणान्तायाः । ५ । ४ । ५९ ॥

कृञो योगे कृषौ डाच् स्यात् । द्विगुणाकरोति क्षेत्रम् । क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः ॥

२१३०-गुण शब्द अन्तमें है जिसके ऐसे संख्यावाचक शब्दके उत्तर कृ धातुके योगमें कृषि अर्थमें डाच् प्रत्यय हो, जैसे-द्विगुणाकरोति क्षेत्रम्, अर्थात् क्षेत्रको दूना कर्षण करताहै ॥

२१३१ समयाच्च यापनायाम् । ५ । ४ । ६० ॥

कृषाविति निवृत्तम् । कृञो योगे डाच् स्यात् । समयाकरोति । कालं यापयतीत्यर्थः ॥

२१३१-कृ धातुके योगमें यापनार्थमें समय शब्दके उत्तर डाच् प्रत्यय हो, यहां कर्षण अर्थ निवृत्त हुआ, जैसे-समयाकरोति, अर्थात् समयको बिताताहै ॥

२१३२ सपत्रनिष्पत्रादतिव्यथने । ५ । ४ । ६१ ॥

सपत्राकरोति मृगम् । सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः। निष्पत्राकरोति। सपुङ्खस्य शरस्याऽपरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः। अतिव्यथने किम् । सपत्रं निष्पत्रं वा करोति भूतलम् ॥

२१३२-अतिव्यथनार्थमें कृ धातुके योगमें सपत्र और निष्पत्र शब्दके उत्तर डाच् प्रत्यय हो, जैसे--सपत्राकरोति, अर्थात् पुंखसहित बाणका प्रवेश कराकर मृगको सपत्र करताहै। निष्पत्राकरोति, अर्थात् सपुंख बाणको दूसरे पार्श्वमें प्रवेश कराके मृगको निष्पत्र करताहै । अतिशय व्यथा न होनेपर जैसे-सपत्रं निष्पत्रं वा करोति भूतलम् ॥

२१३३ निष्कुलान्निष्कोषणे । ५ । ४ । ६२ ॥

निष्कुलाकरोति दाडिमम् । निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच् ॥

२१३३-निष्कोषणार्थमें निष्कुल शब्दके उत्तर डाच् प्रत्यय हो, जैसे-निष्कुलाकरोति दाडिमम्, यहां निर्गतं कुलमन्तरवयवानां समूहो यस्मात्, ऐसा बहुव्रीहि समास करके डाच् प्रत्यय हुआहै ॥

२१३४ सुखप्रियादानुलोम्ये । ५ । ४ । ६३ ॥

सुखाकरोति । प्रियाकरोति गुरुम्। अनुकूलाचरणेनानन्दयतीत्यर्थः ॥

२१३४-आनुलोम्यार्थमें सुख और प्रिय शब्दोंके उत्तर डाच् प्रत्यय हो, जैसे-सुखाकरोति प्रियाकरोति गुरुम्, अर्थात् अनुकूलाचरणसे गुरुको आनन्दित करताहै ॥

२१३५ दुःखात्प्रातिलोम्ये । ५ । ४ । ६४ ॥

दुःखाकरोति स्वामिनं पीडयतीत्यर्थः ॥

२१३५-प्रातिलोम्यार्थमें दुःख शब्दके उत्तर डाच् प्रत्यय हो, जैसे-दुःखाकरोति, अर्थात् स्वामीको पीडित करताहै ॥

२१३६ शूलात्पाके । ५ । ४ । ६५ ॥

शूलाकरोति मांसम् । शूलेन पचतीत्यर्थः ॥

२१३६-पाकार्थमें शूल शब्दके उत्तर डाच् प्रत्यय हो, जैसे-शूलाकरोति मांसम्, अर्थात् शूलसे मांसका पाक करताहै ॥

२१३७ सत्यादशपथे । ५ । ४ । ६६ ॥

सत्याकरोति भाण्डं वणिक् क्रेतव्यमिति तथ्यं करोतीत्यर्थः । शपथे तु सत्यं करोति विप्रः ॥

२१३७-शपथ अर्थ न होनेपर सत्य शब्दके उत्तर डाच् प्रत्यय हो, जैसे-सत्याकरोति भाण्डं वणिक्, क्रेतव्यं तथ्यं करोतीत्यर्थः। शपथार्थमें 'सत्यं करोति विप्रः' ऐसा होगा ॥

२१३८ मद्रात्परिवापणे । ५ । ४ । ६७ ॥

मद्रशब्दो मंगलार्थः । परिवापणं मुण्डनम् । मद्राकरोति । मांगल्यमुण्डनेन संस्करोतीर्थः ॥ भद्राच्चेति वक्तव्यम् ॥ * ॥ भद्राकरोति । अर्थः प्राग्वत् । परिवापणे किम् । मद्रं करोति ॥ इति स्वार्थिकप्रकरणम् ॥

॥ इति तद्धितप्रकरणं समाप्तम् ॥

२१३८–परिवापण अर्थमें मद्र शब्दके उत्तर डाच् प्रत्यय हो, मद्र शब्दसे मंगल जानना, परिवापण शब्दसे मुंडन जानना, जैसे–मद्राकरोति, माङ्गल्य मुण्डनसे संस्कार करताहै । भद्र शब्दके उत्तर भी डाच् प्रत्यय हो * जैसे–भद्राकरोति, इसका भी अर्थ पूर्ववत् है । परिवापणार्थ न होनेपर जैसे–भद्रं करोति ॥ इति स्वार्थिकप्रकरणम् ॥

॥ इति तद्धितप्रकरणं समाप्तम् ॥

अथ द्विरुक्तप्रकरणम् ।

२१३९ सर्वस्य द्वे । ८ । १ । १ ॥

इत्यधिकृत्य ॥

२१३९–सर्वपदको द्वित्व हो, इसको अधिकार करके ॥

२१४० नित्यवीप्सयोः । ८ । १ । ४ ॥

आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात् । आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च । पचतिपचति । भुक्त्वाभुक्त्वा । वीप्सायाम् । वृक्षंवृक्षं सिञ्चति । ग्रामोग्रामो रमणीयः ॥

२१४०–आभीक्ष्ण्य और वीप्सा द्योत्य होनेपर पदको द्वित्व हो । तिङन्त और अव्ययसंज्ञक कृदन्तमें आभीक्ष्ण्य रहताहै, जैसे–पचतिपचति । भुक्त्वाभुक्त्वा । वीप्सार्थमें जैसे–वृक्षंवृक्षं सिञ्चति । ग्रामोग्रामो रमणीयः ॥

२१४१ परेर्वर्जने । ८ । १ । ५ ॥

परिपरि वंगेभ्यो वृष्टो देवः । वंगान्परिहृत्येत्यर्थः ॥ परेर्वर्जने वा वचनम् ॥ * ॥ परिवंगेभ्यः ॥

२१४१–वर्जनार्थमें परि शब्दको द्वित्व हो, जैसे–परिपरि वङ्गेभ्यो वृष्टो देवः, अर्थात् वङ्ग देशको परित्याग करके मेघ वर्षण करताहै । 'परेर्वर्जने' इसमें वा वचन करना चाहिये अर्थात् परि शब्दको वर्जनार्थमें विकल्प करके द्वित्व हो, ऐसा कहना चाहिये * जैसे– परिवङ्गेभ्यः ॥

२१४२ उपर्यध्यधसः सामीप्ये । ८ । १ । ७ ॥

उपर्युपरि ग्रामम् । ग्रामस्योपरिष्टात्समीपे देशे इत्यर्थः । अध्यधि सुखम् । सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः । अधोऽधो लोकम् । लोकस्याधस्तात्समीपे देशे इत्यर्थः ॥

२१४२–सामीप्यार्थमें उपरि, अधि और अधस् शब्दको द्वित्व हो, जैसे–उपर्युपरि ग्रामम्, ग्रामस्य उपरिष्टात् समीपे देशे इत्यर्थः । अर्थात् ग्रामके ऊपर समीपदेशमें । अध्यधि सुखम्, सुखस्योपरिष्टात् समीपकाले दुःखम् इत्यर्थः, अर्थात् सुखके अनन्तर समीपकालमें दुःख । अधोऽधो लोकम् । लोकस्याधस्तात् समीपे देशे इत्यर्थः, लोकके अधस्तलके समीप देशमें ॥

२१४३ वाक्यादेरामन्त्रितस्याऽसूयासम्मतिकोपकुत्सनभर्त्सनेषु । ८ । १ । ८ ॥

असूयायाम् । सुन्दरसुन्दर वृथा ते सौन्दर्यम् । सम्मतौ । देवदेव वन्द्योऽसि । कोपे । दुर्विनीतदुर्विनीत इदानीं ज्ञास्यसि । कुत्सने । धानुष्कधानुष्क वृथा ते धनुः । भर्त्सने । चोरचोर घातयिष्यामि त्वाम् ॥

२१४३–असूया, सम्मति, कोप, कुत्सा और भर्त्सन अर्थमें वाक्यके आदिमें स्थित आमंत्रितसंज्ञक पदको द्वित्व हो, असूयार्थमें जैसे–सुन्दरसुन्दर ! वृथा ते सौन्दर्यम् । सम्मति–देवदेव ! वंद्योसि । कोप–दुर्विनीतदुर्विनीत ! इदानीं ज्ञास्यसि । कुत्सा–धानुष्कधानुष्क ! वृथा ते धनुः । भर्त्सन–चौरचौर ! घातयिष्यामि त्वाम् ॥

२१४४ एकं बहुव्रीहिवत् । ८ । १ । ९ ॥

द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात् । तेन सुब्लोपपुंवद्भावौ । एकैकमक्षरम् । इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप् । एकैकयाऽऽहुत्या । इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः । न बहुव्रीहावित्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम् । तेनातिदिष्टबहुव्रीहौ सर्वनामताऽस्त्येवेति प्राञ्चः । वस्तुतस्तु भाष्यमते प्रत्याख्यातमेतत् । सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके विग्रहे निषेधकं न तु बहुव्रीहावितीहातिदेशशंकैव नास्ति । एकैकस्मै देहि ॥

२१४४-द्विरुक्त एक शब्द बहुव्रीहिसंज्ञककी समान हो, इस कारण सुप्का लोप और पुंवद्भाव होगा, जैसे-एकैकमक्षरम्, इस स्थलमें दोनों सुपोंका लोप करनेपर बहुव्रीहिवद्भावके कारण ही प्रातिपदिकत्व होनेसे समुदायके उत्तर सुप् प्रत्यय हुआ। एकैकया आहुत्या, इस स्थलमें पूर्वभागमें पुंवद्भावके कारण अवग्रहमें विशेष होगा।

"न बहुव्रीहौ २२२" इस सूत्रमें पुनर्बहुव्रीहिग्रहण मुख्य बहुव्रीहिके लाभार्थ है, इस कारण अतिदिष्ट बहुव्रीहिस्थलमें सर्वनामता है ही, यह प्राचीनोंका मत है, वास्तविक तो भाष्यकारके मतमें यह सूत्र प्रत्यख्यात है, सूत्रकारके मतमें भी बहुव्रीहिके निमित्त अलौकिक विग्रहमें निषेध होताहै बहुव्रीहि समासमें नहीं, इस कारण इस स्थलमें निषेधके अतिदेशकी शंका ही नहीं है, जैसे-एकैकस्मै देहि॥

२१४५ आबाधे च। ८। १। १०॥

पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च। गतगतः। विरहात्पीड्यमानस्येयमुक्तिः। बहुव्रीहिवद्भावात्सुब्लुक्। गतगता। इह पुंवद्भावः॥

२१४५-पीडा द्योत्य होनेपर पदको द्वित्व हो, और वह बहुव्रीहिसंज्ञककी समान हो, जैसे-गतगतः, विरहसे पीडित व्यक्तिकी यह उक्ति है, यहां बहुव्रीहिवद्भावके कारण सुप्का लुक् हुआ। गतगता, इस स्थलमें पुंवद्भाव हुआ है॥

२१४६ कर्मधारयवदुत्तरेषु। ८। १। ११॥

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यम्॥ प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि॥ *॥

२१४६-इसके परवर्ती द्विरुक्त स्थलमें कर्मधारयकी समान कार्य हो।

कर्मधारयातिदेशका प्रयोजन सुप्का लोप पुंवद्भाव और अन्तोदात्तत्व है *॥

२१४७ प्रकारे गुणवचनस्य। ८। १। १२॥

सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत्। कर्मधारयवदुत्तरेष्वित्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः, समासस्येत्यन्तोदात्तत्वं च। पटुपट्वी। पटुपटुः। पटुसदृशः। ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते। शुक्लशुक्लं रूपम्। शुक्लशुक्लः पटः॥ आनुपूर्व्ये द्वे वाच्ये॥ *॥ मूलेमूले स्थूलः॥ संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः॥ *॥ सर्पसर्प बुध्यस्व बुध्यस्व। सर्पसर्पसर्प बुध्यस्व बुध्यस्व बुध्यस्व॥ क्रियासमभिहारे च॥ *॥ लुनीहिलुनीहीत्येवायं लुनाति। नित्यवीप्सयोरिति सिद्धे भृशार्थे द्वित्वार्थमिदम्। पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वा॥ कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये॥ *॥ समासवच्च बहुलम्॥ *॥ बहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः॥ *॥ अन्योऽन्यं विप्रा नमन्ति। अन्योऽन्यौ। अन्योऽन्यान्। अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। अन्योऽन्येषां पुष्करैरामृशन्त इति माघः। एवं परस्परम्। अत्र कस्कादित्वाद्विसर्गस्य सः। इतरेतरम्। इतरेतरेणेत्यादि॥ स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः॥ *॥ अन्योऽन्याम्। अन्योऽन्यम्। परस्पराम्। परस्परम्। इतरेतराम्। इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो द्वितीयाया एव। भाष्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः। अन्ये तूदाहरणस्य दिङ्मात्रत्वात्सर्वविभक्तीनामामादेशमाहुः॥

दलद्वये टाबभावः क्लीबे चाङ्विरहः स्वमोः।
समासे सोरलुक्चेति सिद्धं बाहुलकात्त्रयम्॥ १॥

तथाह। अन्योऽन्यं परस्परमित्यत्र दलद्वयेपि टाप् प्राप्तः। न च सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। यांयां प्रियः प्रैक्षत कातराक्षी सासेत्यादावतिप्रसङ्गात्। अन्योऽन्यमितरेतरमित्यत्र चाडुत्तरादिभ्य इत्यदड् प्राप्तः। अन्योऽन्यसंसक्तमहस्त्रियामम्। अन्योऽन्याश्रयः। परस्पराक्षिसादृश्यमदृष्टपरस्परैरित्यादौ सार्लुक्च प्राप्तः। सर्वं बाहुलकबलेन समाधेयम्। प्रकृतवार्तिकभाष्योदाहरणं स्त्रियामितिसूत्रेऽन्योऽन्यसंश्रयं त्वेतदिति भाष्यं चात्र प्रमाणमिति॥

२१४७–सादृश्यार्थमें गुणवाचक शब्दको द्वित्व हो और "कर्मधारयवदुत्तरेषु २१४६" इस सूत्राधिकारसे वह कर्मधारयकी समान हो, इस कारण पूर्वभागको पुंवद्भाव और "समासस्य ३७३४" इस सूत्रसे अन्तोदात्तत्व भी होगा, जैसे–पटुपट्वी । पटुपटुः, पटुसदृशः, अर्थात् ईषत्पटुः । इस सूत्रमें गुणवचन पदसे गुणोपसर्जनीभूत द्रव्यवाचक और केवल गुणवाचक शब्दका ग्रहण है, जैसे–शुक्लशुक्लं रूपम् । शुक्लशुक्लः पटः । आनुपूर्व्य होनेपर द्वित्व हो * जैसे–मूलेमूले स्थूलः ।

सम्भ्रमसहित प्रवृत्ति होनेपर इच्छानुसार अनेकवार प्रयोग न्यायसिद्ध हो, जैसे–सर्पसर्प बुध्यस्व २ । सर्प ३ । बुध्यस्व ३ ।

क्रियासमभिहारमें द्वित्व हो * लुनीहिलुनीहीत्येवायं लुनाति, यहां "नित्यवीप्सयोः२१४२" इस सूत्रसे द्वित्व सिद्ध होनेपर भी भृशार्थमें द्वित्व करनेके निमित्त और पौनःपुन्यमें भी लोट्के साथ समुच्चय करके द्योतकता लाभ करनेके निमित्त यह वचन है ।

कर्मव्यतीहार अर्थमें सर्वनामसंज्ञक शब्दको द्वित्व हो * । वह समासकी समान बहुल करके हो * बहुल शब्दके ग्रहणके कारण अन्य और पर शब्द समासवत् नहीं होगा, इतर शब्दको तो नित्य समासवद्भाव होगा ।

असमासवद्भावमें पूर्वपदस्थ सुप्के स्थानमें सु हो * जैसे अन्योन्यं विप्रा नमन्ति । अन्योन्यौ । अन्योन्यान् । अन्योन्येन कृतम् । अन्योन्यस्मै दत्तम् इत्यादि । "अन्योन्येषां पुष्करैरामृशन्ते" इति माघः । इसी प्रकार'परस्परम्'इत्यादि जानना । इस स्थलमें कस्कादित्वके कारण विसर्गको सकार हुआ है । इतरेतरम्, इतरेतरेण, इत्यादि ।

स्त्रीलिङ्ग और नपुंसकलिङ्ग शब्दके उत्तर विभक्तिको विकल्प करके आम्भाव हो * अन्योन्याम् । अन्योन्यम् । परस्पराम् । परस्परम् । इतरेतराम् । इतरेतरम् वा इमे ब्राह्मण्यौ कुले वा भोजयतः ।

इस स्थलमें कोईकोई कहतेहैं कि, द्वितीयाको ही आमादेश होताहै, क्योंकि, भाष्यादिमें वैसा ही उदाहरण है, इस कारण स्त्रीलिङ्ग और क्लीबलिंग शब्दके तृतीयादि विभक्तिमें पुँल्लिंगके समान ही रूप होंगे, दूसरे पंडित तो उदाहरणके दिङ्मात्रत्वके कारण सर्वविभक्तिको आमादेश कहतेहैं ।

कारिकाका अर्थ–दोनों दलमें टाप् प्रत्ययका अभाव, नपुंसकलिंगमें सु और अम्के स्थानमें अद्ड्का विरह और समासमें सु प्रत्ययका अलुक्, यह तीन प्रकारका कार्य बाहुलकसे सिद्ध है,जैसे–अन्योन्यम्,परस्परम् इस स्थलमें दोनों दलमें टाप् प्राप्त हुआ, अन्य और पर शब्दके असमासवद्भावके कारण "सर्वनाम्नो वृत्तिमात्रे०" इससे पुंवद्भाव नहीं होसकता, कारण कि, द्विर्वचन ही वृत्ति है, तो "यांयां प्रियः प्रैक्षत कातराक्षी सासा" इत्यादि स्थलमें अतिप्रसंग होजायगा 'अन्योन्यमितरेतरम्' इस स्थलमें "अद्ड्डतरादिभ्यः० ३१५" इस सूत्रसे अद्ड् प्राप्त हुआ और 'अन्योन्यसंसक्तमहस्त्रियामम्' 'अन्योन्याश्रयः' 'परस्पराक्षिसादृश्यम्' 'अदृष्टपरस्परैः' इत्यादि स्थलोंमें सुका लुक् प्राप्त हुआ, परन्तु सब बाहुलकबलसे समाधेय है । प्रकृतवार्त्तिक, भाष्योदाहरण और "स्त्रियाम्" इस सूत्रमें "अन्योन्यसंश्रयम्" ऐसा भाष्य इसमें प्रमाण है ॥

२१४८ अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् । ८ । १ । १३ ॥

प्रियप्रियेण ददाति । प्रियेण वा । सुखसुखेन ददाति । सुखेन वा । द्विर्वचने कर्मधारयवद्भावात्सुपि लुकि तदेव वचनम् । अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः ॥

२१४८–अकृच्छ्रार्थमें प्रिय और सुख शब्दको विकल्प करके द्वित्व हो, जैसे–प्रियप्रियेण ददाति, प्रियेण वा । सुखसुखेन ददाति, सुखेन वा, अर्थात् अतिप्रिय वस्तु भी अनायाससे देताहै । द्विवचनस्थलमें कर्मधारयद्भावके कारण सुप्का लोप होगा ॥

२१४९ यथास्वे यथायथम् ।८।१।१४॥

यथास्वमिति वीप्सायामव्ययीभावः । योयमात्मा यद्यदात्मीयं तद्यथास्वम् । तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते । यथायथं ज्ञाता यथास्वभावमित्यर्थः । यथाऽऽत्मीयमिति वा ॥

२१४९–आत्मा और आत्मीयको यथास्व कहतेहैं, यथास्व अर्थ होनेपर यथा शब्दको द्वित्व और नपुंसकलिंगत्व निपातनसे सिद्ध हो । सूत्रमें वीप्सार्थमें अव्ययीभाव समास करके 'यथास्वम्' पद सिद्ध है, यथायथं ज्ञाता, अर्थात् यथास्वभाव अथवा यथात्मीय जाननेवाला ॥

२१५० द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ८।१।१५।

द्विशब्दस्य द्विर्वचनं पूर्वपदस्याऽम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्व-

र्थेषु । तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् । इतरे विषयभूताः । द्वन्द्वं मन्त्रयते । रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति । माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेणापीति मर्यादार्थः । व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः । द्विवर्गसंबन्धेन पृथगवस्थिताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं संकर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्व इष्यते ॥

॥ इति द्विरुक्तप्रकरणम् ॥

२१५०–रहस्य, मर्यादा, वचन, व्युत्क्रमण, यज्ञपात्रप्रयोग और अभिव्यक्ति अर्थमें द्वि शब्दको द्वित्व, पूर्वपदको अम्भाव और उत्तरपदको नपुंसकत्व निपातनसे सिद्ध हो, उक्त अर्थमें रहस्य द्वन्द्व शब्दका वाच्य और सब विषयभूत रहेंगे, जैसे–द्वन्द्वं मंत्रयते, अर्थात् एकान्तमें सलाह करताहै । मर्यादा शब्दसे स्थितिका अनतिक्रम जानना, जैसे–आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति । माता पुत्रेण मिथुनं गच्छति, पौत्रेण प्रपौत्रेणापि, इस स्थानमें मर्यादा अर्थ जानना । व्युत्क्रमण शब्दसे पृथक् अवस्थान जानना, जैसे–द्वन्द्वं व्युत्क्रान्ताः, अर्थात् द्विवर्गसम्बन्धसे पृथक् अवस्थित । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं संकर्षणवासुदेवौ, अर्थात् साहचर्यसे अभिव्यक्त । योगविभागके कारण अन्यत्र भी द्वन्द्व ऐसा पद इष्ट है ॥

॥ इति द्विरुक्तप्रकरणं समाप्तम् ॥

॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्धं समाप्तम् ॥

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

अथ वैयाकरणसिद्धान्तकौमुदी ।

भाषाटीकासहिता

तदुत्तरार्द्धम् ।

अथ तिङन्ते भ्वादयः १.

श्रौत्राईन्तीचणैर्गुण्यैर्महर्षिभिरहर्दिवम् ।
तोष्टूय्यमानोऽप्यगुणो विभुर्विजयतेतराम्॥१॥

जो निर्गुण होकर भी श्रोत्रियत्व (वेदपठनकर्तृत्व) और योग्यतासे प्रसिद्ध तथा प्रशस्त गुणोंसे युक्त महर्षियोंसे निरन्तर संस्तूयमान है, वह निग्रहानुग्रहसमर्थ सर्वव्यापी जगदीश्वर सर्वोत्कृष्ट रूपसे वर्तमान रहताहै ॥ १ ॥

पूर्वार्धे कथितास्तुर्यपञ्चमाध्यायवर्तिनः ।
प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः २

चौथे और पांचवें अध्यायमें स्थित सम्पूर्ण प्रत्यय पूर्वार्धमें कहेहैं, अब तीसरे अध्यायमें वर्तमान प्रत्यय कहे जातेहैं ॥ २ ॥

तत्रादौ दश लकाराः प्रदर्श्यन्ते । लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः ॥

उसमें पहले दश लकार दिखातेहैं, यथा—लट् १, लिट्२, लुट्३, लृट्४, लेट्५, लोट्६, लङ्७, लिङ्८, लुङ् ९, लृङ् १०, इनमें पाचवें लकार (लेट्) का प्रयोग केवल वैदिक प्रकरणमें ही देखाजाताहै ॥

२१५१ वर्तमाने लट् । ३ । २ ।१२३॥

वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्। अटावितौ॥

२१५१–वर्तमान कालमें विद्यमान जो क्रिया, तद्वृत्ति धातुके उत्तर लट् प्रत्यय हो । लट्के अ और टकी इत्संज्ञा हुई (ल शेष बचा) ॥

२१५२ लः कर्मणि च भावे चाऽकर्मकेभ्यः । ३ । ४ । ६९ ॥

लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च ॥

२११२–सकर्मक धातुके उत्तर, कर्म और कर्ता वाच्य रहते और अकर्मक धातुके उत्तर, कर्ता और भाव वाच्य रहते लकार प्रयुक्त हों ॥

२१५३ लस्य । ३ । ४ । ७७ ॥

अधिकारोऽयम् ॥

२१५३–यह अधिकार सूत्र है, अर्थात् यहांसे 'लस्य' इस षष्ठ्यन्त पदका अधिकार आरम्भ हुआ ॥

२१५४ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्।३।४।७८॥

एतेऽष्टादश लादेशाः स्युः ॥

२१५४–तिप्, तस्, झि । सिप्, थस्, थ । मिप्, वस्, मस् । त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् । यह अठारह आदेश लकारके स्थानमें प्रयुक्त हों ॥

२१५५ लः परस्मैपदम् ।१।४।९९॥

लादेशाः परस्मैपदसंज्ञाः स्युः ॥

२१५५–लकारके स्थानमें विहित जो आदेश, उनकी परस्मैपद संज्ञा हो ॥

२१५६तङानावात्मनेपदम्।१।४।१००॥

तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः । पूर्वसंज्ञापवादः ॥

२१५६–उन (लादेशों)में तङ् प्रत्याहार अर्थात् त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् और आन अर्थात् शानच्, कानच् प्रत्ययोंकी भी आत्मनेपद संज्ञा हो । यह पूर्व संज्ञा (परस्मैपद) का अपवाद सूत्र है ॥

२१५७ अनुदात्तङित आत्मनेपदम्। १ । ३ । १२ ॥

अनुदात्तेत उपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात् ॥

२१५७–जिस धातुका अनुदात्त अक्षर इत्संज्ञक हो, और उपदेश विषयमें जो ङकारइत्संज्ञक हो, तदन्त धातुके उत्तर विहित लकारोंके स्थानमें आत्मनेपदसंज्ञक आदेश हों ।

२१५८ स्वरितञितः कर्त्रभिप्राये क्रियाफले । १ । ३ । ७२ ॥

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥

२१५८–क्रियाके फलको कर्तामें जानेपर स्वरित वर्ण जिसका इत् हो और ञ जिसका इत् हो ऐसे धातुके उत्तर आत्मनेपद हो ॥

२१५९ शेषात्कर्तरि परस्मैपदम् । १ । ३ । ७८ ॥

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मै पदं स्यात् ॥

२१५९–आत्मनेपदके निमित्त (अनुदात्तेत्त्व१, उपदेशमें ङित्त्व२, कर्तृगामी क्रियाफलमें स्वरितेत्त्व३और ञित्त्व४) से हीन जो धातु, उसके उत्तर कर्तृवाच्यमें परस्मैपद हो ॥

२१६० तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः । १ । ४ । १०१ ॥

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥

२१६०–तिङ् प्रत्याहारके मध्यमें स्थित परस्मैपद तथा आत्मनेपदकी सम्पूर्ण विभक्तियोंकी तीन तीन करके क्रमसे प्रथम, मध्यम और उत्तम (पुरुष) संज्ञा हो ॥

२१६१ तान्येकवचनद्विवचनबहुवचनान्येकशः । १ । ४ । १०२ ॥

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणित्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥

२१६१–परस्मैपद और आत्मनेपदके प्रथम, मध्यम और उत्तम, इन तीनों पुरुषोंमें प्रत्येक पुरुषकी एकवचन, द्विवचन और बहुवचन संज्ञा हो ॥

२१६२ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः । १ । ४ ।१०५॥

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात् ॥

२१६२–तिङ्का वाच्य जो कारक तद्वाचक युष्मद् शब्दके प्रयुज्यमान वा अप्रयुज्यमान होनेपर अर्थात् युष्मद् शब्दका योग रहते वा न रहते केवल युष्मदर्थ गम्यमान रहते धातुके उत्तर मध्यम पुरुष हो ॥

२१६३ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च । १ । ४ । १०६ ॥

मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात्परिहासे गम्यमाने मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः स्यात्॥

२१६३–मन्य धातु जिस धातुका उपपद हो, उस धातुको प्रकृतिभूत होनेपर मध्यम पुरुष हो, परिहास अर्थमें और मन धातुसे उत्तम पुरुष हो, वह उत्तम पुरुष एकार्थवाचक अर्थात् एकवचनान्त ही हो ॥

२१६४ अस्मद्युत्तमः । १ । ४ । १०७ ॥

तथाभूतेऽस्मद्युत्तमः स्यात् ॥

२१६४–तिङ्वाच्य कारकवाचक अस्मद् शब्दको प्रयुज्यमान होनेपर भी धातुसे उत्तम पुरुष हो ॥

२१६५ शेषे प्रथमः । १ । ४ । १०८ ॥

मध्यमोत्तमयोरविषये प्रथमः स्यात् । भू सत्तायाम् ॥ कर्तृविवक्षायां भू--ति इति स्थिते ॥

२१६५–मध्यम और उत्तम पुरुषके अविषयमें प्रथम पुरुष हो । भू धातु सत्ता (आत्मधारणानुकूल व्यापार) में है । इसके उत्तर कर्तृवाच्यमें लट्, तिप् 'भू+तिप्' ऐसी स्थिति होनेपर–॥

२१६६ तिङ्शित्सार्वधातुकम् । ३ । ४ । ११३ ॥

तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः॥

२१६६–तिङ् प्रत्याहार और धात्वधिकारोक्त शित् प्रत्यकी सार्वधातुक संज्ञा हो ॥

२१६७ कर्तरि शप् । ३ । १ । ६८ ॥

कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात् । शपावितौ ॥

२१६७–कर्ता अर्थमें विहित सार्वधातुकसंज्ञक प्रत्यय परे रहते धातुके उत्तर शप् प्रत्यय हो । शप्के शकार और पकारकी इत्संज्ञा होकर अकार रहा ॥

२१६८ सार्वधातुकार्धधातुकयोः । ७ । ३ । ८४ ॥

अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात् । अवादेशः । भवति । भवतः ॥

२१६८–सार्वधातुक और आर्धधातुक परे रहते इगन्त (इकारान्त, उकारान्त, ऋकारान्त, ऌकारान्त) धातुको गुण हो । ओकारके स्थानमें अवादेश, भू+तिप्=भवति ॥भू+तस्=भवतः ॥

२१६९ झोऽन्तः । ७ । १ । ३ ॥

प्रत्ययावयवस्य झस्यान्तादेशः स्यात् । अतो गुणे । भवन्ति । भवसि । भवथः।भवथ ॥

२१६९–प्रत्ययका अवयव जो झ उसके स्थानमें अन्त आदेश हो । "अतो गुणे १९१" इस सूत्रसे पररूप । भू+झि=भवन्ति । भू+सिप्=भवसि । भू+थस्=भवथः । भू+थ=भवथ ॥

२१७० अतो दीर्घो यञि । ७।३।१०१॥

अतोऽङ्गस्य दीर्घः स्याद् यञादौ सार्वधातुके परे । भवामि । भवावः । भवामः । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः । वयं भवामः । एहि मन्ये ओदनं भोक्ष्यसे इति भुक्तः सोऽतिथिभिः । एतमेत वा मन्ये ओदनं भोक्ष्येथे, भोक्ष्यध्वे । भोक्ष्ये, भोक्ष्यावहे, भोक्ष्यामहे । मन्यसे, मन्येथे, मन्यध्वे । इत्यादिरर्थः । युष्मद्युपपदे इत्याद्यनुवर्तते, तेनेह न । एतु भवान्मन्यते ओदनं भोक्ष्ये इति भुक्तः सोतिथिभिः । प्रहासे किम् । यथार्थकथने मा भूत् । एहि मन्यसे ओदनं भोक्ष्ये इति भुक्तः सोतिथिभिरित्यादि ॥

२१७०-यञादि सार्वधातुक परे रहते अदन्त अङ्गको दीर्घ हो, जैसे-भव+मिप्=भवामि । भव+वस्=भवावः । भव+मस्=भवामः । प्रथम पुरुषका उदाहरण, जैसे-स भवति । तौ भवतः । ते भवन्ति । मध्यम पुरुषका जैसे-त्वं भवसि-इत्यादि । उत्तम पुरुषका जैसे-अहं भवामि-इत्यादि । एहि मन्ये ओदनं भोक्ष्यसे, भुक्तः सोऽतिथिभिः । इस स्थानमें परिहासार्थमें 'भुज्' धातुका उपपद 'मन्'धातु है, अत एव भुज् धातुसे मध्यम पुरुष हुआ । और मन् धातुसे उत्तम पुरुष और एकवचन हुआ । एतम् एत वा मन्ये, ओदनं भोक्ष्येथे, भोक्ष्यध्वे, भोक्ष्ये, भोक्ष्यावहे, भोक्ष्यामहे इत्यादि । मन्यसे, मन्येथे, मन्यध्वे, इत्यर्थः । इस स्थलमें "युष्मद्युपपदे० २१६२" इस सूत्रकी अनुवृत्ति होतीहै, इस कारण यहां नहीं हुआ, जैसे-एतु भवान् मन्यते ओदनं भोक्ष्य इति, भुक्तः सोऽतिथिभिः । परिहासभिन्न अर्थात् यथार्थकथनस्थलमें ऐसा नहीं होगा, जैसे-एहि मन्यसे ओदनं भोक्ष्ये इति, भुक्तः सोऽतिथिभिः-इत्यादि ॥

२१७१ परोक्षे लिट् । ३ । २ । ११५ ॥

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । लस्य तिबादयः ॥

२१७१-भूताऽनद्यतनपरोक्षार्थ वृत्ति जो धातु, उसके उत्तर लिट् हो । लके स्थानमें तिबादि आदेश होतेहैं ॥

२१७२ लिट् च । ३ । ४ । ११५ ॥

लिडादेशस्तिङार्धधातुकसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः । तेन शबादयो न ॥

२१७२-लिट्के स्थानमें आदिष्ट तिङ् आर्धधातुक संज्ञक ही हों, सार्वधातुकसंज्ञक नहीं, इस कारण लिट्के उत्तर शप् आदि नहीं होंगे ॥

२१७३ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः । ३ । ४ । ८२ ॥

लिटस्तिबादीनां नवानां णलादयो नव स्युः । भू अ इति स्थिते ॥

२१७३-लिट्के स्थानमें आदिष्ट तिबादि नवके स्थानमें यथाक्रम णल्, अतुस्, उस् । थल्, अथुस्, अ । णल्, व, म, यह नव आदेश हों, जैसे-भू+तिप्=भू+अ (णल्) ॥

२१७४ भुवो वुग्लुङ्लिटोः ।६।४।८८॥

भुवो वुगागमः स्यात् लुङ्लिटोरचि । नित्यत्वाद्वुग्गुणवृद्धी बाधते ॥

२१७४-लुङ् और लिट्सम्बन्धी अच् परे रहते भू धातुको वुक्का आगम हो । नित्यत्वके कारण वुक्का आगम गुण और वृद्धिको बाधताहै * ॥

२१७५ एकाचो द्वे प्रथमस्य । ६।१।१॥

२१७५-यह अधिकार सूत्र है । धातुके प्रथम एकाच्को द्वित्व हो ॥

२१७६ अजादेर्द्वितीयस्य । ६ । १ ।२॥

इत्यधिकृत्य ॥

२१७६-यह भी अधिकार सूत्र है । अजादि धातुके द्वितीय एकाच्को द्वित्व हो ॥

२१७७लिटि धातोरनभ्यासस्य६।१।८॥

लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः । आदिभूतादचः परस्य तु द्वितीयस्य । भूव् भूव् अ इति स्थिते ॥

२१७७-लिट् परे रहते अनभ्यास, धातुके अवयव प्रथम एकाच्को द्वित्व हो और आदि अच्के परे स्थित दूसरे एकाच्को द्वित्व हो भूव् भूव्=अ, ऐसा होनेपर-

२१७८ पूर्वोऽभ्यासः । ६ । १ । ४ ॥

अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् ॥

२१७८-द्विरुक्त धातुके पूर्व भागको अभ्यास संज्ञा हो ॥

२१७९ हलादिः शेषः । ७ । ४ । ६० ॥

अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते । इति वलोपः ॥

२१७९-अभ्यासके आदिमें स्थित हल् अक्षर शेष रहै, और उससे भिन्न अन्य हल् वर्णोंका लोप हो, इस सूत्रसे अभ्यासके वकारका लोप हुआ भूभूव्=अ-॥

२१८० ह्रस्वः । ७ । ४ । ५९ ॥

अभ्यासस्याचो ह्रस्वः स्यात् ॥

---

* "कृताऽकृतप्रसङ्गी विधिर्नित्यः" अर्थात् जिसके होने और न होनेपर जिसकी प्रवृत्ति होती है, वह उसके प्रति नित्य होताहै, यहां वृद्धि होनेपर भी एकदेशविकृत-न्यायसे वुक्की प्रवृत्ति होती है, और वुक् करनेपर अजन्ताङ्ग न रहनेसे वृद्धिकी (२५४) प्रवृत्ति नहीं होतीहै । यहां गुणको बाधके वृद्धिकी प्रवृत्ति होतीहै, इस लिये नित्यत्वसे गुणको बाधके वुक् होनेका उदाहरण बभूविथ जानना ॥

२१८०-अभ्यासके अच्को ह्रस्व हो । भुभूव्=अ ॥

२१८१ भवतेरः । ७ । ४ । ७३ ॥

भवतेरभ्यासोकारस्य अः स्यात् लिटि ॥

२१८१-लिट् परे रहते भू धातुके अभ्यासका जो उकार, उसके स्थानमें अकार हो । भभूव्=अ ॥

२१८२ अभ्यासे चर्च । ८ । ४ । ५४॥

अभ्यासे झलां चरः स्युर्जशश्च । झशां जशः खरां चरः । तत्रापि प्रकृतिजशां प्रकृतिजशः । प्रकृतिचरां प्रकृतिचर इति विवेकः आन्तरतम्यात् ॥

२१८२-अभ्यासके झल्के स्थानमें चर् और जश् भी हों । झशोंके स्थानमें जश् और खर्के स्थानमें चर् हों । वहां भी सादृश्यके कारण प्रकृतिभूत जश्के स्थानमें जश् और प्रकृतिभूत चर्के स्थानमें चर् ही होंगे ॥

२१८३ असिद्धवदत्राभात् । ६।४।२२॥

इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् । समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यात् । इति वुकोऽसिद्धत्वादुवङि प्राप्ते ॥ वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ ॥ * ॥ बभूव । बभूवतुः । बभूवुः ॥

२१८३-इस सूत्रसे पादसमाप्तिपर्यंत जो सूत्र हैं उनकी 'आभीय' संज्ञा है, और समानाश्रय आभीय कर्तव्य होनेपर वह आभीय असिद्ध हो अर्थात् जिस समय एक आभीयका कार्य किसी निमित्तको मानकर प्रयोगमें होचुका हो, उसी निमित्तको मानकर उसी प्रयोगमें दूसरे आभीयका कार्य होने लगे तो पहले आभीयका कार्य असिद्ध माना जाय, इस कारण वुक्के असिद्धत्वसे उवङ्०(२७१) की प्राप्ति होने पर ।

उवङ् और यण् कर्त्तव्य रहते वुक् और युट् सिद्धही रहतेहैं *जैसे-बभूव । बभूवतुः । बभूवुः ॥

२१८४आर्धधातुकस्येड्वलादेः।७।२।३५।

वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम॥

२१८४-वलादि आर्धधातुकको इट्का आगम हो, जैसे-बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ॥

२१८५ अनद्यतने लुट् । ३ । ३ ।१५॥

भविष्यत्यनद्यतनेर्थे धातोर्लुट् स्यात् ॥

२१८५-भविष्यत् अनद्यतन कालमें धातुके उत्तर लुट् हो ॥

२१८६ स्यतासी ऌलुटोः। ३ । १।३३॥

ऌ इति लङ्लृटोर्ग्रहणम् । धातोः स्यतासी एतौ स्तो ऌलुटोः परतः । शबाद्यपवादः ॥

२१८६-ऌङ् और ऌट् परे रहते धातुके उत्तर स्य और लुट् परे रहते धातुके उत्तर तासि प्रत्यय हो, यह सूत्र शप् आदिका अपवाद है ॥

२१८७ आर्धधातुकं शेषः।३।४।११४॥

तिङ्शिद्भ्योऽन्यो धात्वधिकारोक्तः प्रत्यय एतत्संज्ञः स्यात् । इट् ॥

२१८७-"धातोः३।१।९१"इसके अधिकारमें विहित तिङ् और शित्से भिन्न प्रत्ययकी आर्धधातुक संज्ञा हो । इस सूत्रसे आर्धधातुक संज्ञा करनेपर पूर्व सूत्रसे इट् होताहै ॥

२१८८लुटःप्रथमस्य डारौरसः।२।४।८५।

डा रौ रस् एते क्रमात्स्युः । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः ॥

२१८८-लुट्के स्थानमें आदिष्ट जो प्रथम पुरुष (तिप्, तस्, झि) उसके स्थानमें क्रमसे डा, रौ, रस् आदेश हों । यहां डित् करनेके सामर्थ्यसे भ संज्ञा न होनेपर भी टि (आस्) का लोप होगा ॥

२१८९ पुगन्तलघूपधस्य च ७ ।३।८६।

पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् । तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः । भवित् आ अत्रेटो गुणे प्राप्ते ॥

२१८९-सार्वधातुक और आर्धधातुक परे रहते पुगन्त और लघूपध अङ्गका जो इक्, उसको गुण हो । यत्कर्तृक अवश्य व्यवधान हो, तत्कर्तृक व्यवधान होनेपर भी वचन प्रमाणानुसार कार्य होताहै, परन्तु तद्भिन्न द्वारा व्यवहित होने पर नहीं होता, यही फलितार्थ है, इस कारण 'भिनत्ति' इत्यादि स्थलमें अनेकसे व्यवहित इक्को गुण नहीं होता । भवित्+आ, इस स्थलमें इक्को गुण प्राप्त हुआ है ॥

२१९० दीधीवेवीटाम् । १ । १ ।६।

दीधीवेव्योरिटश्च गुणवृद्धी न स्तः । भविता ॥

२१९०-दीधीङ् और वेवीङ् धातुके और इट्के इक्को गुण और वृद्धि न हों । भविता ॥

२१९१ तासस्त्योर्लोपः । ७। ४ ।५० ॥

तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे ॥

२१९१ सकारादि प्रत्यय परे रहते तासि प्रत्ययके और अस् धातुके सकारका लोप हो ॥

२१९२ रि च । ७ । ४ । ५१ ॥

रादौ प्रत्यये प्राग्वत् । भवितारौ । भवितारः। भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥

२१९२-रकारादि प्रत्यय परे रहते तासि प्रत्यय और अस् धातुके सकारका लोप हो । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥

२१९३ लृट् शेषे च । ३ । ३ । १३ ॥

भविष्यदर्थाद्धातोर्लृट् स्यात्क्रियार्थायां क्रियायामसत्यां सत्यां च । स्यः । इट् । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ॥

२१९३-क्रियार्थ क्रिया हो अथवा न हो भविष्यत् कालमें धातुके उत्तर लृट् हो । भू+स्य+इ+ति=भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ॥

२१९४ लोट् च । ३ । ३ । १६२ ॥

विध्यादिष्वर्थेषु धातोर्लोट् स्यात् ॥

२१९४-विध्यादि अर्थोंमें धातुके उत्तर लोट् हो ॥

२१९५ आशिषि लिङ्लोटौ । ३ । ३ । १७३ ॥

२१९५-आशीर्वाद अर्थमें धातुके उत्तर लिङ् और लोट् हों ॥

२१९६ एरुः ३ । ४ । ८६ ॥

लोट इकारस्य उः स्यात् । भवतु ॥

२१९६-लोट्के स्थानमें आदिष्ट तिबादिकोंके इकारके स्थानमें उकार हो, जैसे-भवतु ॥

२१९७ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् । ७ । १ । ३५ ॥

आशिषि तुह्योस्तातङ् वा स्यात् । अनेकाल्त्वात्सर्वादेशः । यद्यपि ङिच्चेत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते । इहोत्सर्गापवादयोरपि समबलत्वात् । भवतात् ॥

२१९७-आशीर्वाद अर्थमें तु और हि के स्थानमें विकल्प करके तातङ् हो । अनेकाल्त्वके कारण (४५) 'तु' और 'हि' सम्पूर्णके स्थानमें ही होगा, "ङिच्च४३" इस सूत्रसे अन्तादेश नहीं होगा । यद्यपि "ङिच्च ४३" यह सूत्र उसका(४५)अपवाद है, तथापि जहां ङित्का अन्य कोई प्रयोजन नहीं है, उन अनङ् आदि स्थलोंमें "ङिच्च" इस सूत्रकी चरितार्थता होतीहै, इसलिये गुण और वृद्धिका प्रतिषेध और संप्रसारण आदि जिसके ङित्त्वके फल हैं, ऐसे तातङ्में "ङिच्च" यह मंथर गतिसे प्रवृत्त होताहै, इससे उत्सर्ग और अपवादके तुल्यबलत्वके कारण पर होनेसे "अनेकाल्शित्सर्वस्य" इस सूत्रसे "ङिच्च" यह सूत्र बाधित होताहै जैसे-भवतात् ॥

२१९८ लोटो लङ्वत् । ३ । ४ । ८५ ॥

लोटो लङ इव कार्यं स्यात् । तेन तामादयः सलोपश्च । तथाहि ॥

२१९८-लोट्को लङ्के समान कार्य हों । तिससे यह सिद्ध हुआ कि, ताम्-आदि और सकारका लोप लङ्के समान लोट्को भी होंगे । ताम्-आदि और सलोपके सूत्र आगे दिखातेहैं ॥

२१९९ तस्थस्थमिपां तान्तन्तामः । ३ । ४ । १०१ ॥

ङितश्चतुर्णां तामादयः क्रमात्स्युः ॥

२१९९-ङित् लकारके स्थानमें आदिष्ट जो तस् १, थस् २, थ ३ और मिप् ४ इन चार प्रत्ययोंके स्थानमें क्रमसे ताम् १, तम् २, त ३ और आम् यह चार आदेश हों ॥

२२०० नित्यं ङितः । ३ । ४ । ९९ ॥

सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात् । अलोन्त्यस्येति सस्य लोपः । भवताम् । भवन्तु ॥

२२००-सकारान्त ङित् लकारके उत्तम पुरुषका नित्य लोप हो । "अलोन्त्यस्य ४१" इस सूत्रसे सकारका लोप हो । जैसे-भवताम् । भवन्तु ॥

२२०१ सेर्ह्यपिच्च । ३ । ४ । ८७ ॥

लोटः सेर्हिः स्यात्सोऽपिच्च ॥

२२०१-लोट्के सिके स्थानमें हि आदेश हो और वह अपित् भी हो ॥

२२०२ अतो हेः । ६ । ४ । १०५ ॥

अतः परस्य हेर्लुक् स्यात् । भव । भवतात् । भवतम् । भवत ॥

२२०२-अकारके परे स्थित हिका लुक् हो । भव । भवतात् । भवतम् । भवत ।

२२०३ मेर्निः । ३ । ४ । ८९ ॥

लोटो मेर्निः स्यात् ॥

२२०३-लोट्की मिके स्थानमें नि हो ॥

२२०४ आडुत्तमस्य पिच्च । ३ । ४ । ९२ ॥

लोडुत्तमस्याडागमः स्यात्स पिच्च । हिन्योरुत्त्वं न इकारोच्चारणसामर्थ्यात् । भवानि । भवाव । भवाम ॥

२२०४-लोट्के उत्तम पुरुषको आट्का आगम हो और वह पित् हो । इकारोच्चारणसामर्थ्यसे हि और निके इकारके स्थानमें उकार न हो, जैसे--भवानि । भवाव । भवाम ॥

२२०५ अनद्यतने लङ् । ३ । २ । १११ ॥

अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् ॥

२२०५-अनद्यतन भूतार्थवृत्ति धातुके उत्तर लङ् हो ॥

२२०६ लुङ्लङ्लृङ्क्ष्वडुदात्तः । ६ । ४ । ७१ ॥

एषु परेष्वङ्गस्याऽडागमः स्यात्स चोदात्तः ॥

२२०६-लुङ्, लङ् और लृङ् परे रहते धातुको अट्का आगम हो और वह अड गम उदात्त हो ॥

२२०७ इतश्च । ३ । ४ । १०० ॥

ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः स्यात् । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ॥

२२०७-ङित् लकारका जो परस्मैपद इकारान्त, उसका लोप हो । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ॥

२२०८ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । ३ । ३ । १६१ ॥

एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात् । विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम् । निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । आमन्त्रणं कामचारानुज्ञा । अधीष्टं सत्कारपूर्वको व्यापारः। प्रवर्तनायां लिङ् इत्येव सुवचम् । चतुर्णां पृथगुपादानं प्रपञ्चार्थम् ॥

२२०८-विधि, निमंत्रण, आमंत्रण, अधीष्ट, संप्रश्न और प्रार्थना अर्थमें धातुके उत्तर लिङ् हो । विधि-प्रेरण अर्थात् भृत्यादि निकृष्ट व्यक्तिके प्रवर्त्तनको कहतेहैं । निमंत्रण-नियोग करण जानना, अर्थात् आवश्यक श्राद्ध भोजनादि विषयोंमें दौहित्रादिकोंका प्रवर्त्तन-आमंत्रण-कामचारकी अनुज्ञा । अधीष्ट-सत्कारपूर्वक व्यापारको कहतेहैं । 'प्रवर्त्तना अर्थमें लिङ् हो' ऐसा कहनेसे काम चलजाता परन्तु विधि आदि चारोंका पृथक् २ उपादान प्रपञ्चार्थ स्पष्टताके लिये है ॥

२२०९ यासुट् परस्मैपदेषूदात्तो ङिच्च । ३ । ४ । १०३ ॥

लिङः परस्मैपदानां यासुडागमः स्यात्स चोदात्तो ङिच्च । ङित्त्वोक्तेर्ज्ञायते क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेध इति । शादेशस्य शानचः शित्त्वमपीह लिङ्गम् ॥

२२०९-लिङ्के परस्मैपदोंको यासुट्का आगम हो और वह उदात्त और ङित् भी हो, इस ङित्वकी उक्तिसे जाना जाता है कि, कभीकभी अनुबन्ध कार्यमें भी "अनल्विधौ" यह स्थानिवद्भावका प्रतिषेध होताहै । श्नाके स्थानमें विहित जो शानच् उसका शित्व प्रमाण भी इस विषयका ज्ञापक है । इसका विशेष विवरण पहले (४७०) कर चुकेहैं ॥

२२१० सुट् तिथोः । ३ । ४ । १०७ ॥

लिङस्तकारथकारयोः सुट् स्यात् सुटा यासुट् न बाध्यते, लिङो यासुट् तकारथकारयोः सुडिति विषयभेदात् ॥

२२१०-लिङ्के तकार और थकारको सुट्का आगम हो । इस सुट्से यासुट् बाधित नहीं होताहै, क्योंकि, लिङ्को यासुट् होताहै और तकार और थकारको सुट् होताहै, इस कारण विषयभेद है, और भिन्नविषयमें बाध्यबाधकभाव नहीं होता ॥

२२११ लिङः सलोपोऽनन्त्यस्य । ७ । २ । ७९ ॥

सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात् । इति सकारद्वयस्यापि निवृत्तिः । सुटः श्रवणं त्वाशीर्लिङि । स्फुटतरं तु तत्रात्मनेपदे ॥

२२११-सार्वधातुक जो लिङ्, उसके अनन्त्य (अन्तमें न हो ऐसे) सकारका लोप हो । इस सूत्रके अनुसार दोनों सकारोंकी निवृत्ति हुई, सुट्का श्रवण तो आशिषिलिङ्में होगा और स्फुटतर तो वहां भी आत्मनेपदमें होगा ॥

२२१२ अतो येयः । ७ । २ । ८० ॥

अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इय् स्यात् । गुणः । यलोपः । भवेत् । सार्वधातुके किम् । चिकीर्ष्यात् । मध्येऽपवादन्यायेन हि अतो लोप एव बाध्येत । भवेदित्यादौ तु परत्वाद्दीर्घः स्यात् । भवेताम् ॥

२२१२-अकारके परे स्थित सार्वधातुकके अवयव 'या' के स्थानमें इय् आदेश हो । (गुण (६९) और यलोप ८७३) भवेत् । इस सूत्रमें 'सार्वधातुके' की अनुवृत्ति न करैंगे तो 'चिकीर्ष्यात्' यहां इय् होजायगा, और "मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्" इस परिभाषासे प्रकृतसूत्र "अतो लोपः ६।४।४८"कोही बाधेगा, "अतो दीर्घो यञि ७।३।१०१" को नहीं, तब तो 'भवेत्'इत्यादिकमें परत्वात् दीर्घ ही हो जायगा इय् नहीं । भवेताम् ॥

२२१३ झेर्जुस् । ३ । ४ । १०८ ॥

लिङो झेर्जुस् स्यात् ज इत् ॥

२२१३-लिङ्के झि प्रत्ययके स्थानमें जुस् आदेश हो । जुस्के जकारकी इत्संज्ञा हुई (१८९) उस् रहा ॥

२२१४ उस्यपदान्तात् । ६ । १ । ९६ ॥

अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात् । इति प्राप्ते । परत्वान्नित्यत्वाच्चातो येय इति प्राप्तः । यद्यप्यन्तरङ्गत्वात्पररूपं न्याय्यं तथापि यासु इत्येतस्य इय् इति व्याख्येयम् । एवं च सलोपस्यापवाद इय् । अतो येय

इत्यत्र तु सन्धिरार्षः । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ॥

२२१४-अपदान्त अवर्णके उत्तर उस् परे रहते पूर्व परके स्थानमें पररूप एकादेश हो । इसकी प्राप्ति होने पर, परत्व और नित्यत्वके कारण आदेश हो, "अतो येयः २२१२" से 'या' को इय् यह प्राचीन लोगोंका मत है । यद्यपि अन्तरङ्गत्वके कारण पररूप न्याय्य है तथापि 'यास्' भागके स्थानमें इय् आदेश हो, इस प्रकार ही उस (२२१२) की व्याख्या करनी उचित है, इस प्रकार 'इय्' आदेश सलोपका अपवाद होताहै, इस व्याख्यामें "अतो येयः" इस सूत्रमें जो संधि है, वह आर्ष है । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ॥

२२१५ लिङाशिषि । ३ । ४ । ११६ ॥

आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात् ॥

२२१५-आशीर्वादार्थक लिङ्के स्थानमें विहित जो तिङ्, वह आर्धधातुक संज्ञक हो ॥

२२१६ किदाशिषि । ३ । ४ । १०४ ॥

आशिषि लिङो यासुट् कित्स्यात् । स्कोरिति सलोपः ॥

२२१६-आशीर्वादार्थक लिङ्का यासुट् कित् हो । "स्कोः ३८०" इस सूत्रसे यासुट् और सुट् (२२१०) के सकारका लोप हुआ ॥

२२१७ क्ङिति च । १ । १ । ५ ॥

गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ॥

२२१७-गित्, कित्, और ङित् निमित्तवाले इग्लक्षण गुण और वृद्धि न हों, जैसे-भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ॥

२२१८ लुङ् । ३ । २ । ११० ॥

भूतार्थवृत्तेर्धातोर्लुङ् स्यात् ॥

२२१८-भूत अर्थमें वर्त्तमान धातुसे लुङ् हो ॥

२२१९ माङि लुङ् । ३ । ३ । १७५ ॥

सर्वलकारापवादः ॥

२२१९-माङ् शब्दके योगमें धातुके उत्तर लुङ् हो यह सर्वलकारका अपवाद है ॥

२२२० स्मोत्तरे लङ् च । ३ । ३ । १७६ ॥

स्मोत्तरे माङि लङ् स्याल्लुङ् च ॥

२२२०-स्म शब्द पर है जिससे ऐसे माङ् शब्दके योगमें धातुके उत्तर लङ् और लुङ् दोनों हों ॥

२२२१ च्लि लुङि । ३ । १ । ४३ ॥

शबाद्यपवादः ॥

२२२१-लुङ् परे रहते धातुके उत्तर च्लि प्रत्यय हो । यह च्लि शबादिकोंका अपवाद है ॥

२२२२ च्लेः सिच् । ३ । १ । ४४ ॥

इचावितौ ॥

२२२२-च्लिके स्थानमें सिच् आदेश हो । सिच्के इ और च की इत्संज्ञा हुई, सकार शेष रहा ॥

२२२३ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु । २ । ४ । ७७ ॥

एभ्यः सिचो लुक् स्यात् । गापाविहेणादेशपिबती गृह्येते ॥

२२२३-गा धातु, स्था धातु, घुसंज्ञक (दा, धा) धातु, पा धातु और भू धातुके उत्तर सिच्का लुक् हो । परस्मैपदसंज्ञक प्रत्यय परे रहते । गा धातु और पा धातु, दो दो हैं । एक इण् धातुके स्थानमें आदिष्ट गा धातु, अन्य गीतार्थमें एवम् 'पा पाने' और 'पा-रक्षणे' यह दो पा हैं, परन्तु इस स्थानमें इण् धातुके स्थानमें आदिष्ट गा धातु और पानार्थक पा धातुके उत्तर ही सिच्का लुक् होगा अन्यत्र नहीं ॥

२२२४ भूसुवोस्तिङि । ७ । ३ । ८८ ॥

भू सु एतयोः सार्वधातुके तिङि परे गुणो न स्यात् ॥

२२२४-सार्वधातुक तिङ् परे रहते भू और सु, इन दोनों धातुओंके उकारको गुण न हो ॥

२२२५ अस्तिसिचोऽपृक्ते । ७ । ३ । ९६ ॥

सिच् अस् चेति समाहारद्वन्द्वः । सिच्छब्दस्य सौत्रं भत्वम् । अस्तीत्यव्ययेन कर्मधारयः । ततः पञ्चम्याः सौत्रो लुक् । विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तहल ईडागमः स्यात् । इतीट् नेह । सिचो लुप्तत्वात् । अभूत् । हलः किम् । ऐधिषि । अपृक्तस्येति किम् । ऐधिष्ट । अभूताम् ॥

२२२५-इस स्थलमें 'सिच्' और 'अस्'का परस्पर समाहारद्वन्द्व समास है । सूत्रके अनुसार सिच्की भ संज्ञा हुई, पश्चात् 'अस्ति' इस अव्ययके साथ कर्मधारय समास हुआ, पश्चात् सौत्रत्वके कारण पंचमी विभक्तिका लुक् हुआहै ।

विद्यमान सिच् और अस् धातुके परे स्थित अपृक्त हल्को ईट्का आगम हो, इस सूत्रसे यहां ईट् नहीं होता क्योंकि, सिच्का लुक् हुआ है । अभूत् ।

हल्को ईडागमका विधान करनेसे 'ऐधिषि' इस स्थानमें ईडागम नहीं हुआ ।

और अपृक्त कहनेके कारण 'ऐधिष्ट' इस स्थानमें भी ईडागम नहीं हुआ । अभूताम् ॥

२२२६ सिजभ्यस्तविदिभ्यश्च । ३ । ४ । १०९ ॥

सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबन्धिनो झेर्जुस् स्यात् । इति प्राप्ते ॥

२२२६-सिच्, अभ्यस्त और विद् धातुके उत्तर ङित् सम्बन्धी झि के स्थानमें जुस् आदेश हो । इस प्रकार जसकी प्राप्ति होनेपर-॥

२२२७ आतः । ३ । ४ । ११० ॥

सिज्लुक्यादन्तादेव झेर्जुस् स्यात् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥

२२२७-सिच्का लुक् होनेपर आकारान्त ही धातुके झि के स्थानमें जुस् आदेश हो, जैसे-अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥

२२२८ न माङ्योगे । ६ । ४ । ७४ ॥

अडाटौ न स्तः । मा भवान् भूत् । मा स्म भवत् भूद्वा ॥

२२२८-माङ् शब्दके योगमें धातुको अट् और आट्का आगम न हो, जैसे-मा भवान् भूत् । मा स्म भवत् भूद्वा ॥

२२२९ लिङ्निमित्ते लृङ् क्रियातिपत्तौ । ३ । ३ । १३९ ॥

हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ॥

२२२९-हेतु हेतुमद्भाव आदि लिङ्के निमित्त हैं, इन (हेतु हेतुमद्भावादि) के विषयमें क्रियाकी अनिष्पत्ति गम्यमान होनेपर भविष्यत् अर्थमें लृङ् हो, जैसे-अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ॥

२२३० ते प्राग्धातोः । १ । ४ । ८० ॥

ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः ॥

२२३०-गति और उपसर्गसंज्ञक शब्द धातुओंके पूर्वमें ही प्रयुक्त हों ॥

२२३१ आनि लोट् । ८ । ४ । १६ ॥

उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात् । प्रभवाणि ॥ दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः ॥ * ॥ दुःस्थितिः । दुर्भवानि ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् ॥ * ॥ अन्तर्धा । अन्तर्धिः । अन्तर्भवाणि ॥

२२३१-उपसर्गस्थ निमित्तके परे स्थित लोट्स्थानिक आनि आदेशके नकारको णत्व हो, जैसे-प्र-भवाणि । षत्व और णत्व कर्त्तव्य रहते दुर् शब्दके उपसर्गत्वका निषेध करना चाहिये * जैसे-दुःस्थितिः । दुर्भवानि । अन्तर शब्दको अङ् तथा कि प्रत्ययके विधान और णत्वविषयमें ही उपसर्गत्व कहना चाहिये* जैसे-अन्तर्धा । अन्तर्धिः । अन्तर्भवाणि ॥

२२३२ शेषे विभाषाऽकखादावषान्त उपदेशे । ८ । ४ । १८ ॥

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात् । प्रणिभवति । प्रनिभवति । इहोपसर्गाणामसमस्तत्वेपि संहिता नित्या । तदुक्तम्-

संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ इति ॥

सत्ताद्यर्थनिर्देशश्चोपलक्षणम् । यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थात् । उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति । पराभवति । संभवति । अनुभवति । अभिभवति । उद्भवति । परिभवतीत्यादौ विलक्षणार्थावगतेः । उक्तं च-

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ॥

एध वृद्धौ । कत्थन्ताः षट्त्रिंशदनुदात्तेतः ॥

२२३२-उपदेशमें ककारादि, खकारादि, षकारान्त और गद, नदादि भिन्न धातु परे रहते उपसर्गस्थ निमित्तके परे स्थित निके नकारको विकल्प करके णत्व हो, जैसे-प्रणिभवति । प्रनिभवति । इस स्थलमें उपसर्गके साथ धातुका समास न होनेपर भी संधि नित्य ही सिद्ध होगा, जैसा-कहागया है कि,

एक पदमें धातु और उपसर्गमें और समासमें सन्धि नित्य हो, किन्तु वह सन्धि वाक्यविषयमें विवक्षाकी अपेक्षा करताहै ।

सत्ता आदि अर्थके निर्देश उपलक्षण हैं क्योंकि "यागात् स्वर्गो भवति" इस स्थलमें 'भवति' पदका 'उत्पद्यते'-इत्यादि अर्थ होताहै ।

उपसर्ग तो अर्थ विशेषका द्योतक है, जैसे-'प्रभवति । पराभवति । सम्भवति । अभिभवति । उद्भवति । परिभवति । इत्यादि स्थलमें विलक्षण अर्थकी अवगति होतीहै । कहा है-

उपसर्गके बलसे धातुके प्रकृत अर्थसे अन्यार्थकी प्रतीति होती है, जैसे-प्रहार, आहार, संहार, विहार, परिहार-इत्यादि ।

एध धातु वृद्धि अर्थमें जानना । एध धातुसे कत्थ धातु पर्यंत ३६ धातुओंके अनुदात्त अक्षर इत्संज्ञक हैं, अर्थात् यह आत्मनेपदी होंगे ॥

२२३३ टित आत्मनेपदानां टेरे । ३ । ४ । ७९ ॥

टितो लस्यात्मनेपदानां टेरेत्वं स्यात् । एधते ॥

२२३३-टकार इत् हो ऐसा जो लकार उसके स्थानमें विहित आत्मनेपदसंज्ञककी टिके स्थानमें एकार हो, जैसे-एधते ॥

२२३४ सार्वधातुकमपित् । १ । २ । ४॥

अपित्सार्वधातुकं ङिद्वत्स्यात् ॥

२२३४-अपित् सार्वधातुकको ङिद्वत् कार्य हो ॥

२२३५ आतो ङितः । ७ । २ । ८१ ॥

अतः परस्य ङितामाकारस्य इय् स्यात् । एधेते । एधन्ते ॥

२२३५-अकारके परे स्थित ङित्के आकारके स्थानमें इय् आदेश हो, जैसे-एधेते । एधन्ते ॥

२२३६ थासः से । ३ । ४ । ८० ॥

टितो लस्य थासः से स्यात् । एधसे । एधेथे। एधध्वे । अतो गुणे । एधे । एधावहे । एधामहे॥

२२३६-टकार इत् है ऐसे लकारके स्थानमें विहित थास् प्रत्ययके स्थानमें से आदेश हो, जैसे-एधसे । एधेथे। एधध्वे । अकारके उत्तर गुण (अ, ए) परे रहते पूर्व परके स्थानमें गुण होताहै (१९१) जैसे-एधे । एधावहे। एधामहे ॥

२२३७ इजादेश्च गुरुमतोऽनृच्छः । ३ । १ । ३६ ॥

इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्ततत आम् स्यात् लिटि । आमो मकारस्य नेत्त्वम्, आस्कासोराम्विधानाज्ज्ञापकात् ॥

२२३७-लिट् प्रत्यय परे रहते ऋच्छ धातुभिन्न अन्य गुरुसंज्ञकयुक्त अजादि धातुओंके उत्तर आम् प्रत्यय हो । आस् और कास् धातुके उत्तर आम् विधानके कारण आम्के मकारकी इत्संज्ञा न हो ॥

२२३८ आमः । २ । ४ । ८१ ॥

आमः परस्य लुक् स्यात् ॥

२२३८-आम् परे लिट्के लकारका लोप हो ॥

२२३९ कृञ्चानुप्रयुज्यते लिटि । ३ । १ । ४० ॥

आमन्ताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते । आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येतिसूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते । तेन कृभ्वस्तियोग इत्यतः कृञो द्वितीयेति अकारेण प्रत्याहाराश्रयणात् कृभ्वस्तिलाभः । तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः । सम्पदिस्तु प्रत्याहारेऽन्तर्भूतोप्यनन्वितार्थत्वान्न प्रयुज्यते । कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते ॥

२२३९-अतीत (बीतेहुए) कालमें आमन्त धातुके उत्तर लिट्परक कृ, भू, अस् धातु अनुप्रयुक्त हों ।

"आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य २२४०" इस सूत्रमें कृ धातुके ग्रहणकी सामर्थ्यके कारण तद्भिन्न धातुका भी अनुप्रयोग होसकताहै, इस कारण "कृभ्वस्तियोगे० २११७" इस सूत्रके 'कृ' तथा "कृञो द्वितीय० २१२९" इस सूत्रोक्त अकारसे प्रत्याहाराश्रयके कारण कृ, भू और अस् धातुका लाभ होताहै, उनके सामान्यक्रियावाचित्व और आम् प्रकृतिके विशेषवाचित्वके कारण उन दोनों अर्थोंका अभेदान्वय होता है । संपूर्वक पद् धातु प्रत्याहारमध्यमें अन्तर्भूत होनेपर भी अनन्वितार्थके कारण प्रयुक्त नहीं होगा ।

कृञ् धातुका क्रियाफल परगामी होनेपर परस्मैपदकी प्राप्ति होनेपर- ॥

२२४० आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । १ । ३ । ६३ ॥

आम् प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः । आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात् । इह पूर्ववदित्यनुवर्त्य वाक्यभेदेन संबध्यते । पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति । तेन कर्तृगेपि फले इन्दांचकारेत्यादौ न तङ् ॥

२२४०-जिन धातुओंके उत्तर आम्प्रत्यय हो, उनके साथ तुल्य अनुप्रयुक्त कृञ् धातुके उत्तर भी आत्मनेपद हो । इस स्थलमें "पूर्ववत्" इस पदकी अनुवृत्ति होकर वाक्यभेदानुसार संबन्ध होताहै इस कारण पूर्ववत् ही आत्मनेपद हो, उसके विपरीत अर्थात् आम् प्रकृतिके परस्मैपदी होनेपर अनुप्रयुक्तसे आत्मनेपद न हो, इस कारण फल कर्तृगत होनेपर भी 'इन्दाञ्चकार'-इत्यादि स्थलमें तङ् न होगा ॥

२२४१ लिटस्तझयोरेशिरेच् । ३ । ४ । ८१ ॥

लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः । एकारोच्चारणं ज्ञापकं तङादेशानां टेरेत्वं नेति । तेन डारौरसां न । कृ ए इति स्थिते ॥

२२४१-लिट्के स्थानमें आदिष्ट जो 'त' और 'झ' उनके स्थानमें एश् और इरेच् आदेश हों, एकारका उच्चारण ज्ञापक मात्र अर्थात् इस स्थानमें एकार उच्चारण करनेसे यह जाना जाताहै कि, तङ्के स्थानमें आदिष्ट की टिके स्थानमें एकार नहीं हो इससे डा, रौ, रसकी टिके स्थानमें एत्व नहीं हुआ। 'कृ+ए' ऐसा होनेपर ॥

२२४२ असंयोगाल्लिट्कित् । १ । २ । ५ ॥

असंयोगात्परोऽपिल्लिट्कित्स्यात् क्ङिति चेतिनिषेधात्सार्वधातुकार्धधातुकयोरिति गुणो न । क्ङित्वात्परत्वाद्वृणि प्राप्ते ॥

२२४२-असंयोगके अर्थात् असंयुक्त धातुके परे स्थित जो अपित् लिट् उसकी कित्संज्ञा हो । "क्ङिति च २२१७" इस

सूत्रसे गुणनिषेधके कारण "सार्वधातुकार्धधातुकयोः २१६८" इस सूत्रसे गुण नहीं होगा द्वित्वसे परत्वके कारण यण्की प्राप्ति होनेपर ॥

२२४३ द्विर्वचनेऽचि । १ । १ । ५९ ॥

द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये ॥

२२४३-द्वित्वनिमित्तीभूत अच् परे रहते यदि द्वित्व कर्त्तव्य हो तो धातुसम्बन्धी अच्के स्थानमें आदेश न हो, अर्थात् द्वित्व करनेपर आदेश हो, द्वित्व न होनेपर आदेश नहीं हो ॥

२२४४ उरत् । ७ । ४ । ६६ ॥

अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे । रपरत्वम् ॥ हलादिः शेषः । प्रत्यये किम् । वव्रश्च ॥

२२४४-प्रत्यय परे रहते अभ्याससंबंधी ऋवर्णके स्थानमें अत् अर्थात् अकार हो "उरण्रपरः" इससे रपरत्व (अर्) होगा "हलादिः शेषः २१७९" इस सूत्रसे अन्तस्थित हल् अर्थात् रकारका लोप होगा ।

प्रत्यय परे न रहते वव्रश्च इस स्थलमें लिट् परे संप्रसारण करनेपर "अचः परस्मिन्" इस सूत्रसे स्थानिवद्भावके कारण "न सम्प्रसा०" इस सूत्रसे सम्प्रसारणका निषेध होताहै, 'प्रत्यये' न कहनेपर परनिमित्तक आदेश न होनेसे "अचः पर०" से स्थानिवद्भावकी प्राप्ति न होनेके कारण "न संप्रसा०" इसकी प्राप्ति न होनेपर संम्प्रसारण करके 'उव्रश्च' ऐसा होजाता ॥

२२४५ कुहोश्चुः । ७ । ४ । ६२ ॥

अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात् । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ॥

२२४५-अभ्याससंबंधी कवर्ग और हकारके स्थानमें चवर्ग आदेश हो, जैसे-एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ॥

२२४६ एकाच उपदेशेऽनुदात्तात् । ७ । २ । १० ॥

उपदेशे यो धातुरेकाच् अनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येट् न स्यात् । उपदेशे इत्युभयान्वयि । एकाच इति किम् । यङ्लुक्यप्रवृत्तिर्यथा स्यात् । स्मरन्ति हि-

श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ १ ॥ इति ।

एतच्चेहैवैकाज्ग्रहणेन ज्ञाप्यते । अच इत्येवैकत्वविवक्षया तद्वतोग्रहणेन च सिद्धे एकग्रहणसामर्थ्यादनेकाचकोपदेशो व्यावर्त्यते । तेन वधेर्हन्त्युपदेशे एकाचोऽपि न निषेधः । आदेशोपदेशेऽनेकाच्त्वात् । अनुदात्ताश्चानुपदमेव संग्रहीष्यन्ते । एधाञ्चकृषे । एधाञ्चक्राथे ॥

२२४६-उपदेश अवस्थामें जो धातु एकअच् युक्त और अनुदात्त उसके परे स्थित वलादि आर्द्धधातुकको इट् आगम न हो । 'उपदेशे' यह पद उभयान्वयी अर्थात् एकाच् धातु और अनुदात्त धातु इन दोनोंके साथ ही उसका अन्वय होताहै ।

एकाच् ग्रहण करनेसे यङ्लुक्में इस सूत्रकी प्रवृत्ति न होगी क्योंकि, आचार्य ऐसा कहतेहैं कि, श्तिप्से निर्दिष्ट जो कार्य, शप्से निर्दिष्ट जो कार्य, अनुबंधसे निर्दिष्ट जो कार्य, गणसे निर्दिष्ट जो कार्य्य और जिस सूत्रमें एकाच् ग्रहण कियाहै उस एकाच्से निर्दिष्ट जो कार्य यह पांच प्रकारके कार्य यङ्लुक्विषयमें नहीं होंगे । इस सूत्रमें एकाच् ग्रहणसे कारिकासे जो अभिहित हुआ है सो जाना जाता है यद्यपि 'अचः' ऐसी एकत्व विवक्षाके कारण और अच्विशिष्टके ग्रहणके कारण एकाच् विशिष्ट धातुका लाभ होता तथापि एक पदका ग्रहण क्यों किया ? इस आशङ्काका निराकरण करतेहैं कि, जहां हन् धातुके स्थानमें 'वध' आदेश होगा, उस स्थानमें आदेश उपदेशमें अनेकाच्त्वके कारण अनादेश अवस्थामें हन् धातु एकाच् होनेपर भी उसके उत्तर इट् निषेध नहीं होगा, एधाञ्चकृषे । एधाञ्चक्राथे । अनुदात्त धातु आगे कहे जायंगे ॥

२२४७ इणः षीध्वंलुङ्लिटां धोऽङ्गात् । ८ । ३ । ७८ ।

इण्णन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात् । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न । अन्यथा हि कस् चानुप्रयुज्यत इति कृभ्वित वा ब्रूयात् ॥

२२४७-इण् भागान्त अङ्गके परे जो षीध्वम् प्रत्ययका धकार और लुङ् लिट् संबन्धी जो धकार उसके स्थानमें मूर्द्धन्य वर्ण अर्थात् ढकार हो, जैसे-एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव ।

अनुप्रयोग होनेके कारण अस् धातुके स्थानमें भू आदेश नहीं होगा नहीं तो "कस् चानुप्रयुज्यते" ऐसे सूत्र करनेसे ही निर्वाह होनेसे भू धातुका ग्रहण व्यर्थ होजाता, अथवा "कृभू चानुप्रयुज्यते" ऐसा करनेपर भी निर्वाह होनेसे अस् धातुका पृथक् ग्रहण व्यर्थ होजाता ॥

२२४८ अत आदेः । ७ । ४ । ७० ॥

अभ्यासस्यादेरतो दीर्घः स्यात् । पररूपापवादः । एधामास । एधामासतुरित्यादि ॥ एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ॥

२२४८-अभ्यासके आदिमें स्थित अकारको दीर्घ हो, यह सूत्र पररूपका विशेषक है, जैसे-एधामास । एधामासतुः-इत्यादि । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ॥

२२४९ धि च । ८ । २ । २५ ॥

धादौ प्रत्यये परे सलोपः स्यात् । एधिताध्वे ॥

२२४९–धकारादि प्रत्यय परे रहते सकारका लोप हो, जैसे–एधिताध्वे ॥

२२५० ह एति । ७ । ४ । ५२ ॥

तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ॥

२२५०–विभक्तिका एकार परे रहते तास् प्रत्ययके सकार और अस् धातुके सकारके स्थानमें हकार हो, जैसे–एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ॥

२२५१ आमेतः । ३ । ४ । ९० ॥

लोट एकारस्याम् स्याम् । एधताम् । एधेताम् । एधन्ताम् ॥

२२५१–लोट्के एकारके स्थानमें आम् आदेश हो, जैसे–एधताम् । एधेताम् । एधन्ताम् ॥

२२५२ सवाभ्यां वामौ । ३ । ४ । ९१ ॥

सवाभ्यां परस्य लोडेतः क्रमाद्व अम् एतौ स्तः । एधस्व । एधेथाम् । एधध्वम् ॥

२२५२–सकारके परे स्थित लोट्के एकारके स्थानमें व और वकारके परे स्थित लोट्के एकारके स्थानमें अम् आदेश हो, जैसे–एधस्व । एधेथाम् । एधध्वम् ॥

२२५३ एत ऐ । ३ । ४ । ९३ ॥

लोडुत्तमस्य एत ऐ स्यात् । आमोऽपवादः । एधै । एधावहै । एधामहै ॥

२२५३–लोट्के उत्तम पुरुषके एकारके स्थानमें ऐकार आदेश हो, यह ऐ आदेश आम् आदेशका अपवाद है, जैसे–एधै । एधावहै । एधामहै ॥

२२५४ आडजादीनाम् । ६ । ४ । ७२ ॥

अजादीनामाट् स्यात् लुङादिषु । अटोऽपवादः । आटश्च । ऐधत । ऐधेताम् । ऐधन्त । ऐधथाः । ऐधेथाम् । ऐधध्वम् । ऐधे । ऐधावहि । ऐधामहि ॥

२२५४–लङ्, लुङ् और लृङ् यह तीन लकार परे रहते अच् आदिमें है जिनके ऐसे जो धातु उनको आट् आगम हो, यह आट् अट् आगमका निषेधक है, "आटश्च २६९" इस सूत्रसे आकार तथा एकारके स्थानमें वृद्धि होगी, जैसे–ऐधत । ऐधेताम् । ऐधन्त । ऐधथाः । ऐधेथाम् । ऐधध्वम् । ऐधे । ऐधावहि । ऐधामहि ॥

२२५५ लिङः सीयुट् । ३ । ४ । १०२ ॥

लिङात्मनेपदस्य सीयुडागमः स्यात् । सलोपः । एधेत । एधेयाताम् ॥

२२५५–आत्मनेपदसंज्ञक लिङ्को सीयुट् आगम हो, सीयुट्के सकारका लोप होकर ईयुट् रहा, जैसे–एधेत । एधेयाताम् ॥

२२५६ झस्य रन् । ३ । ४ । १०५ ॥

लिङो झस्य रन् स्यात् । एधेरन् । एधेथाः । एधेयाथाम् । एधेध्वम् ॥

२२५६–लिङ्के झके स्थानमें रन् आदेश हो, जैसे–एधेरन् । एधेथाः । एधेयाथाम् । एधेध्वम् ॥

२२५७ इटोऽत् । ३ । ४ । १०६ ॥

लिङादेशस्येटोऽत्स्यात् । एधेय । एधेवहि । एधेमहि । आशीर्लिङि आर्धधातुकत्वात् लिङः सलोपो न । सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वम् । एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् । एधिषीष्ठाः । एधिषीयास्थाम् । एधिषीध्वम् । एधिषीय । एधिषीवहि । एधिषीमहि ॥ ऐधिष्ट । ऐधिषाताम् ॥

२२५७–लिङ्के स्थानमें आदिष्ट जो इट् उसके स्थानमें अत् हो, जैसे–एधेय । एधेवहि । एधेमहि । आशीर्लिङ्में आर्धधातुकके कारण धातुके उत्तर सकारका लोप नहीं होगा, सीयुट् और सुट्के प्रत्ययावयवत्वके कारण सकारको षत्व होगा, जैसे–एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् । एधिषीष्ठाः । एधिषीयास्थाम् । एधिषीध्वम् । एधिषीय । एधिषीवहि । एधिषीमहि ॥ ऐधिष्ट । ऐधिषाताम् ॥

२२५८ आत्मनेपदेष्वनतः । ७ । १ । ५ ॥

अनकारात्परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात् । ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । इणः षीध्वंलुङ्लिटां धोऽङ्गात् । ऐधिढ्वम् । इङ्गिन एव इणिह गृह्यते इति मते तु । ऐधिध्वम् । ढधयोर्वस्य मस्य च द्वित्वविकल्पात्षोडशरूपाणि । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । उदात्तत्वाद्धलादेरेद प्रसङ्गादनुदात्ताः संगृह्यन्ते ॥

२२५८–आत्मनेपदमें अकारभिन्न स्वर वर्णके परे स्थित 'झ' के स्थानमें अत् आदेश हो । जैसे–ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । "इणः षीध्वंलुङ्लिटां धोऽङ्गात् २२४७" इस सूत्रसे धकारके स्थानमें ढकार होगा, जैसे–ऐधिढ्वम् । इस स्थल (२२४७) में इङ्भिन्नही इणका ग्रहण है, ऐसा जिनका मत है, उनके मतमें इस स्थानमें ढत्व नहीं होगा, जैसे–ऐधिध्वम् । ढ, ध, व और मकारके द्वित्व विषयमें

विकल्पके कारण सोलह(१६)रूप होंगे । ऐधिषि । ऐधिष्वहि । ऐधिष्महि ।

ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । उदात्तत्वके कारण वलादि आर्द्धधातुकको इट्का आगम हुआ ॥

ऊदृदन्तैर्यौति-रु-क्ष्णु-
शी-स्नु-नु-क्षु-श्वि-डीङ्-श्रिभिः ।
वृङ्-वृञ्भ्यां च विनैकाचो-
ऽजन्तेषु निहताः स्मृताः ॥ १ ॥

शक्ल-पच्-मुच्-रिच्-वच्-विच्-
सिच्-प्रच्छि-त्यज्-निजिर्-भजः ।
भंज्-भुज्-भ्रस्ज्-मस्जि-यज्-युज्-
रुज्-रञ्ज्-विजिर्-स्वञ्जि-सञ्ज्-सृजः॥२॥

अद्-क्षुद्-खिद्-छिद्-तुदि-नुदः
पद्य-भिद्-विद्यति-र्विनद् ।
शद्-सदी स्विद्यतिः स्कन्दि-
हदी क्रुध् क्षुधि-बुध्यती ॥ ३ ॥

बन्धि-र्युधि-रुधी राधि-
व्यध्-शुधः साधि-सिध्यती ।
मन्य-ह-न्नाप्-क्षिप्-छुपि-तप्-
तिप-स्तृप्यति-दृप्यती ॥ ४ ॥

लिप्-लुप्-वप्-शप्-स्वप्-सृपि यभ्-
रभ्-लभ्-गम्-नम्-यमो रमिः ।
क्रुशि-र्दंशि-दिशी दृश्-मृश्-
रिश्-रुश्-लिश्-विश्-स्पृशः कृषिः ॥ ५ ॥

त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-
शिष्-शुष्-श्लिष्यतयो घसिः ।
वसति-र्दह्-दिहि-दुहो
नह्-मिह्-रुह्-लिह् वहिस्तथा ॥ ६ ॥

अनुदात्ता हलन्तेषु
धातवो द्व्यधिकं शतम् ॥
तुदादौ मतभेदेन
स्थितौ यौ च चुरादिषु ॥ ७ ॥

तृप्-दृपी तौ वारयितुं
श्यना निर्देश आदृतः ॥

किंच ।

स्विद्य-पद्यौ सिध्य-बुध्यौ
मन्य-पुष्य-श्लिषः श्यना ॥ ८ ॥
वसिः शपा लुका यौति-
र्निर्दिष्टोऽन्यनिवृत्तये ।
निजिर् विजिर् शक्ल इति
सानुबन्धा अमी तथा ॥ ९ ॥

विन्दतिश्चान्द्रदौर्गादे-
रिष्टो भाष्येपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं
नेह पेठुरिति स्थितम् ॥ १० ॥

रञ्जि-मस्जी अदि-पदी
तुद् क्षुध् शुषि-पुषी शिषिः ।
भाष्यानुक्ता नवेहोक्ता
व्याघ्रभूत्यादिसंमतेः ॥ ११ ॥ २ ॥

प्रसङ्गसे अनुदात्त धातु संगृहीत होतेहैं, जैसे–ऊकारान्त और ऋकारान्त भिन्न जो धातु, यु, रु, क्ष्णु, शी, स्नु, नु, क्षु, श्वि, डीङ् और श्रि भिन्न जो धातु तथा वृङ् और वृञ् धातु भिन्न अजन्तके मध्यमें स्वरयुक्त सम्पूर्ण धातु अनुदात्त हैं । हलन्त धातुके मध्यमें निम्न लिखित शक्लृआदिसे लेकर वह् धातु तक एकसौ दो (१०२) धातु अनुदात्त हैं जैसे–

ककारान्त–१ । शक्लृ (शक्) समर्थ होना ।

चकारन्त–६ । पच्–रांधना । मुच्–छोडना । रिच्–रेच्–दस्त कराना । वच्–बोलना । विच्–अलग करना । सिच्–छिडकना वा सींचना ।

छकारान्त–१ । प्रच्छ्–पूंछना ।

जकारान्त–१५ । त्यज्–त्यागना । निज्–शुद्ध करना । भज्–सेवा करना । भञ्ज्–तोडना । भुज्–भोगकरना । भ्रस्ज् भूनना । मस्ज्–डूबना । यज्–यज्ञकरना । युज्–जोडना । रुज्–रोगी होना । रञ्ज्–रंगना । विजिर्–अलग करना । स्वञ्ज्–गले लगना । सञ्ज्–मिलना । सृज्–त्याग करना ।

दकारान्त–१६ । अद्–खाना । क्षुद्–कूटना । खिद्–दुःखी होना । छिद्–काटना । तुद्–दुःख देना । नुद्–प्रेरणा करना । पद्य (दिवादि गणका) पद्–जानना । भिद्–तोडना । विद्य (दिवादि) विदहोना । विनद्–(रुधादि गण) विद–विचारना । शद्–मुरझाना-व नष्ट होना । सद्–जाना । स्विद्य (दिवादि गणका) स्विद्–पसीजना । स्कन्द्–जाना, सूखना, सुखाना । हद्–मल त्यागना ।

धकारान्त–११ । क्रुध्–क्रोध करना । क्षुध्–भुखाना । बुध्य (दिवादिगणका) बुध्–जानना । बन्ध–बांधना । युध्–लडना । रुध्–रूंधना घेरना । राध्–सिद्ध करना । व्यध्–ताडन करना वा वेधना । शुध्–स्वच्छ होना । साध्–सिद्ध करना । सिध्य (दिवादि गणका) सिध्–पूरा होना ।

नकारान्त–२ । मन्य (दिवादिका) मन्–मानना । हन्–मारना ।

पकारान्त–१३ । आप्–प्राप्त करना वा व्याप्त होना । क्षिप्–फेंकना, छिप्–छूना । तप्–तपना, तिप्–चूना । तृप्य (दिवादि) तृप्–परितुष्ट होना वा तुष्ट करना । दृप्य (दिवादि) दृप्–अभिमानी होना । लिप्–लीपना । लुप्–काटना । वप्–बोना । शप्–शाप देना, शपथकरना । स्वप्–सोना । सृप्–रेंगना ।

भकारान्त–३ । यभ्–मैथुन करना । रभ्–शीघ्रता करना । लभ्–प्राप्त करना ।

मकारान्त–४। गम्–जाना । नम्–नमस्कार करना । यम्–निवृत्त होना । रम्–क्रीडा करना ।

शकारान्त–१०।क्रुश्–ऊँचे स्वरसे रोना।दंश्–डसना वा काटना। दिश्–दान करना । दृश्–देखना । मृश्–स्पर्श करना वा बोध करना। रिश्–रुश्–हिंसा करना । लिश्–घटना । विश्–प्रवेश करना । स्पृश्–छूना ।

षकारान्त–११ । कृष्–आकर्षण करना। त्विष्–चमकना। तुष्–तृप्त होना । द्विष्–द्वेष करना । दुष्–बिगडना । पुष्य (दिवादि) पुष्–पुष्ट करना । पिष्–पीसना । विष्–व्याप्त होना । शिष्–अवशिष्ट करना। शुष्–सुखाना। श्लिष्–आलिंगन करना ।

सकारान्त–२ । घस्–खाना । बस्–वास करना ।

हकारन्त–८ । दह्–जलाना । दिह्–लीपना । दुह्–दुहना । नह्–बांधना । मिह्–सींचना । रुह्–जमना । लिह्–चाटना । वह्–लेजाना ।

मतभेदसे तुदादि गणके तथा चुरादि गणके मध्यमें पठित जो तृप् और दृप् इन दो धातुओंके अनुदात्तत्व वारणके निमित्त उनके उत्तर श्यन् निर्देश किया, जैसे–तृप्यति । दृप्यति ! इस कारण दिवादिगणीय तृप् और दृप् धातु ही अनुदात्त होंगे, उनसे भिन्न गणके नहीं होंगे ।

और भी दिखातेहैं, जैसे–स्विद्–पद्–सिध्, बुध्, मन्, पुष्, श्लिष्–धातुओंके अन्यगणीय निवारणके निमित्त इनके उत्तर श्यन् निर्देश कियाहै, अर्थात् दिवादि गणके जो धातु वही अनुदात्त होंगे, उनसे भिन्न धातु अनुदात्त नहीं होंगे ।

वस् धातु और यु धातुके अन्यगण निवृत्तिके निमित्त शप्लुक्के द्वारा निर्देश कियाहै अर्थात् अदादि गणीय वस् और यु धातु ही अनुदात्त और इससे भिन्न गणके उदात्त होंगे ।

सानुबंध निजिर्, विजिर् और शक्लृ यह तीन धातु अनुदात्त और विद् धातु भी अनुदात्त यह चान्द्र है,दौर्गादिके इष्ट है, भाष्यमें भी देखा जाताहै, किन्तु व्याघ्रभूतिआदि आचार्योंके मतमें विद् धातु अनुदात्त नहीं है ।

रञ्ज्,मस्ज्, अद्, पद्, तुद्, क्षुध्,शुष्, पुष्, शिष् यह नौ धातु व्याघ्रभूत्यादि आचार्योंके मतमें अनुदात्त कहे गए हैं, परन्तु भाष्यमें अनुदात्तत्वेन परिगणित नहीं हैं ।

स्पर्ध संघर्षे। संघर्षः पराभिभवेच्छा। धात्वर्थेनोपसंग्रहादकर्मकः । स्पर्धते ॥

स्पर्द्ध धातु संघर्ष अर्थात् पराभिभवकी इच्छामें जानना, धात्वर्थद्वारा उपसंग्रहके कारण स्पर्द्ध धातु अकर्मक है। स्पर्धते ॥

२२५९ शर्पूर्वाः खयः । ७ । ४ । ६१ ॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते । हलादिः शेषः इत्यस्यापवादः । पस्पर्धे । स्पर्धिता। स्पर्धिष्यते । स्पर्धताम् । अस्पर्धत । स्पर्धेत । स्पर्धिषीष्ट । अस्पर्धिष्ट । अस्पर्धिष्यत ॥ ३ ॥ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च । गाधते । जगाधे ॥ ४ ॥ बाधृ लोडने । लोडनं प्रतिघातः । बाधते ॥५ ॥ नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु ॥ आशिषि नाथ इति वाच्यम् ॥ * ॥ अस्याशिष्येवात्मनेपदं स्यात् । नाथते । अन्यत्र नाथति ॥ ६ ॥ नाधते ॥ ७ ॥ दध धारणे । दधते ॥

२२५९–अभ्याससंबन्धी शर्पूर्वक 'खर्' प्रत्याहार ही शेष रहैं, अन्यका लोप हो । यह सूत्र 'हलादिः शेषः२१७९" इस सूत्रका अपवाद है । पस्पर्द्धे । स्पर्द्धिता । स्पर्द्धिष्यते । स्पर्द्धताम् । अस्पर्द्धत । स्पर्द्धेत । स्पर्द्धिषीष्ट । अस्पर्द्धिष्ट। अस्पर्द्धिष्यत ॥ गाधृ–प्रतिष्ठा, लाभेच्छा और ग्रंथनमें जानना, जैसे–गाधते । जगाधे । बाधृ धातु आलोडन अर्थात् प्रतीघातमें जानना, जैसे–बाधते । नाथृ और नाधृ धातु याचना, उपताप, ऐश्वर्य, और आशीर्वादमें जानना । इन दो धातुओंके ऋकारकी इत्संज्ञा हुई ।

आशीरर्थमें ही नाथ धातु आत्मनेपदी हो * जैसे–नाथते। अन्यार्थमें नाथति । नाधते ॥

दध् धातु धारणमें जानना, जैसे–दधते ॥

२२६० अत एकहल्मध्येऽनादेशादेर्लिटि । ६ । ४ । १२० ॥

लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्य एकारः स्यादभ्यासलोपश्च किति लिटि ॥

२२६०–कित् लिट् परे रहते लिट् निमित्तक आदेशादि न हो, ऐसा जो अङ्ग तदवयव असंयुक्त एक हल्के मध्यमें स्थित अकारके स्थानमें एकार हो और अभ्यासका लोप हो ॥

२२६१ थलि च सेटि । ६ । ४ ।१२१॥

प्रागुक्तं स्यात् । आदेशश्चेह वैरूप्यसंपादक एवाश्रीयते 'शसिदयोः प्रतिषेधवचनाज्ज्ञापकात् । तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव । देधे । देधाते । देधिरे । अतः किम् । दिदिवतुः। तपरः किम् । ररासे । एकेत्यादि किम् । तत्सरतुः । अनादेशादेः किम्। चकणतुः । लिट आदेशविशेषणादिह स्यादेव । नेमिथ । सेहे ॥ ८ ॥ स्कुदि आप्रवणे । आप्रवणमुत्प्लवनमुद्धरणं च ॥

२२६१–इट्के साथ वर्तमान थल् परे रहते तन्निमित्तक(सेट् थल्निमित्तक) आदेशादि न हो ऐसा जो अङ्ग तदवयव असंयुक्त एक हल्के मध्यमें स्थित अकारके स्थानमें एकार हो और अभ्यासका लोप हो । इस स्थलमें आदेश पदसे वैरूप्यसंपादक आदेशका ग्रहण है इस कारण " न शसददवादिगुणानाम्"यह प्रतिषेध भी सार्थक हुआ,उससे यह फल हुआ

कि, प्रकृति जस् और प्रकृति चर्का आदेश होनेपर भी एत्व और अभ्यासका लोप होगा । देभे । देभाते । देभिरे ।

अकारके स्थानमें एकार हो, यह बात कहनेसे 'दिदिवतुः' इस स्थानमें एकार नहीं हुआ ।

'अत्' इसमें तपरकरणके कारण 'ररासे' इस स्थानमें एत्व नहीं हुआ ।

'एकहल्मध्यस्थ' कहनेसे 'तत्सरतुः' इस स्थानमें एत्व नहीं हुआ ।

लिट्निमित्त आदेशादि होनेपर 'चकणतुः' इस स्थानमें एत्व नहीं हुआ ।

लिट्के आदेश विशेषण होनेके कारण इस स्थानमें एत्व हुआ, जैसे-'नेमिथ,' 'सेहे' इस स्थानमें लिट्निमित्त आदेश नहीं है, इस कारण एत्व हुआ ॥

स्कुदि धातुके एकारकी इत्संज्ञा हुई, स्कुदि धातुका आप्रवण अर्थात् उत्प्लवन और उद्धरण अर्थ जानना ॥

२२६२ इदितो नुम् धातोः ।७।१।५८॥

स्कुन्दते । चुस्कुन्दे ॥ ९ ॥ श्विदि श्वैत्ये । अकर्मकः । श्विन्दते । शिश्विन्दे ॥ १० ॥ वदि अभिवादनस्तुत्योः । वन्दते । ववन्दे ॥ ११ ॥ भदि कल्याणे सुखेच । भन्दते । बभन्दे ॥ १२॥ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । मन्दते । ममन्दे ॥ १३ ॥ स्पदि किंचिच्चलने । स्पन्दते । पस्पन्दे ॥ १४ ॥ क्लिदि परिदेवने । शोके इत्यर्थः । सकर्मकः । क्लिन्दते चैत्रम् ॥ चिक्लिन्दे ॥ १५॥ मुद हर्षे । मोदते ॥ १६ ॥ दद दाने । ददते ॥

२२६२-इकारइत्संज्ञक धातुको नुम् हो । स्कुदि-स्कुन्दते । चुस्कुन्दे ॥ श्विदि धातुसे श्वैत्य जानना, यह अकर्मक है, जैसे-श्विन्दते । शिश्विन्दे ॥ वदि धातु अभिवादन और स्तुतिमें जानना, जैसे-वन्दते । ववन्दे ॥ भदि धातु कल्याण और सुखमें जानना, जैसे-भन्दते । बभन्दे ॥ मदि धातु स्तुति, मोद, मद, स्वप्न, कान्ति और गतिमें जानना, जैसे-मन्दते । ममन्दे ॥ स्पदि धातु ईषत् चलनमें जानना, जैसे-स्पन्दते । पस्पन्दे । क्लिदि धातु परिदेवन अर्थात् शोकमें जानना, यह सकर्मक है, जैसे-क्लिन्दते चैत्रम् । चिक्लिन्दे ॥ मुद धातु हर्षमें जानना, जैसे-मोदते ॥ दद धातु दानार्थक है, जैसे-ददते ॥

२२६३ न शसददवादिगुणानाम् ।६।४।१२६॥

शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्य एत्वाभ्यासलोपौ न । ददते । ददाते । ददिरे ॥ १७ ॥ ष्वद स्वर्द आस्वादने । अयमनुभवे सकर्मकः । रुचावकर्मकः ॥

२२६३-शस् धातु, दद् धातु और वकारादि धातुओंके गुण शब्दसे भावित जो अकार उसके स्थानमें एकार और अभ्यासका लोप न हो, जैसे-ददते । ददाते । ददिरे । ष्वद और स्वर्द धातु आस्वादन करनेमें जानना, यह अनुभवार्थमें सकर्मक और रुचि अर्थमें अकर्मक है ॥

२२६४ धात्वादेः षः सः ।६।१।६४॥

धातोरादेः षस्य सः स्यात् । सात्पदाद्योरितिषत्वनिषेधः । अनुस्वदते । सस्वदे ॥ १८ ॥ स्वर्दते । सस्वर्दे ॥ १९॥ उर्द माने क्रीडायां च॥

२२६४-धातुके आदिमें स्थित षकारके स्थानमें स हो । "सात् पदाद्योः २१२३" इस सूत्रसे षत्वका निषेध हुआ, जैसे-अनुस्वदते । सस्वदे । स्वर्दते । सस्वर्दे ॥ उर्द धातु मानार्थक और क्रीडावाचक है ॥

२२६५ उपधायां च । ८ । २ । ७८ ॥

धातोरुपधाभूतयोरेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात् । ऊर्दते । ऊर्दाचक्रे ॥ २० ॥ कुर्द खुर्द गुर्द गुद क्रीडायामेव । कूर्दते । चुकूर्दे ॥ २१ ॥ खूर्दते ॥ २२ ॥ गूर्दते ॥ २३ ॥ गोदते । जुगुदे ॥ २४ ॥ षूद क्षरणे । सूदते । सुषूदे ॥

सेक्-सृप्-सृ-स्तृ-सृज्-स्तृ-स्त्या
न्ये दन्त्याजन्तसादयः ।
एकाचः षोपदेशाः ष्वष्क्-
स्विद्-स्वद्-स्वञ्ज-स्वप-स्मिङः ॥

दन्त्यः केवलदन्त्यो न तु दन्तोष्ठजोपि । ष्वष्कादीनां पृथग्ग्रहणाज्ज्ञापकात् ॥ २५ ॥ ह्राद अव्यक्ते शब्दे । ह्रादते । जह्रादे ॥ २६ ॥ ह्लादी सुखे च । चादव्यक्ते शब्दे । ह्लादते ॥२७॥ स्वाद आस्वादने । स्वादते ॥ २८ ॥ पर्द कुत्सिते शब्दे । गुदरवे इत्यर्थः । पर्दते ॥२९॥ यती प्रयत्ने । यतते । येते ॥ ३० ॥ युतृ जुतृ भासने । योतते । युयुते ॥ ३१ ॥ जोतते । जुजुते ॥३२॥ विथृ वेथृ याचने । विविथे॥३३॥ विवेथे ॥ ३४ ॥ श्रथि शैथिल्ये । श्रन्थते॥३५॥ ग्रथि कौटिल्ये । ग्रन्थते॥३६॥ कत्थ श्लाघायाम् । कत्थते ॥ ३७ ॥ एधादयोऽनुदात्तेतो गताः ॥

अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः ॥ अत सातत्यगमने । अतति॥अत आदेः । आत। आततुः । आतुः॥ लुङि आतिस् ई इति स्थिते॥

२२६५-हल् परे रहते धातुके उपधाभूत रेफ और वकार परे इक्का दीर्घ हो, जैसे-ऊर्दते । ऊर्दाञ्चक्रे। कुर्द, खुर्द, गुर्द, और गुद धातु क्रीडा अर्थमें जानना, जैसे-कूर्दते । चुकूर्दे । खूर्दते । गूर्दते । गोदते । जुगुदे ॥ षूद धातु क्षरण अर्थमें जानना, जैसे-सूदते । सुषूदे ॥

सेक्, सृप्, सृ, स्तृ, सृज्, स्तृ और स्त्यै धातुसे अन्य दन्त्य अजन्त सकारादि एकाच् धातु, ष्वष्क्, स्विद्, स्वद्, स्वञ्ज, स्वप, और स्मिङ् धातु यह षोपदेश हैं । दन्त्य धातुसे केवल

न्त्य धातु ही जानना, ष्वष्कादि धातुके पृथक् ग्रहणके कारण दन्त्योष्ठजका ग्रहण नहीं है ॥

ह्लाद धातु अव्यक्त शब्दमें जानना, जैसे–ह्लादते । जह्लादे ॥ ह्लादी धातु सुख और अव्यक्त शब्द करनेमें जानना, जैसे–ह्लादते ॥ स्वाद धातु आस्वादनमें । पर्द धातु कुत्सित शब्द अर्थात् गुदरवकरनेमें जानना, पर्दते ॥ यति धातु प्रयत्नमें जानना, जैसे–यतते । येते ॥ युतृ और जुतृ धातु भासनार्थमें जानना, जैसे–योतते । युयुते । जोतते । जुजुते ॥ विथृ और वेथृ धातुको याचनार्थमें जानना, जैसे–विविथे । विवेथे ॥ श्रथि धातु शैथिल्यमें जानना, जैसे–श्रन्थते ॥ ग्रथि धातु कौटिल्यमें जानना, जैसे–ग्रन्थते ॥ कत्थ धातु श्लाघामें जानना, जैसे–कत्थते ॥ एधआदि अनुदात्तेत् ३६ धातु कहे गये ।

अब तवर्गान्त ३८ परस्मैपदी धातु कहतेह । अत धातु निरन्तर गमनमें जानना, जैसे--अतति ।"अत आदेः २२४८" इस सूत्रसे अकारको दीर्घ हुआ, जैसे–आत । आततुः । लुङ्में आत+ई+स+ई+त् ऐसा होनेपर–॥

२२६६ इट ईटि ।८।२।२८॥

इटः परस्य सस्य लोपः स्यादीटि परे ॥ सिज़्लोप एकादेशे सिद्धो वाच्यः ॥ * ॥ आतीत् । आतिष्टाम् । आतिषुः ॥

२२६६–ईट् परे रहते इट्के परे जो सकार उसका लोप हो ।

सिच् प्रत्ययका लोप एकादेशमें सिद्ध हो ऐसा कहना चाहिये, * जैसे–आतीत् । आतिष्टाम् । आतिषुः ॥

२२६७ वदव्रजहलन्तस्याचः ।७।२।३॥

वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु । इति प्राप्ते ॥

२२६७–सिच् परे रहते वद धातु, व्रज धातु और हलन्त धातुके अच्को परस्मैपदमें वृद्धि हो । ऐसी प्राप्ति होनेपर–॥

२२६८ नेटि ।७।२।४॥

इडादौ सिचि प्रागुक्तं न स्यात् । मा भवानतीत् । अतिष्टाम् । अतिषुः ॥ १ ॥ चिती संज्ञाने । चेतति । चिचेत । अचेतीत् । अचेतिष्टाम् । अचेतिषुः ॥ २ ॥ च्युतिर् आसेचने । सेचनमार्द्रीकरणम् । आङीषदर्थेभिव्याप्तौ च ॥ इर इत्संज्ञा वाच्या ॥ * ॥ च्योतति।चुच्योत॥

२२६८–इट् आदिमें है जिसके ऐसे सिच् प्रत्यय परे रहते वृद्धि न हो, जैसे–मा भवानतीत् । अतिष्टाम् । अतिषुः । चिती धातु सम्यक् ज्ञानमें है । चेतति । चिचेत । अचेतीत् । अचेतिष्टाम् । अचेतिषुः । च्युतिर् धातुका अर्थ आसेचन अर्थात् आर्द्रीकरण है, आङ् शब्दसे ईषदर्थ और अभिव्यक्ति जानना ।

इर्की इत्संज्ञा हो ऐसा कहना चाहिये * च्योतति । चुच्योत ॥

२२६९ इरितो वा ।३।१।५७॥

इरितो धातोश्च्लेरङ् वा स्यात्परस्मैपदे परे। अच्युतत्–अच्योतीत् ॥ ३ ॥ श्च्युतिर् क्षरणे । श्च्योतति । चुश्च्योत । अश्च्युतत्–अश्च्योतीत् । यकाररहितोप्ययम् । श्चोतति ॥ ४ ॥ मन्थ विलोडने । विलोडनं प्रतीघातः । मन्थति। ममन्थ । यासुटः किदाशिषीति क्त्वादनिदितामिति नलोपः । मथ्यात् ॥ ५ ॥ कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः । इदित्वान्नलोपो न । कुन्थ्यात् । मन्थ्यात् ॥ ९ ॥ षिध गत्याम्। सेधति । सिषेध । सेधिता । असेधीत् । सात्पदाद्योरिति निषेधे प्राप्ते ॥

२२६९–इर् इत्संज्ञक धातुके परे स्थित च्लिके स्थानमें विकल्प करके अङ् आदेश हो, जैसे–अच्युतत्, अच्योतीत् ॥ श्च्युतिर् धातु क्षरण अर्थमें है । श्च्योतति । चुश्च्योत । अश्च्युतत्, अश्च्योतीत् । यकार रहित यही श्चु धातु है । श्चोतति ॥ मन्थ धातु बिलोडन, अर्थात् प्रतीघातार्थमें है । मन्थति । ममन्थ ।

यासुट् प्रत्ययके "किदाशिषि २२१६" इस सूत्रसे कित्वके कारण "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप होकर–मथ्यात् ॥ कुथि, पुथि, लुथि, और मथि धातु हिंसा और सम्यक् क्लेशमें है । इदित्वके कारण नकारका लोप न होगा, जैसे–कुन्थ्यात् । मन्थ्यात् ॥ षिधु धातु गति अर्थमें है । सेधति । सिषेध । सेधिता । असेधीत् । "सात् पदाद्योः २१२३" इस सूत्रसे षत्व निषेध प्राप्त होनेपर ॥

२२७० उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ।८।३।६५॥

उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात् ॥

२२७०–उपसर्गस्थ निमित्तके परे स्थित सुनोति, अर्थात् सु धातु, सू धातु, सो धातु, स्तु धातु, स्तुभ्, स्था, सेनय, सेध, सिच, सञ्ज और स्वञ्ज धातुके सकारके स्थानमें षकार हो ॥

२२७१ सदिरप्रतेः ।८।३।६६॥

प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात् ॥

२२७१–प्रतिभिन्न और उपसर्गके उत्तर सद् धातुके सकारके स्थानमें षकार हो ॥

२२७२ स्तन्भेः ।८।३।६७॥

स्तन्भेः सौत्रस्य सस्य षः स्यात् । योगविभाग उत्तरार्थः । किञ्च, अप्रतेरिति नानुवर्तते । बाहुप्रतिष्टम्भविवृद्धमन्युः ।

२२७२–स्तन्भ धातुके सकारके स्थानमें षकार हो, भिन्न सूत्रकरण उत्तरार्थ है यहां 'अप्रतेः' इस पदकी अनुवृत्ति नहीं होतीहै इसलिये 'बाहुप्रतिष्टम्भविवृद्धमन्युः' इत्यादि स्थलमें प्रतिपूर्वक होनेसे भी षत्व हुआ ॥

२२७३ अवाच्चालम्बनाविदूर्ययोः । ८ । ३ । ६८ ॥

अवात्स्तन्भेरेतयोरर्थयोः षत्वं स्यात् ॥

२२७३–आलम्बन, अर्थात् आश्रय और आविदूर्य्य अर्थात् सामीप्यार्थमें अवपूर्वक स्तन्भ धातुके सकारको षत्व हो॥

२२७४ वेश्च स्वनो भोजने।८।३।६९॥

व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने ॥

२२७४–भोजनार्थमें विपूर्वक और अवपूर्वक स्वन् धातुके सकारको षत्व हो ॥

२२७५ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्।८।३।७०॥

परिनिविभ्यः परेषामेषां सस्य षः स्यात् । निषेधति ॥

२२७५–परिपूर्वक, निपूर्वक और विपूर्वक, सेव, सित, सय, सिव, सह, सुट्, स्तु और स्वञ्ज धातुके सकारको षत्व हो, जैसे–निषेधति ॥

२२७६ प्राक्सितादड्व्यवायेपि । ८ । ३ । ६३ ॥

सेवसितेत्यत्र सितशब्दात्प्राक् ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात् । न्यषेधत् । न्यषेधीत् । न्यषेधिष्यत् ॥

२२७६–"सेवसित २२७५" इस स्थलमें सित शब्दके पूर्वमें जो सुनोति,अर्थात् सु इत्यादि धातुहैं उनके अड् व्यवधान रहनेपर भी सकारको षत्व हो, जैसे–न्यषेधत् । न्यषेधीत् । न्यषेधिष्यत् ॥

२२७७ स्थादिष्वभ्यासेन चाभ्यासस्य । ८ । ३ । ६४ ॥

प्राक् सितात् स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात्। एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम् । निषिषेध । निषिषिधतुः ॥ १० ॥

२२७७–सित शब्दके पूर्ववर्त्ती स्था आदि धातुओंके सकारको अभ्याससे व्यवहित होनेपर भी षत्व हो, इनका ही अभ्यासके व्यवधानमें षत्व होगा सुनोत्यादि धातुओंको तो नहीं, जैसे–निषिषेध । निषिषिधतुः ॥

२२७८ सेधतेर्गतौ ।८।३।११३ ॥

गत्यर्थस्य सेधतेः षत्वं न स्यात् । गङ्गां विसेधति ॥ ११ ॥ षिधू शास्त्रे माङ्गल्ये च । शास्त्रं शासनम् ॥

२२७८–गत्यर्थक सिध् धातुके सकारको षत्व न हो,जैसे–गंगां विसेधति । षिधू धातु शास्त्र (शासन) और माङ्गल्य अर्थमें है ॥

२२७९ स्वरतिसूतिसूयतिधूञूदितो वा । ७ । २ । ४४ ॥

स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्वा स्यात् ॥

२२७९–स्वरति, अर्थात् स्वृ धातु, सू, सूञ्, धूञ् और ऊकार इत्संज्ञक धातुओंके परे स्थित वलादि आर्धधातुक को विकल्प करके इट् हो ॥

२२८० झषस्तथोर्धोऽधः ।८।२।४०॥

झषः परयोस्तथयोर्धः स्यान्न तु दधातेः । जश्त्वम् । सिषेद्ध–सिषेधिथ । सेद्धा–सेधिता । सेत्स्यति–सेधिष्यति । असैत्सीत् ॥

२२८०–झष्के परे स्थित तकार और थकारके स्थानमें ध आदेश हो, परन्तु धाञ् धातुके न हो, जश्त्व होकर सिषेद्ध । सिषेधिथ । सेद्धा, सेधिता । सेत्स्यति, सेधिष्यति । असैत्सीत् ॥

२२८१ झलो झलि । ८ । २ । २६ ॥

झलः परस्य सस्य लोपः स्यात् झलि। असैद्धाम् । असैत्सुः । असैत्सीः । असैद्धम् । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । पक्षे असेधीत् । असेधिष्टामित्यादि ॥ १२ ॥ खादृ भक्षणे । ऋकार इत् । खादति । चखाद ॥ १३ ॥ खद स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थैर्ये अकर्मकः । खदति ॥

२२८१–झल् परे रहते झल्के परे स्थित सकारका लोप हो, जैसे–असैद्धाम् । असैत्सुः । असैत्सीः । असैद्धम् । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । पक्षमें–असेधीत् । असेधिष्टाम्, इत्यादि ॥ खादृ धातु भक्षणार्थमें है । ऋकारकी इत्संज्ञा हुई, जैसे–खादति । चखाद ॥ खद् धातु हिंसा, ऐश्वर्य और चकारसे भक्षणार्थमें जानना । स्थैर्य्यार्थमें अकर्मक है, खदति ॥

२२८२ अत उपधायाः ।७।२।११६॥

उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । चखाद ॥

२२८२–ञित् और णित् प्रत्यय परे रहते धातुके उपधाभूत अकारको वृद्धि हो, जैसे–चखाद ॥

२२८३ णलुत्तमो वा । ७ । १ । ९१ ॥

उत्तमो णल्वा णित्स्यात् । चखाद–चखद ॥

२२८३–उत्तमसंज्ञक णल् विकल्प करके णित् हो, जैसे–चखाद, चखद ॥

२२८४ अतो हलादेर्लघोः ।७।२।७॥

हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात् ।अखादीत्–अखदीत् १४॥

वद स्थैर्ये। पवर्गीयादिः। बदति। बबाद। बेदतुः। बेदिथ। बबाद-बबद। अबादीत्-अबदीत् ॥१५॥ गद व्यक्तायां वाचि। गदति॥

२२८४-इडादि सिच् परे रहते परस्मैपदमें हलादि धातुके लघुसंज्ञक अकारको विकल्प करके वृद्धि हो, जैसे-अबादीत्, अबदीत्॥ बद् धातु स्थैर्य अर्थमें है यह धातु पवर्गीयादि है। बदति। बबाद। बेदतुः। बेदिथ। बबाद, बबद। अबादीत्, अबदीत्। गद् धातु व्यक्तवचन अर्थमें जानना। गदति॥

२२८५ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। ८। ४। १७॥

उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद् गदादिषु। प्रणिगदति। जगाद॥ १६॥ रद विलेखने। विलेखनं भेदनम्। रराद। रेदतुः॥१७॥ णद अव्यक्ते शब्दे॥

२२८५-उपसर्गस्थ निमित्तके परे स्थित नि उपसर्गके नकारको णत्व हो गद, नद, पत, पद्, घु, संज्ञक मा, सो, हन्, या, वा, द्रा, प्सा, वप, वह, शम्, चि और दिह धातु परे रहते, जैसे-प्रणिगदति। जगाद॥ रद् धातु विलेखन, अर्थात् भेद करनेमें है। रराद। रेदतुः॥ णद् धातु अव्यक्त शब्द करनेमें है॥

२२८६ णो नः। ६। १। ६५॥

धातोरादेर्णस्य नः स्यात्।

णोपदेशास्त्वनर्द्-नाटि-नाथ्-नाध्-नन्द्-नक्क-नॄ-नृतः।

नाटेर्दीर्घोऽहस्य पर्युदासाद्घटादिर्णोपदेश एव तवर्गचतुर्थान्तनाधतेर्नॄनन्द्योश्च केचिण्णोपदेशतामाहुः॥

२२८६-धातुके आदिमें स्थित णकारके स्थानमें नकार हो। नर्द्, नाटि, नाथ, नाध्, नन्द्, नक्क, नॄ और नृत् धातु भिन्न धातु णोपदेश हैं। दीर्घाई नाटि धातुके पर्युदासके कारण घटादि का धातु णोपदेश ही है। कोई २ कहतेहैं कि, तवर्गके चतुर्थ वर्णान्त, अर्थात् धकारान्त नाध् धातु और नॄ धातु और नन्द धातु णोपदेश है॥

२२८७ उपसर्गादसमासेपि णोपदेशस्य। ८। ४। १४॥

उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेपि। प्रणदति। प्रणिनदति॥ १८॥ अर्द गतौ याचने च। अत आदेः॥

२२८७-समास होनेपर अथवा न होनेपर भी उपसर्गस्थ निमित्तके परे स्थित णोपदेश धातुके नकारको णत्व हो, जैसे-प्रणदति। प्रणिनदति। अर्द धातु गति और याचन अर्थमें है। "अत आदेः २२४८" यह सूत्र लगकर-॥

२२८८ तस्मान्नुड् द्विहलः। ७। ४। ७१॥

द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनर्द। आर्दीत्॥ १९॥ नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति॥२०॥ गर्दति। जगर्द॥ २१॥ तर्द हिंसायाम्। तर्दति॥ २२॥ कर्द कुत्सिते शब्दे। कुत्सिते कौक्षे। कर्दति॥ २३॥ खर्द दन्दशूके। दंशहिंसादिरूपायां दन्दशूकक्रियायामित्यर्थः। खर्दति। चखर्द॥ २४॥ अति अदि बन्धने। अन्तति। आनन्त॥ २५॥ अन्दति। आनन्द॥ २६॥ इदि परमैश्वर्ये। इन्दति। इन्दाञ्चकार॥ २७॥ बिदि अवयवे। पवर्गतृतीयादिः। बिन्दति अवयवं करोतीत्यर्थः। भिदीति पाठान्तरम्॥२८॥ गडि वदनैकदेशे। गण्डति। अन्तत्यादयः पञ्चैते न तिङ्विषया इति काश्यपः। अन्ये तु तिङमपीच्छन्ति॥ २९॥ णिदि कुत्सायाम्। निन्दति। प्रणिन्दति॥३०॥ टुनदि समृद्धौ॥

२२८८-दो हल्युक्त धातुके दीर्घीभूत अकारके उत्तर नुट्का आगम हो, जैसे-आनर्द। आर्दीत्। नर्द् और गर्द धातु शब्द करनेमें हैं। इस स्थलमें णोपदेशत्वाभावके कारण णत्व नहीं होगा, जैसे-प्रनर्दति। गर्दति। जगर्द॥ तर्द् धातु हिंसा अर्थमें है। तर्दति। कर्द् धातु कुत्सित कौक्ष शब्दमें है। कर्दति॥ खर्द् धातु दन्दशूक, अर्थात् दंशहिंसादिरूप दंदशूकक्रियामें है। खर्दति। चखर्द॥ अति और अदि धातु बंधनमें है। अन्तति। आनन्त। अन्दति। आनन्द॥ इदि धातु परमैश्वर्यमें है। इन्दति। इन्दाञ्चकार॥ बिदि धातु अवयवमें है, यह पवर्गीय बकारादि है। बिन्दति, अर्थात् अवयव करताहै। कोई २ बिदि धातुके स्थानमें 'भिदि' ऐसा पाठान्तर कहतेहैं॥ गडि धातु वदनका एकदेश अर्थमें है। गण्डति॥ अन्तति आदि पांच धातु तिङ्विषयक नहीं हैं, यह काश्यपका मत है, दूसरे तो तिङ् भी इच्छा करतेहैं॥ णिदि धातु कुत्सामें है। निन्दति। प्रणिन्दति॥ टुनदि धातु समृद्धि अर्थमें है॥

२२८९ आदिर्ञिटुडवः। १। ३। ५॥

उपदेशे धातोराद्या एते इतः स्युः। नन्दति। इदित्वान्नलोपो न। नन्द्यात्॥ ३१॥ चदि आह्लादे। चनन्द॥ ३२॥ त्रदि चेष्टायाम्। तत्रन्द॥ ३३॥ कदि क्रदि क्लदि आह्वाने रोदने च। चकन्द॥ ३४॥ चक्रन्द॥ ३५॥ चक्लन्द॥ ३६॥ क्लिदि परिदेवने। चिक्लिन्द॥ ३७॥ शुन्ध शुद्धौ। शुशुन्ध। नलोपः। शुध्यात्॥३८॥

२२८९-उपदेशावस्थामें धातुके आदिमें स्थित ञि, टु, डु की इत्संज्ञा हो, इससे टुकी इत्संज्ञा होनेपर नन्दति। इदित् होनेके कारण नकारका लोप नहीं हुआ, जैसे-नन्द्यात्॥

चदि धातु आह्लाद अर्थमें है। चचन्द ॥ त्रदि धातु चेष्टा अर्थमें है। तत्रन्द ॥ कदि क्रदि और क्लदि धातु आह्वान और रोदन अर्थमें है। चकन्द। चक्रन्द। चक्लन्द ॥ क्लिदि धातु परिवेदन अर्थमें है। चिक्लिन्द ॥ शुन्ध धातु शुद्धि अर्थमें है। शुशुन्ध। नकारका लोप होकर—शुध्यात्।

अथ कवर्गीयान्ता अनुदात्तेतो द्विचत्वारिंशत्। शीकृ सेचने। तालव्यादिः। दन्त्यादिरित्येके। शीकते। शिशीके ॥ १ ॥ लोकृ दर्शने। लोकते। लुलोके ॥ २ ॥ श्लोकृ संघाते। संघातो ग्रन्थः। स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा। आद्ये अकर्मको द्वितीये सकर्मकः। श्लोकते ॥ ३ ॥ द्रेकृ ध्रेकृ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं च। दिद्रेके ॥ ४ ॥ दिध्रेके ॥५॥ रेकृ शंकायाम् रेकते ॥ ६ ॥ सेकृ स्रेकृ स्रकि श्रकि श्लकि गतौ। त्रयो दन्त्यादयः द्वौ तालव्यादी। अषोपदेशत्वान्न षः। सिसेके ॥ ११ ॥ शकि शंकायाम्। शंकते। शशंके ॥ १२ ॥ अकि लक्षणे। अंकते। आनंके ॥ १३ ॥ वकि कौटिल्ये। वंकते ॥१४॥ मकि मण्डने। मंकते ॥ १५ ॥ कक लौल्ये। लौल्यं गर्वश्चापल्यं च। ककते। चकके ॥१६॥ कुक वृक आदाने। कोकते। चुकुके ॥ १७ ॥ वर्कते ॥ ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन ॥ * ॥ ववृके ॥ १८ ॥ चक तृप्तौ प्रतिघाते च। चकते। चेके ॥ १९ ॥ ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः ॥ कंकते। डुढौके। तुत्रौके ॥ सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः ॥ * ॥ ष्वष्कते। षष्वष्के। अत्र तृतीयोदन्त्यादिरित्येके ॥ लघि भोजननिवृत्तावपि ॥ ३५ ॥ अघि वघि मघि गत्याक्षेपे। आक्षेपो निन्दा। गतौ गत्यारम्भे चेत्यन्ये। अंघते। आनंघे। वंघते। मंघते। मघि कैतवे च ॥३८॥ राघृ लाघृ द्राघृ सामर्थ्ये। राघते॥३९॥ लाघते ॥ ४० ॥ ध्राघृ इत्यपि केचित्। द्राघृ आयामे च। आयामो दैर्घ्यम् ॥ द्राघते ॥४१॥ श्लाघृ कत्थने। श्लाघते ॥ ४२ ॥

अब कवर्गान्त आत्मनेपदी ४२ धातु कहतेहैं। शीकृ धातु सेचनमें है, यह तालव्यादि है, कोई २ कहतेहैं कि, यह दन्त्यादि है। शीकते। शिशीके। लोकृ धातु अवलोकन अर्थमें है। लोकते। लुलोके ॥ श्लोकृ धातु संघात अर्थमें है, अर्थात् ग्रन्थमें वह इस स्थलमें ग्रथ्यमानका व्यापार अथवा ग्रन्थकर्त्ताका व्यापार है। प्रथमार्थमें अकर्मक और दूसरे अर्थमें सकर्मक है। श्लोकते ॥ द्रेकृ और ध्रेकृ धातु शब्द और उत्साह अर्थमें है, उत्साह शब्दसे वृद्धि और औद्धत्य जानना। दिद्रेके। दिध्रेके ॥ रेकृ धातु शंकामें है। रेकते ॥ सेकृ, स्रेकृ, स्रकि और श्लकि धातु गति अर्थमें है, इनके मध्यमें तीन धातु दन्त्यादि और दो धातु तालव्यादि हैं। अषोपदेशत्वके कारण षत्व नहीं होगा, जैसे—सिसेके ॥ शकि धातु शंकामें है। शंकते। शशंके ॥ अकि धातु लक्षण अर्थमें है। अंकते। आनङ्के ॥ वकि धातु कुटिलतामें है। वंकते ॥ मकि धातु मण्डनमें है। मंकते ॥ कक धातु लौल्य, अर्थात् गर्व और चपलतामें है। ककते। चकके। कुक और वृक् धातु आदान अर्थात् ग्रहणार्थमें है। कोकते। चुकुके। वर्कते।

ऋकारोपध धातुके उत्तर लिट्को गुण और पूर्वविप्रतिषेधसे कित्त्व हो * इससे गुणके पहले कित्त्व होनेके कारण गुण न होकर ववृके।

चक् धातु तृप्ति और प्रतिघातमें है। चकते। चेके ॥ ककि, वकि, श्वकि, त्रकि, ढौकृ, त्रौकृ, ष्वष्क, वस्क, मस्क, टिकृ, टीकृ, तिकृ, तीकृ, रघि और लघि यह सब धातु गत्यर्थक हैं। कंकते। डुढौके। तुत्रौके।

सुब्धातु (नामधातु) ष्ठिवु और ष्वष्क धातुके षकारको सत्व न हो * ष्वष्कते। षष्वष्के। यहां किसी २ ने तीसरी धातुको अर्थात् ष्वष्क धातुको दन्त्य सकारादि कहाहै। लघि धातु भोजननिवृत्ति अर्थमें भी जानना ॥ अघि, मघि और वघि धातु गतिके आक्षेपमें है आक्षेप शब्दसे निन्दा जानना। कोई २ कहतेहैं कि, यह गति और गतिका आरम्भ इन दो अर्थोंमें है। अंघते। आनंघे। वंघते। मंघते ॥ मघि धातु कैतव अर्थात् कपटमें है ॥ राघृ, लाघृ और द्राघृ धातु सामर्थ्यमें है। राघते। लाघते। कोई २ कहतेहैं कि, ध्राघृ धातु भी उक्तार्थक है ॥ द्राघृ, धातु आयाम अर्थात् दैर्घ्य अर्थमें है। द्राघते ॥ श्लाघृ धातु कत्थन अर्थात् आत्मगुणाविष्करण अर्थमें है। श्लाघते ॥

अथ परस्मैपदिनः पञ्चाशत्। फक्क नीचैर्गतौ। नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च। फक्कति। पफक्क ॥ १ ॥ तक हसने। तकति ॥२॥ तकि कृच्छ्रजीवने। तंकति ॥३॥ बुक्क भषणे। भषणं श्वरवः। बुक्कति ॥ ४ ॥ कखे हसने। प्रनिकखति ॥ ९ ॥ ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः। ओखति। ओखांचकार ॥ १० ॥ शाखृ श्लाखृ व्याप्तौ। शाखति ॥१२॥ उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश। यान्तास्त्रयोदश। इह खान्तेषु रिख त्रख त्रिखि शिखि इत्यपि चतुरः केचित्पठन्ति ॥

अब परस्मैपदी ५० धातु कहते हैं—फक्क धातु नीच गति अर्थात् मंद २ गमन और असद्व्यवहारमें है। फक्कति। पफक्क ॥ तक धातु हसनमें है। तकति ॥ तकि धातु कष्टसे जीवनधारण करनेमें है। तंकति ॥ बुक्क धातु भषण, अर्थात्

कुत्तेकी ध्वनिमें है। बुक्कति ॥ कख धातु हसनमें है। प्रति-कखति। ओखृ, राखृ, लाखृ, दाखृ और ध्राखृ, धातु शोषण और अलमर्थमें है। ओखति। ओखाञ्चकार ॥ शाखृ और श्लाखृ धातु व्याप्ति अर्थमें है। शाखति ॥ उख, उखि, वख, वखि, मख, मखि, णख, णखि, रख, रखि, लख, लखि, इख, इखि, ईखि, वल्ग, रगि, लगि, अगि, वगि, मगि, तगि, त्वगि, श्रगि, श्लगि, इगि, रिगि और लिगि धातु गत्यर्थमें हैं, इनमें कवर्ग द्वितीयान्त, अर्थात् खकारान्त १५ धातु और गकारान्त १३ धातु हैं। इनके अतिरिक्त खकारान्तमें रिख, त्रख, त्रिखि, शिखि यह चार धातु भी कोई २ पढतेहैं ॥

२२९० अभ्यासस्याऽसवर्णे।६।४।७८॥

अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि। उवोख। संनिपातपरिभाषया इजादेरित्याम्न। ऊखतुः। ऊखुः। इह सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद्धस्वः प्राप्तो न भवति सकृत्प्रवृत्तत्वात्। आङ्गत्वाद्दि पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः। वार्णादाङ्गं बलीय इति न्यायात्परत्वाच्च। उङ्गति। ववखतुः। वङ्गति। मेखतुः॥त्वगि कम्पने च॥४४॥ युगि जुगि बुगि वर्जने। युङ्गति ॥ ४७ ॥ घघ हसने। घघति। जघाघ ॥ ४८ ॥ मघि मण्डने। मंघति ॥ ४९ ॥ शिघि आघ्राणे। शिंघति॥५०॥

२२९०-असवर्ण अच् वर्ण परे रहते अभ्याससम्बन्धी इवर्णके स्थानमें इयङ् और उवर्णके स्थानमें उवङ् आदेश हो, जैसे-उवोख। सन्निपातपरिभाषासे "इजादेः० २२३७" इस सूत्रसे आम् प्रत्यय नहीं हुआ। ऊखतुः। ऊखुः, इस स्थलमें अभ्यासके ग्रहणसे सवर्णदीर्घके ग्रहणके कारण ह्रस्वकी प्राप्ति हुई, परन्तु सकृत् प्रवृत्तत्वके कारण वह नहीं हुई, जो कहो कि, पूर्वोपस्थित निमित्तके कारण दीर्घको अन्तरङ्ग होनेसे पहले दीर्घ ही होगा वह नहीं कह सकते हो कारण कि, आङ्गत्वके कारण "वार्णादाङ्गं बलीयः" इस न्यायसे और परत्वके कारण पर्जन्यवत् लक्षण प्रवृत्तिसे ह्रस्व होनेपर पश्चात् दीर्घ होगा। उंखति। ववखतुः। वंखति। मेखतुः ॥ त्वगि धातु कम्पन अर्थमें है। युगि, जुगि और बुगि धातु वर्जनमें है। युङ्गति। घघ धातु हसनमें है। घघति। जघाघ ॥ मघि धातु मंडन अर्थात् भूषणमें है। मंघति ॥ शिघि धातु आघ्राणमें है। शिंघति ॥

अथ चवर्गीयान्ताः। तत्रानुदात्तेत एकविंशतिः। वर्च दीप्तौ। वर्चते ॥ १ ॥ षच सेचने सेवने च। सचते। सेचे। सचिता ॥२॥ लोचृ दर्शने। लोचते। लुलोचे ॥ ३ ॥ शच व्यक्तायां वाचि। शेचे ॥ ४ ॥ श्वच श्वचि गतौ। श्वचते। श्वञ्चते ॥ ६ ॥ कच बन्धने। कचते ॥ ७ ॥ कचि काचि दीप्तिबन्धनयोः। चकञ्चे। चकाञ्चे ॥ ९ ॥ मच मुचि कल्कने। कल्कनं दम्भः शाठ्यं च। कथनमित्यन्ये। मेचे। मुमुञ्चे॥११॥ मचि धारणोच्छ्रायपूजनेषु। ममञ्चे॥१२॥पचि व्यक्तीकरणे पञ्चते ॥ १३ ॥ ष्टुच प्रसादे। स्तोचते। तुष्टुचे॥१४॥ ऋज गतिस्थानार्जनोपार्जनेषु॥ अर्जते। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वान्नुट्। आनृजे ॥ १५ ॥ ऋजि भृजी भर्जने। ऋञ्जते। उपसर्गादृतीति वृद्धिः। प्रार्ञ्जते। ऋञ्जाञ्चक्रे। आर्ञ्जिष्ट॥१६॥ भर्जते। बभृजे।अभर्जिष्ट ॥१७॥ एजृ भ्रेजृ भ्राजृ दीप्तौ। एजांचक्रे ॥ २० ॥ ईज गतिकुत्सनयोः। ईजांचक्रे ॥ २१ ॥

अब चवर्गीयान्त धातु कहतेहैं, उनमें अनुदात्तेत् २१ धातु हैं। वर्च धातु दीप्तिमें है। वर्चते ॥ षच धातु सेवन और सेचन अर्थमें है। सेचते। सेचे। सचिता। लोचृ धातु दर्शन करनेमें है। लोचते। लुलोचे ॥ शच धातु स्पष्ट वचनमें है। शेचे। श्वच और श्वचि धातु गति अर्थमें है। श्वचते। श्वञ्चते ॥ कच धातु बंधन अर्थमें है। कचते ॥ कचि और काचि धातु दीप्ति और बंधन अर्थमें हैं। चकञ्चे। चकाञ्चे ॥ मच धातु और मुचि धातु कल्कन, अर्थात् दम्भ, शाठ्य और किसी २ के मतमें कथनमें भी है। मेचे। मुमुञ्चे ॥ मचि धातु धारण उच्छ्राय और पूजा करनेमें है। ममञ्चे ॥ पचि धातु व्यक्तीकरण अर्थमें है। पंचते ॥ ष्टुच धातु प्रसादमें है। स्तोचते। तुष्टुचे ॥ ऋज धातु गति, स्थानार्जन और उपार्जन अर्थमें है। अर्जते।

नुड्विधिमें ऋकारैकदेश रेफ हल्त्वसे गृहीत होताहै। इस कारण द्विहल्त्व होनेसे उसके उत्तर नुट् आगम होकर आनृजे॥ ऋजि और भृजी धातु भर्जन अर्थमें है। ऋञ्जते। "उपसर्गादृति० ७४" इस सूत्रसे वृद्धि होकर, प्रार्ञ्जते। ऋञ्जाञ्चक्रे। आर्ञ्जिष्ट। भर्जते। बभृजे। अभर्जिष्ट ॥ एजृ, भ्रेजृ और भ्राजृ धातु दीप्ति अर्थमें है। एजाञ्चक्रे। ईज धातु गति और कुत्सन अर्थमें है। ईजाञ्चक्रे ॥

अथ व्रिसप्ततिव्रजन्ताः परस्मैपदिनः ॥ शुच शोके। शोचति ॥ १ ॥ कुच शब्दे तारे। कोचति ॥ २॥ कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः। अनिदितामिति नलोपः। कुच्यात् ॥ ३ ॥ क्रुच्यात् ॥४॥ लुञ्च अपनयने। लुच्यात् ॥ ५ ॥ अञ्चु गतिपूजनयोः। अच्यात्। गतौ नलोपः। पूजायां तु। अञ्च्यात् ॥ ६ ॥ वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुचीत्। अम्लुचीत् ॥

अब व्रज धातु पर्यन्त ७२ धातु परस्मैपदी हैं। शुच धातु शोक करनेमें है। शोचति ॥ कुच धातु ऊंचे स्वरसे शब्द करनेमें है। कोचति। कुञ्च क्रुञ्च धातु कौटिल्य और अल्पी-

भावमें है। "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप होकर कुच्यात्। क्रुच्यात्। लुञ्च धातु अपनयन अर्थमें है। लुच्यात्॥ अञ्चु धातु गति और पूजा अर्थमें है। गत्यर्थमें नकारका लोप होकर, अच्यात्। पूजार्थमें नकारका लोप न होनेसे, अञ्च्यात्। वञ्चु, चञ्चु, तञ्चु, त्वञ्चु, म्रुञ्चु, म्लुञ्चु, म्रुचु और म्लुचु धातु गत्यर्थक हैं। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुञ्चीत्। अम्लुञ्चीत्॥

२२९१ जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च। ३। १। ५८॥

एभ्यश्च्लेरङ् वा स्यात्। अम्रुचत्-अम्रोचीत्। अम्लुचत्-अम्लोचीत् ॥ १४ ॥ ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे। जुग्रोच। अग्रुचत्-अग्रोचीत्। जुग्लोच। अग्लुचत्-अग्लोचीत्। अकोजीत्। अखोजीत्॥ १८॥ ग्लुञ्चु षस्ज गतौ। अङ्। अग्लुचत्-अग्लुञ्चीत्॥ १९॥ सस्य श्चुत्वेन शः। जश्त्वेन जः। सज्जति। अयमात्मनेपद्यपि। सज्जते ॥ २० ॥ गुजि अव्यक्ते शब्दे। गुञ्जति। गुञ्ज्यात् ॥ २१ ॥ अर्च पूजायाम्। आनर्च ॥ २२ ॥ म्लेछ अव्यक्ते शब्दे। अस्फुटेऽपशब्दे चेत्यर्थः। म्लेच्छति। मिम्लेच्छ॥ २३॥ लछ लाछि लक्षणे। ललच्छ ॥ २४ ॥ ललाञ्छ ॥ २५ ॥ वाछि इच्छायाम्। वाञ्छति॥ २६॥ आछि आयामे। आञ्छति। अत आदेरित्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थम्। तेन दीर्घाभावान्न नुट्। आञ्छ। तपरकरणं मुखसुखार्थमिति मते तु नुट्। आनाञ्छ ॥ २७ ॥ ह्रीछ लज्जायाम्। जिह्रीच्छ ॥ २८ ॥ हुर्छा कौटिल्ये। कौटिल्यमपसरणमिति मैत्रेयः। उपधायां चेति दीर्घः। हूर्छति ॥ २९ ॥ मुर्छा मोहसमुच्छ्राययोः। मूर्छति ॥ ३० ॥ स्फुर्छा विस्तृतौ। स्फूर्छति ॥ ३१ ॥ युच्छ प्रमादे। युच्छति ॥ ३२ ॥ उछि उञ्छे। उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः। उञ्छति। उञ्छांचकार ॥ ३३ ॥ उछी विवासे। विवासः समाप्तिः। प्रायेणायं विपूर्वः। व्युच्छति ॥ ३४ ॥ ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ। ध्रजति। ध्रञ्जति। धर्जति। धृञ्जति। ध्वजति। ध्वञ्जति ॥ ४० ॥ कूज अव्यक्ते शब्दे। चुकूज ॥ ४१ ॥ अर्ज षर्ज अर्जने। अर्जति। आनर्ज ॥ ४२ ॥ सर्जति। ससर्ज ॥ ४३ ॥ गर्ज शब्दे। गर्जति ॥ ४४ ॥ तर्ज भर्त्सने। तर्जति ॥ ४५ ॥ कर्ज व्यथने। चकर्ज ॥ ४६ ॥ खर्ज पूजने च। चखर्ज ॥ ४७ ॥ अज गतिक्षेपणयोः। अजति ॥

२२९१—जॄ, स्तम्भु, म्रुचु, म्लुचु, ग्रुचु, ग्लुचु, ग्लुञ्चु और श्वि धातुके उत्तर च्लिके स्थानमें विकल्प करके अङ् हो, जैसे—अम्रुचत्, अम्रोचीत्। अम्लुचत्, अम्लोचीत्। ग्रुचु, ग्लुचु, कुजु और खुजु धातु चौर्य करनेमें हैं। जुग्रोच। अग्रुचत्, अग्रोचीत्। जुग्लोच। अग्लुचत्, अग्लोचीत्। अकोजीत्। अखोजीत्॥ ग्लुञ्चु और षस्ज धातु गतिमें हैं। विकल्प करके अङ् होकर अग्लुचत्, अग्लुञ्चीत्। श्चुत्वके कारण सस्ज धातुके सके स्थानमें श और जश्त्वके कारण शके स्थानमें ज होकर—सज्जति। यह षस्ज धातु आत्मनेपद भी है। सज्जते॥ गुजि धातु अव्यक्त शब्द करनेमें है। गुञ्जति। गुञ्ज्यात्॥ अर्च धातु पूजा करनेमें है। आनर्च॥ म्लेछ धातु अव्यक्त (अस्फुट) और शब्द (अपशब्द) अर्थमें है। म्लेच्छति। मिम्लेच्छ॥ लछ और लाछि धातु लक्षणमें हैं। ललच्छ। ललाञ्छ। वाछि धातु इच्छा अर्थमें है। वाञ्छति॥ आछि धातु आयाम अर्थमें है। आञ्छति।

"अत आदेः २२४८" इस सूत्रमें तपरकरण स्वाभाविक ह्रस्व परिग्रहार्थ है, अत एव दीर्घाभावके कारण नुट् न होकर आञ्छ। तपरकरण मुखसुखार्थ है, इस मतमें तो नुट् होगा, आनाञ्छ॥ ह्रीछ धातु लज्जा अर्थमें है। जिह्रीच्छ॥ हुर्छा धातु कौटिल्य अर्थमें है। मैत्रेय मुनिके मतमें कौटिल्य शब्दसे अपसरण समझना। "उपधायाञ्च २२६५" इस सूत्रसे उपधाको दीर्घ होकर—हूर्छति॥ मूर्छा धातु मोह और समुच्छ्राय अर्थमें है॥ मूर्छति॥ स्फुर्छा धातु विस्तृत अर्थमें है। स्फूर्छति युच्छ धातु प्रमादमें है। युच्छति॥ उछि धातु उञ्छ अर्थात् शस्यादिको (कण २) ग्रहण करनेमें, यह यादवका मत है। उञ्छति। उञ्छाञ्चकार॥ उछी धातु विवास अर्थात् समाप्ति अर्थमें है। यह धातु प्रायःसे विपूर्वक है, जैसे—व्युच्छति॥ ध्रज, ध्रजि, धृज, धृजि, ध्वज और ध्वजि धातु गमन करनेमें हैं। ध्रजति। ध्रञ्जति। धर्जति। धृञ्जति। ध्वजति। ध्वञ्जति॥ कूज धातु अव्यक्त शब्द करनेमें है। चुकूज॥ अर्ज और षर्ज धातु अर्जन करनेमें हैं। अर्जति। सर्जति। ससर्ज॥ गर्ज धातु शब्द करनेमें है। गर्जति॥ तर्ज धातु भर्त्सन करनेमें है॥ कर्ज धातु व्यथन अर्थमें है। चकर्ज। खर्ज धातु पूजन अर्थमें है। चखर्ज॥ अज धातु गति और क्षेपण करनेमें है। अजति॥

२२९२ अजेर्व्यघञपोः। २। ४। ५६॥

अजेर्वी इत्ययमादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा॥ वलादावार्धधातुके वेष्यते॥ ॥ विवाय। विव्यतुः। विव्युः। अत्र वकारस्य हल्परत्वादुपधायां चेति दीर्घे प्राप्तेऽचः परस्मिन्निति स्थानिवद्भावेनाज्परत्वम्। न च न पदान्तेति निषेधः॥ स्वरदीर्घयलोपेषु लोपा-

जादेश एव न स्थानिवदित्युक्तेः ॥ थलि एकाच इतीण्निषेधे प्राप्ते ॥

२२९२-अज धातुके स्थानमें आर्धधातुकविषयमें वि आदेश हो, घञ् और अप् परे रहते न हो ।

वलादि आर्धधातुक परे रहते विकल्प करके आदेश इष्ट है* विवाय । विव्यतुः । विव्युः ।

इस स्थलमें वकारके हल्परत्वके कारण "उपधायाश्च २२६५" इस सूत्रसे दीर्घ प्राप्त हुआ, परन्तु "अचः परस्मिन् ५०" इस सूत्रसे स्थानिवद्भावके कारण अच्परत्व होनेसे नहीं हुआ "न पदान्त० ५१" इस सूत्रसे स्थानिवद्भावका निषेध तो नहीं हो सकताहै क्योंकि, स्वर, दीर्घ और यलोपविधि कर्त्तव्य रहते लोपरूप अजादेश ही स्थानिवत् नहीं हो, ऐसा कहा है । थल् परे "एकाचः २२४६" इस सूत्रसे इण्निषेधकी प्राप्ति होनेपर ॥

२२९३ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि । ७ । २ । १३ ॥

एभ्यो लिट इण्न स्यात् । क्रादीनां चतुर्णां ग्रहणं नियमार्थम् । प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिण्निषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति । ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य चेटो निषेधार्थम् ॥

२२९३-कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, श्रु, धातुओंके उत्तर लिट्को इट् न हो, कृ आदि चार धातुओंका ग्रहण नियमार्थ है कि, यदि प्रकृत्याश्रय अथवा प्रत्ययाश्रय जितने इण्निषेध हैं वह लिट् लकारमें हों तो कृ आदि धातुओंके उत्तर ही हों, अन्यके उत्तर नहीं । अनन्तर स्तु आदि चार धातुओंका ग्रहण थल् परे रहते भारद्वाजनियमप्रापित और व, म आदिमें क्रादिनियमप्राप्ति इट्के निषेधार्थ है ॥

२२९४ अचस्तास्वत्थल्यनिटो नित्यम् । ७ । २ । ६१ ॥

उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण् न स्यात् ॥

२२९४-उपदेशावस्थामें अजन्त और तासि प्रत्यय परे रहते नित्य अनिट् हो ऐसे जो धातु उनके परे स्थित थल्को इट् न हो ॥

२२९५ उपदेशेऽत्वतः । ७ । २ । ६२ ॥

उपदेशे अकारवतस्तासौ नित्यानिटः परस्य थल इण्न स्यात् ॥

२२९५-उपदेशमें अकारयुक्त और तासि प्रत्यय परे रहते नित्य अनिट् धातुके उत्तर थल्को इट् न हो ॥

२२९६ ऋतो भारद्वाजस्य । ७ । २ । ६३ ॥

तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मतेन । तेनान्यस्य स्यादेव । अयमत्र संग्रहः-

अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयम् ।
ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥

न च स्तुद्र्वादीनामपि थलि विकल्पः शङ्क्यः । अचस्तास्वदिति उपदेशेऽत्वत इति च योगद्वयप्रापितस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्तकः । अनन्तरस्येति न्यायात् । विवयिथ-विवेथ । आजिथ । विव्यथुः । विव्य । विवाय-विवय । विव्यिव । विव्यिम । वेता । अजिता । वेष्यति । अजिष्यति । अजतु । आजत् । अजेत् । वीयात् ॥

२२९६-भारद्वाज मुनिके मतसे तासि प्रत्यय परे रहते नित्य अनिट् ऐसे ऋकारान्त धातुके ही उत्तर थल्को इट् न हो इस कारण अन्य धातुको होगा । इस स्थलमें यह संग्रह है ।

अजन्त अथवा अकारयुक्त तासि प्रत्यय परे नित्य अनिट् जो धातु वह थल् प्रत्यय परे विकल्प करके सेट् हो, और तासि प्रत्यय परे नित्य अनिट् हो और क्रादिभिन्न हो ऐसे धातु लिट् परे सेट् हो ।

स्तु, द्रु, स्रु और श्रु इन धातुओंको भी थल् प्रत्यय परे विकल्प करके इट् नहीं कहसकते कारण कि, "अनन्तरस्य विधिर्वा प्रतिषेधो वा" इस न्यायसे "अचस्तास्व० २२९४" और "उपदेशेऽत्वतः २२९५" इस सूत्रसे प्रापित प्रतिषेधका ही भारद्वाजनियम निवर्त्तक है । विवयिथ, विवेथ, आजिथ । विव्यथुः । विव्य । विवाय, विवय । विव्यिव । विव्यिम । वेता, अजिता । वेष्यति, अजिष्यति । अजतु । आजत् । अजेत् । वीयात् ॥

२२९७ सिचि वृद्धिः परस्मैपदेषु । ७ । २ । १ ॥

इगन्ताङ्गस्य वृद्धिः स्यात्परस्मैपदपरे सिचि । अवैषीत् । आजीत् । अवेष्यत् । आजिष्यत् ॥ ४८ ॥ तेज पालने । तेजति ॥ ४९ ॥ खज मन्थे । खजति ॥ ॥ ५० ॥ खजि गतिवैकल्ये । खञ्जति ॥ ५१ ॥ एजृ कम्पने । एजांचकार ॥ ५२ ॥ टुओस्फूर्जा वज्रनिर्घोषे । स्फूर्जति । पुस्फूर्ज ॥ ५३ ॥ क्षि क्षये । अकर्मकः । अन्तर्भावितण्यर्थस्तु सकर्मकः । क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । चिक्षयिथ-चिक्षेथ । चिक्षियिव । चिक्षियिम ॥ क्षेता ॥

२२९७-सिच् प्रत्यय परे रहते परस्मैपदमें इगन्त अङ्गको वृद्धि हो, जैसे-अवैषीत्, आजीत् । अवेष्यत्, आजिष्यत् ॥ तेज धातु पालन करनेमें है । तेजति ॥ खज धातु मन्थन करनेमें है खजति ॥ खजि धातु गतिवैकल्यमें है । खञ्जति ॥ एजृ

धातु कम्पनमें है । एजाञ्चकार ॥ टुओस्फूर्जा धातु वज्रनिर्घोषमें है । स्फूर्जति । पुस्फूर्ज ॥ क्षि धातु क्षय अर्थमें है, यह अकर्मक है । अन्तर्भावित णिजर्थ होनेपर सकर्मक है । क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । चिक्षयिथ, चिक्षेथ । चिक्षियिव । चिक्षियिम । क्षेता ॥

२२९८ अकृत्सार्वधातुकयोर्दीर्घः । ७ । ४ । २५ ॥

अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः । क्षीयात् । अक्षैषीत् ॥ ५४ ॥ क्षीज अव्यक्ते शब्दे । कूजिना सहायं पठितुं युक्तः । चिक्षीज ॥ ५५ ॥ लज लजि भर्जने ॥ ॥ ५७ ॥ लाज लाजि भर्त्सने च ॥ ५९ ॥ जज जजि युद्धे ॥ ६१ ॥ तुज हिंसायाम् । तोजति । तुतोज ॥ ६२ ॥ तुजि पालने ॥ ६३ ॥ गज गजि गृज गृजि मुज मुजि शब्दार्थाः ॥ ६९ ॥ गज मदने च ॥ ७१ ॥ वज व्रज गतौ । वदव्रजेति वृद्धिः । अव्राजीत् ॥ ७२ ॥

२२९८-यकारादि प्रत्यय परे रहते अजन्त अङ्गको दीर्घ हो, कृत् प्रत्यय और सार्वधातुक प्रत्यय परे रहते नहीं हो, क्षीयात् । अक्षैषीत् ॥ क्षीज धातु अव्यक्त शब्द करनेमें है, कूज और क्षीज, यह दोनों धातु एकार्थक हैं, इस कारण कूज धातुके साथ क्षीज धातुका पाठ करना युक्तियुक्त (ठीक) है। चिक्षीज ॥ लज और लजि धातु भर्जन अर्थमें हैं ॥ लाज और लाजि धातु भर्त्सन अर्थमें हैं ॥ जज और जजि धातु युद्ध अर्थमें है ॥ तुज धातु हिंसा करनेमें है । तोजति । तुतोज ॥ तुजि धातु पालन करनेमें है ॥ गज, गजि, गृज, गृजि, मुज और मुजि धातु शब्दार्थक हैं । गज धातु मदन, अर्थात् चित्तविकारमें भी है ॥ वज धातु और व्रज धातु गति अर्थमें है "वदव्रज० २२६७" इस सूत्रसे वृद्धि होकर अव्राजीत् ॥

अथ टवर्गीयान्ताः शाडचन्ता अनुदात्तेतः षट्त्रिंशत् । अट्ट अतिक्रमहिंसयोः । दोपधोयम् । तोपध इत्येके । अट्टते । आनट्टे ॥ १ ॥ वेष्ट वेष्टने । विवेष्टे ॥ २ ॥ चेष्ट चेष्टायाम् । अचेष्टिष्ट ॥ ३ ॥ गोष्ट लोष्ट संघाते । जुगोष्टे ॥ ४ ॥ लुलोष्टे ॥ ५ ॥ घट्ट चलने । जघट्टे ॥ ६ ॥ स्फुट विकसने । स्फोटते । पुस्फुटे ॥ ७ ॥ अठि गतौ । अण्ठते । आनण्ठे ॥ ८ ॥ वठि एकचर्यायाम् । ववण्ठे ॥ ९ ॥ मठि कठि शोके । शोक इह आध्यानम् । मण्ठते ॥ १० ॥ कण्ठते ॥ ११ ॥ मुठि पालने । मुण्ठते ॥ १२ ॥ हेठ विबाधायाम् । जिहेठे ॥ १३ ॥ एठ च । एठांचक्रे ॥ १४ ॥ हिडि गत्यनादरयोः । हिण्डते । जिहिण्डे ॥ १५ ॥ हुडि संघाते । जुहुण्डे ॥ १६ ॥ कुडि दाहे । चुकुण्डे ॥ १७ ॥ वडि विभाजने । मडि च । ववण्डे ॥ १९ ॥ भडि परिभाषणे । परिहासः सनिन्दोपालम्भश्च परिभाषणम् । बभण्डे ॥ २० ॥ पिडि संघाते । पिपिण्डे ॥ २१ ॥ मुडि मार्जने । मार्जनं शुद्धिर्न्यग्भावश्च । मुण्डते ॥ २२ ॥ तुडि तोडने । तोडनं दारणं हिंसनं च । तुण्डते ॥ २३ ॥ हुडि वरणे । वरणं स्वीकारः । हरण इत्येके । हुण्डते ॥ २४ ॥ चडि कोपे । चण्डते ॥ २५ ॥ शडि रुजायां संघाते च । शण्डते ॥ २६ ॥ तडि ताडने । तण्डते ॥ २७ ॥ पडि गतौ । पण्डते ॥ २८ ॥ कडि मदे । कण्डते ॥ २९ ॥ खडि मन्थे ॥ ३० ॥ हेडृ होडृ अनादरे । जिहेडे ॥ ३१ ॥ जुहोडे ॥ ३२ ॥ बाडृ आप्लाव्ये । बशादिः । आप्लाव्यमाप्लवः । बाडते ॥ ३३ ॥ द्राडृ ध्राडृ विशरणे । द्राडते ॥ ३४ ॥ ध्राडते ॥ ३५ ॥ शाडृ श्लाघायाम् । शाडते ॥ ३६ ॥

अब टवर्गीयान्त शाडचन्त ३६ धातु अनुदात्तेत्, अर्थात् आत्मनेपदी कहतेहैं ॥

अट्ट धातु अतिक्रम और हिंसामें है, यह धातु दकारोपध है। कोई २ कहतेहैं यह तकारोपध है । अट्टते । आनट्टे ॥ वेष्ट धातु वेष्टन करनेमें है । विवेष्टे । चेष्ट धातु चेष्टार्थक है । अचेष्टिष्ट । गोष्ट धातु और लोष्ट धातु समूहार्थमें जानना । जुगोष्टे । लुलोष्टे ॥ घट्ट धातु चलनार्थक है । जघट्टे ॥ स्फुट खिलनामें है । स्फोटते । पुस्फुटे ॥ अठि धातु गतिमें है । अण्ठते । आनण्ठे ॥ वठि धातु एकचर्य्यामें है । ववण्ठे ॥ मठि और कठि धातु शोक, अर्थात् आध्यानमें हैं । मण्ठते । कण्ठते ॥ मुठि धातु पालन करनेमें है । मुण्ठते ॥ हेठ धातु विबाधा अर्थमें है । जिहेठे ॥ एठ धातु भी उसी अर्थमें है । एठाञ्चक्रे ।

हिडि धातु गति और अनादरार्थमें है । हिण्डते । जिहिण्डे ॥ हुडि धातु संघातार्थमें है । जुहुण्डे ॥ कुडि धातु दाहार्थमें है । चुकुण्डे ॥ वडि और मडि धातु विभाजनार्थमें है । ववण्डे ॥ भडि धातु परिभाषण, अर्थात् परिहास और सनिन्द उपालम्भमें है । बभण्डे ॥ पिडि धातु संघातार्थमें है । पिपिण्डे ॥ मुडि धातु मार्जन करनेमें है । मार्जन शब्दसे शुद्धि और न्यग्भाव जानना । मुण्डते ॥ तुडि धातु तोडन, अर्थात् विदारण और हिंसा (अर्थ) है । तुण्डते ॥ हुडि धातु वरण अर्थात्, स्वीकार करनेमें है । किसी २ के मतसे हरण करनेमें भी जानना । हुण्डते ॥ चडि धातु कोप अर्थमें है । चण्डते ॥ शडि धातु रुजा और संघातार्थमें है । शण्डते ॥ तडि धातु ताडना करनेमें है । तण्डते ॥ पडि धातु गमन करनेमें है । पण्डते ॥ कडि धातु मदमें है । कण्डते ॥ खडि धातु मंथन करनेमें है ॥ हेडृ और होडृ धातु अनादर करनेमें है । जिहेडे । जुहोडे ॥ बाडृ धातु आप्लावन करनेमें है। यह बशादि

है । बाडते ॥ द्राडृ और ध्राडृ धातु विशरणमें है । द्राडते । ध्राडते ॥ शाडृ धातु श्लाघामें है । शाडते ॥

अथ आटवर्गीयान्तसमाप्तेः परस्मैपदिनः । शौटृ गर्वे । शौटति । शुशौट ॥१॥ यौटृ बन्धे । यौटति ॥ २ ॥ म्लेटृ म्रेडृ उन्मादे ॥ द्वितीयो डान्तः । टान्तमध्ये पाठस्त्वर्थसाम्यान्नाथतिवत् । म्लेटति ॥ ३ ॥ म्रेडति ॥ ४ ॥ कटे वर्षावरणयोः । चटे इत्येके । चकाट । सिचि अतो हलादेर्लघोरितिवृद्धौ प्राप्तायाम् ॥

अब टवर्गीयान्त समाप्तिपर्य्यन्त परस्मैपदी धातु हैं ॥ शौटृ धातु गर्व्व अर्थमें है । शौटति । शुशौट॥यौटृ धातु बंधनमें है । यौटति॥म्लेटृ और म्रेडृ धातु उन्मादमें है दूसरी धातु डकारान्त है, अर्थकी समानताके कारण जैसे—नाथृ धातु धकारान्त मध्यमें पठित है वैसे यह भी टकारान्तमध्यमें पठित है । म्लेटति । म्रेडति॥ कटे धातु वर्षा और आवरणमें है । कोई२ चटे धातु पढते हैं । चकाट । सिच् परे "अतो हलादेर्लघोः २२४८" इस सूत्रसे वृद्धि प्राप्त होनेपर— ॥

२२९९ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् । ७ । २ । ५ ॥

हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि । अकटीत् ॥ ६ ॥ अट पट गतौ । आट । आटतुः । आटुः ॥७॥ पपाट । पेटतुः । पेटुः ॥ ८ ॥ रट परिभाषणे । रराट ॥ ९ ॥ लट बाल्ये ललाट ॥ १० ॥ शट रुजाविशरणगत्यवसादनेषु । शशाट ॥११॥ वट वेष्टने । ववाट । ववटतुः । ववटुः । ववटिथ ॥ १२॥ किट खिट त्रासे । केटति ॥१३॥ खेटति ॥ १४ ॥ शिट षिट अनादरे । शेटति । शिशेट ॥ १५ ॥ सेटति । सिषेट ॥ १६ ॥ जट झट संघाते ॥ १८ ॥ भट भृतौ ॥ १९ ॥ तट उच्छ्राये ॥ २० ॥ खट काङ्क्षायाम्॥२१॥ णट भृतौ ॥ २२ ॥ पिट शब्दसंघातयोः ॥२३॥ हट दीप्तौ ॥ २४ ॥ षट अवयवे ॥ २५ ॥ लुट विलोडने । डान्तोयमित्येके ॥ २७ ॥ चिट परप्रेष्ये ॥ २८ ॥ विट शब्दे ॥ २९ ॥ बिट आक्रोशे । बशादिः । हिटेत्येके ॥ ३१ ॥ इट किट कटी गतौ । एटति ॥३२॥ केटति ॥३३॥ कटति । ईकारः श्वीदितो निष्ठायामितीण्निषेधार्थः ॥ ३४ ॥ केचित्तु इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति । अन्ये च इ ई इति प्रश्लिष्य । अयति । इयाय । ईयतुः । ईयुः। इययिथ-इयेथ । इयाय-इयय । दीर्घस्य त्विजादेरित्याम अयांचकारेत्यादि उदाहरन्ति ॥ ३५ ॥ मडि भूषायाम् ॥ ३६ ॥ कुडि वैकल्ये । कुण्डति । कुण्डत इति तु दाहे गतम्॥३७॥ मुड प्रुड मर्दने ॥ ३९ ॥ चुडि अल्पीभावे ॥ मुडि खण्डने । मुण्डति ॥ ४० ॥ पुडि चेत्येके । पुण्डति ॥ ४१ ॥ रुटि लुटि स्तेये । रुण्टति४२॥ लुण्टति ॥ ४३ ॥ रुठि लुठि इत्येके ॥ ४५ ॥ रुडि लुडीत्यपरे ॥ ४७ ॥ स्फुटिर् विशरणे । इरित्त्वादङ्गा । अस्फुटत्-अस्फोटीत् ॥ ४८ ॥ स्फुटीत्यपि केचित् । इदित्वान्नुम् । स्फुण्टति ॥ ४९ ॥ पठ व्यक्तायां वाचि । पेठतुः । पेठिथ । अपाठीत्-अपठीत् ॥५०॥ वठ स्थौल्ये । ववठतुः । ववठिथ ॥५१॥ मठ मदनिवासयोः॥५२॥कठ कृच्छ्रजीवने ॥५३॥ रठ परिभाषणे ॥ ५४ ॥ रठेत्येके ॥ ५५ ॥ हठ प्लुतिशठत्वयोः । बलात्कारे इत्येके । हठति । जहाठ ॥ ५६ ॥ रुठ लुठ उठ उपघाते । ओठति॥५९॥ ऊठेत्येके । ऊठति । ऊठांचकार ॥ ६० ॥ पिठ हिंसासंक्लेशनयोः ॥ ६१ ॥ शठ कैतवे च॥६२॥ शुठ प्रतिघाते । शोठति ॥६३॥ शुठीति स्वामी । शुण्ठति ॥ ६४ ॥ कुठि च । कुण्ठति ॥ ६५ ॥ लुठि आलस्ये प्रतिघाते च ॥६६॥ शुठि शोषणे ॥ ६७ ॥ रुठि लुठि गतौ ॥ ६९ ॥ चुड्ड भावकरणे । भावकरणमभिप्रायसूचनम् । चुड्डति । चुचुड्ड ॥७०॥ अड्ड अभियोगे । अड्डति । आनड्ड ॥ ७१ ॥ कड्ड कार्कश्ये । कड्डति ॥७२॥ चुड्डादयस्त्रयो दोपधाः । तेन क्विपि । चुत् । अत् । कत् इत्याद । क्रीडृ विहारे । चिक्रीड ॥ ७३ ॥ तुडृ तोडने । तोडति । तुतोड ॥ ७४ ॥ तूडृ इत्येके ॥ ७५ ॥ हुडृ हूडृ होडृ गतौ । हुडचात् हूडचात् । होडचात् ॥७८॥ रौडृ अनादरे॥७९॥ रोडृ लोडृ उन्मादे ॥८१॥ अड उद्यमे । अडति । आड । आडतुः । आडुः ॥ ८२ ॥ लड विलासे । लडति ॥ ८३ ॥ डलयोर्लरयोश्चैकत्वस्मरणाल्ललतीति स्वाम्यादयः ॥ कड मदे । कडति॥८४॥ कडि इत्येके । कण्डति ॥ ८५ ॥ गडि वदनैकदेशे । गण्डति ८६ ॥ इति टवर्गीयान्ताः ॥

२२९९-इट् आदिमें है ऐसे सिच् परे रहते हकारान्त, मकारान्त और यकारान्त धातु और क्षण, श्वस, जागृ और णिजन्त और श्वि धातु और एकारेत्संज्ञक धातुको वृद्धि न हो, जैसे—अकटीत् ॥ अट और पट धातु गतिमें है । आट । आटतुः । आटुः । पपाट । पेटतुः । पेटुः ॥ रट धातु परिभाषणमें है । रराट ॥ लट बाल्यमें है । ललाट ॥ शट धातु रुजा, विशरण, गति और अवसादनार्थमें है । शशाट ॥ वट

धातु वेष्टन करनेमें है । ववाट । ववटतुः । ववटुः । ववटिथ ॥ किट और खिट धातु त्रासमें है । केटति । खेटति ॥ शिट और षिट धातु अनादरमें है । शेटति । शिशेट । सेटति । सिषेट ॥ जट और झट धातु संघातमें है ॥ भट धातु भरण करनेमें है ॥ तट धातु उच्छ्रायमें है ॥ खट धातु कांक्षामें है ॥ णट धातु नृत्यमें है ॥ पिट धातु शब्द और संघातमें है ॥ हट धातु दीप्तिमें है ॥ षट धातु अवयवमें है ॥ लुट धातु विलोडनमें है । कोई २ कहतेहैं यह धातु डकारान्त हैं ॥ चिट धातु परप्रेष्यमें है ॥ बिट धातु शब्द करनेमें है ॥ विट धातु आक्रोश करनेमें है । यह बद्यादि है । कोई २ हिट धातु पढते हैं ॥ इट, किट और कटी धातु गति अर्थमें जानना । एटति । केटति । कटति । ईकार "श्वीदितो निष्ठायाम् ३०३९" इस सूत्रसे इण् निषेधार्थ है ।

कोई २ इदित् मानकर नुम् करके 'कण्टति' ऐसा पद कहतेहैं और कटी धातुमें इ ई ऐसा प्रश्लेष करके, अयति । इयाय । ईयतुः । ईयुः । इययिथ, इयेथ । इयाय, इयय । दीर्घ ई धातुके तो "इजादेः २२३७" इस सूत्रसे आम् । प्रत्यय करके 'अयाञ्चकार' इत्यादि प्रयोग करतेहैं ॥

मंडि धातु भूषणमें है ॥ कुडि धातु वैकल्यमें है । कुण्डति । कुण्डते, यह पद तो दाहार्थमें कहचुके हैं ॥ मुड पुड धातु मर्दनमें है ॥ चुडि धातु अल्पीभावमें है ॥ मुडि धातु खंडनमें है मुण्डति ॥ पुडि धातु भी उस अर्थमें कोई २ कहतेहैं । पुण्डति ॥ रुटि और लुटि धातु स्तेय, अर्थात् चोरी करनेमें है । रुण्टति । लुण्टति ॥ रुठि और लुठि स्तेयार्थक हैं यह किसीका मत है । कोई २ कहतेहैं रुडि और लुडि धातु स्तेयार्थक हैं ।

स्फुटिर् धातु विशरणमें है । इरित्वके कारण विकल्प करके अङ्ग होगा, जैसे-अस्फुटत्, अस्फोटीत् । कोई २ स्फुटि ऐसा भी पाठ करतेहैं, उसको इदित्वके कारण नुम् होकर स्फुण्टति ॥ पठ धातु व्यक्त वाक्यमें है पेठतुः । पेठिथ । अपाठीत्, अपठीत् ॥ वठ धातु स्थौल्यमें है । ववठतुः । ववठिथ ॥ मठ धातु मद और निवासमें है । कठ धातु कष्टसे जीवनधारणमें है । रट धातु परिभाषणमें है । कोई २ रठ ऐसा धातु कहतेहैं । हठ धातु प्लुति और शठत्वमें है । कोई २ कहते हैं कि, हठ धातु बलात्कार अर्थमें है । हठति । जहाठ । रुठ, लुठ और उठ धातु उपघातमें है । ओठति । कोई २ ऊठ ऐसा धातु कहतेहैं ऊठति । ऊठाञ्चकार ॥ पिठ धातु हिंसा और संक्लेशनमें है । शठ धातु कैतव अर्थमें है ॥ शुठ धातु प्रतिघातमें है । शोठति । शुठि ऐसा धातु स्वामी कहतेहैं । शुण्ठति ॥ कुठि धातुका भी प्रतिघात अर्थ है । कुण्ठति ॥ लुठि धातु आलस्य और प्रतिघातमें है । शुठि धातु शोषणार्थमें है । रुठि और लुठि धातु गमन करनेम है ॥

चुड्ड धातु भावकरण, अर्थात् अभिप्रायसूचनमें है । चुड्डति । चुचुड्ड ॥ अड्ड धातु अभियोगमें है । अड्डति । आनड्ड ॥ कड्ड धातु कर्कशतार्थमें है । कड्डति । चुड्डादि तीन धातु दकारोपध है, इस कारण क्विप् प्रत्यय करके चुत्, अत्, कत्, इत्यादि रूप होंगे । क्रीड़ धातु विहार करनेमें है । चिक्रीड ॥ तोड धातु तोडनार्थमें है । तोडति । तुतोड । तूड़ धातुको भी तोडनार्थमें जानना ॥ हुड़, हूड़ और होड़ धातु गमन करनेमें है । हुड्यात् । हूड्यात् । होड्यात् ॥ रौड़ धातु अनादरमें है । रोड़ और लोड़ धातु उन्मादमें है । अड धातु उद्यम करनेमें है । अडति । आड । आडतुः । आडुः ॥ लड धातु विलासमें है । लडति । डकार, लकार और रकार लकारके एकत्वस्मरणके कारण 'ललति' पद सिद्ध हुआ, यह स्वामी आदि आचार्योंका मत है ॥ कड धातु गर्व करनेमें है । कडति । किसीके मतसे कडि ऐसा धातु है । कण्डति ॥ गडि धातु वदनका एक अंश जानना । गण्डति ।

टवर्गान्त धातु सम्पूर्ण कहे गए ॥

अथ पवर्गीयान्ताः । तत्रानुदात्तेतः स्तोभत्यन्ताश्चतुस्त्रिंशत् । तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः। आद्योनुदात्तः । क्षीरस्वामी त्वयं सेडिति बभ्राम। तेपते । तितिपे । क्रादिनियमादिट् । तितिपिषे। तेप्ता । तेप्स्यते ॥

अब पवर्गीयान्त धातु कहतेहैं, उसमें स्तुभ धातु पर्यन्त ३४ धातु अनुदात्तेत्, अर्थात् आत्मनेपदी हैं ।

तिपृ, तेपृ, ष्टिपृ और ष्टेपृ धातु क्षरणार्थक हैं, पहिला अनुदात्त है । क्षीरस्वामी कहतेहैं कि, यह सेट् है, परन्तु यह भ्रममात्र है । तेपते । तितिपे । क्रादिनियमके कारण इट् होकर-तितिपिषे । तेप्ता । तेप्स्यते ॥

२३०० लिङ्सिचावात्मनेपदेषु । १ । २ । ११ ॥

इक्समीपाद्धलः परौ झलादी लिङ् आत्मनेपदपरः सिच्चेत्येतौ कितौ स्तः । कित्त्वान्न गुणः। तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् । लुङि, झलो झलीति सलोपः। अतिप्त । अतिप्साताम्। अतिप्सत।तेपते।तितेपे।तिष्टिपे।तिष्टिपाते। तिष्टिपिरे । तिष्टेपे । तिष्टेपाते तिष्टेपिरे ॥ तेपृ कम्पने च ॥ ४ ॥ ग्लेपृ दैन्ये । ग्लेपते ॥ ९ ॥ टुवेपृ कम्पने । वेपते ॥ ६ ॥ केपृ गेपृ ग्लेपृ च । चात्कम्पने गतौ च । सूत्रविभागादिति स्वामी । मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पने इत्यपेक्षत इत्याह । ग्लेपेरर्थभेदात्पुनः पाठः ॥९॥ मेपृ रेपृ लेपृ गतौ ॥१२॥ त्रपूष् लज्जायाम् । त्रपते ॥

२३००-इक्के समीपस्थ हल्के परे स्थित झलादि लिङ् और सिच् आत्मनेपदमें कित्संज्ञक हो । कित्त्वके कारण गुण नहीं होगा, तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् । लुङ् परे रहते "झलो झलि० २२८१" इस सूत्रसे सकारका लोप होकर, अतिप्त । अतिप्साताम् । अतिप्सत । तेपते । तितेपे । तिष्टिपे । तिष्टिपाते । तिष्टिपिरे । तिष्टेपे । तिष्टेपाते । तिष्टेपिरे ॥ तेपृ धातु काँपनेमें भी जानना ॥ ग्लेपृ धातु दैन्यार्थमें है । ग्लेपते ॥ टुवेपृ धातु कंपनमें है । वेपते ॥ केपृ, गेपृ और ग्लेपृ धातु कंपन और सूत्रविभागके कारण गत्यर्थमें भी जानना, यह

स्वामीका मत है, परन्तु मैत्रेय तो चकारको छोडके पढकर 'कम्पने' इसको अपेक्षा करतेहैं आचार्य्य, यह कहतेहैं । ग्लेपृ धातुका अर्थ भिन्न है इस कारण पुनः पाठ हुआ ॥ मेपृ, रेपृ और लेपृ धातु गति अर्थमें है । त्रपूष् धातु लजामें है । त्रपते ॥

२३०१ तॄफलभजत्रपश्च ।६।४।१२२॥

एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च । त्रेपे । त्रेपाते । त्रेपिरे । ऊदित्वादिड्वा । त्रपिता । त्रप्ता । त्रपिषीष्ट । त्रप्सीष्ट ॥ १३ ॥ कपि चलने । कम्पते । चकम्पे ॥१४॥ रबि लबि अबि शब्दे । ररम्बे । ललम्बे । आनम्बे ॥ लबि अवस्रंसने च ॥ १७ ॥ कबृ वर्णे । चकबे ॥१८॥ क्लीबृ अधाष्टर्च्ये । चिक्लीबे ॥१९॥ क्षीबृ मदे । क्षीबते ॥ २० ॥ शीभृ कत्थने । शीभते ॥ २१ ॥ चीभृ च ॥ २२ ॥ रेभृ शब्दे । रिरेभे ॥ २३॥ अभिरभी क्वचित्पठचेते । अम्भते ॥ २४ ॥ रम्भते ॥ २५ ॥ ष्टभि स्कभि प्रतिबन्धे । स्तम्भते । उत्तम्भते । उदः स्थास्तम्भोरिति पूर्वसवर्णः । विस्तम्भते । स्तन्भेरिति षत्वं तु न भवति । श्रुविधौ निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात् । तद्वीजं तूदस्थास्तम्भोरिति पवर्गीयोपधपाठः, स्तन्भेरिति तवर्गीयोपधपाठश्चेति माधवः। केचिदस्य टकार औपदेशिक इत्याहुः । तन्मते ष्टम्भते । टष्टम्भे ॥ २७ ॥ जभी जृभि गात्रविनामे ॥

२३०१ कित् लिट् और सेट थल् परे रहते तॄ, फल, भज और त्रप इन धातुओंके अकारके स्थानमें एकार हो, और अभ्यासका लोप हो, त्रेपे । त्रेपाते । त्रेपिरे। ऊकार इत् होनेके कारण विकल्प करके इट् होगा, त्रपिता, त्रप्ता । त्रपिषीष्ट, त्रप्सीष्ट ॥ कपि धातु चलनमें है । कम्पते । चकम्पे ॥ रबि, लबि और अबि धातु शब्द करनेमें हैं । ररम्बे । ललम्बे । आनम्बे । लबि धातुका अवस्रंसन भी अर्थ जानना ॥ कबृ धातु वर्ण अर्थमें है। चकबे ॥ क्लीबृ धातु धाष्टर्चमें है । चिक्लीबे ॥ क्षीबृ धातु मद अर्थमें है । क्षीबते ॥ शीभृ धातु कत्थनमें है । शीभते ॥ चीभृ धातुका भी कत्थनार्थ जानना ॥ रेभृ धातु शब्द करनेमें हैं । रिरेभे । किसी स्थलमें अभि और रभि धातु पढे हैं । अम्भते। रम्भते ॥ ष्टभि और स्कभि धातु प्रतिबंधमें हैं । स्तम्भते । "उदः स्थास्तम्भोः० ११८" इससे पूर्वसवर्ण (त्) होकर–उत्तम्भते ।

विस्तम्भते, यहां " स्तन्भेः २२७१ " इस सूत्रसे श्नुविधिमें निर्दिष्ट सौत्र धातुका ग्रहण होनेसे षत्व नहीं हुआ उसका प्रमाण तो " उदः स्थास्तम्भोः० ११८" इस सूत्रमें पवर्गीयोपध पाठ और " स्तन्भेः २२७२ " इस सूत्रमें तवर्गीयोपध पाठ है, यह माधवाचार्यका मत है । कोई २ कहतेहैं कि, इसका टकार औपदेशिक है, उनके मतसे–ष्टम्भते । टष्टम्भे ॥ जभी और जृभि धातु गात्रविनाम अर्थमें है ॥

२३०२ रधिजभोरचि ।७।१।६१॥

एतयोर्नुमागमः स्यादचि । जम्भते । जजम्भे । जम्भिता । अजम्भिष्ट । जृम्भते । जजृम्भे ॥२९॥ शल्भ कत्थने । शशल्भे ॥ ३० ॥ वल्भ भोजने । दन्त्योष्ठ्यादिः । ववल्भे ॥ ३१ ॥ गल्भ धाष्टर्च्ये । गल्भते ॥ ३२ ॥ श्रम्भु प्रमादे । तालव्यादिर्दन्त्यादिश्च । श्रम्भते । स्रम्भते ॥ ३३ ॥ ष्टुभु स्तम्भे । स्तोभते । विष्टोभते । तुष्टुभे । व्यष्टोभिष्ट ॥ ३४ ॥

२३०२–अच् परे रहते रधि और जभ धातुको नुमागम हो, जम्भते। जजम्भे जम्भिता । अजम्भिष्ट। जृम्भते। जजृम्भे॥ शल्भ धातु कत्थन अर्थमें है। शशल्भे॥ वल्भ धातु भोजन करनेमें है, यह धातु दन्त्योष्ठादि है। ववल्भे॥ गल्भ धातु धाष्टर्यार्थमें है । गल्भते ॥ श्रम्भु धातु प्रमादार्थमें है, यह धातु तालव्यादि और दन्त्यादि है । श्रम्भते। स्रम्भते ॥ ष्टुभु धातु स्तम्भ करनेमें है । स्तोभते । विष्टोभते । तुष्टुभे । व्यष्टोभिष्ट ॥

अथ परस्मैपदिनः ॥ गुपू रक्षणे ॥

अब परस्मैपदी धातु कहते हैं ।

गुपू धातु रक्षा करनेमें है ॥

२३०३ गुपूधूपविच्छिपणिपनिभ्य आयः ।३।१।२८॥

एभ्य आयप्रत्ययः स्यात्स्वार्थे। पुगन्तेति गुणः॥

२३०३–गुपू, धूप, विच्छि, पणि और पनि धातुके उत्तर स्वार्थमें आय प्रत्यय हो । "पुगन्त० २१८९ " इस सूत्रसे गुण होकर–॥

२३०४ सनाद्यन्ता धातवः ।३।१।३२॥

सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः । धातुत्वाल्लडादयः । गोपायति॥

२३०४–सनादि कमेर्णिङ् पर्य्यन्त प्रत्यय अन्तमें है जिसके उसको धातु संज्ञा हो, इससे धातुत्वके कारण उसके उत्तर लडादि प्रत्यय होंगे, जैसे–गोपायति ॥

२३०५ आयादय आर्धधातुके वा । ३ । १ । ३१ ॥

आर्धधातुकविवक्षायामायादयो वा स्युः ॥

२३०५–आर्धधातुक विवक्षामें विकल्प करके आयादि प्रत्यय हों–॥

२३०६ कास्प्रत्ययादाममन्त्रे लिटि । ३ । १ । ३५ ॥

कास्धातोः प्रत्ययान्तेभ्यश्चाम् स्याल्लिटि न तु मन्त्रे ॥ कास्यनेकाज्ग्रहणं कर्तव्यम् ॥ * ॥

सूत्रे प्रत्ययग्रहणमपनीय तत्स्थानेऽनेकाच इति वाच्यमित्यर्थः ॥

२३०६-लिट् परे रहते कास धातु और प्रत्ययान्तके उत्तर आम् प्रत्यय हो, मंत्रमें नहीं हो ॥

सूत्रमें अनेकाच्ग्रहण करना उचित है, अर्थात् सूत्रमें प्रत्यय ग्रहण छोडकर उसके स्थानमें " अनेकाचः " ऐसा कहना चाहिये * ॥

२३०७ आर्धधातुके । ६ । ४ । ४६ ॥

इत्यधिकृत्य ॥

२३०७-"आर्धधातुके" यह अधिकार करके-॥

२३०८ अतो लोपः । ६ । ४ । ४८ ॥

आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्धधातुके परे । गोपायाञ्चकार । गोपायाम्बभूव । गोपायामास । जुगोप । जुगुपतुः । ऊदित्वाद्वेट् । जुगोपिथ-जुगोप्थ । गोपायिता-गोपिता-गोप्ता । गोपाय्यात्-गुप्यात् । अगोपायीत् । अगोपीत् । अगौप्सीत् ॥ १ ॥ धूप सन्तापे । धूपायति । धूपायाञ्चकार । दुधूप । धूपायितासि । धूपितासि ॥ २ ॥ जप जल्प व्यक्तायां वाचि । जप मानसे च ॥ ४ ॥ चप सांत्वने ॥ ५ ॥ षप समवाये । समवायः सम्बन्धः सम्यगवबोधो वा । सपति ॥ ६ ॥ रप लप व्यक्तायां वाचि ॥ ८ ॥ चुप मन्दायां गतौ । चोपति । चुचोप । चोपिता ॥ ९ ॥ तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः । तोपति । तुतोप । तुम्पति । तुतुम्प । तुतुम्पतुः । संयोगात्परस्य लिटः कित्त्वाभावान्नलोपो न । किदाशिषीति कित्त्वान्नलोपः । तुप्यात् । प्रात्तुम्पतौ गवि कर्तरीति पारस्करादिगणे पाठात्सुट् । प्रस्तुम्पति गौः । श्तिपा निर्देशाद्यङ्लुकि न । प्रतोतुम्पीति । त्रोपति । त्रुम्पति । तोफति । तुम्फति । त्रोफति । त्रुम्फति इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः । अन्ये सरेफाः । आद्याश्चत्वारः प्रथमान्ताः । ततो द्वितीयान्ताः । अष्टावप्युकारवन्तः ॥ १७ ॥ पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ । आद्यः प्रथमान्तः । ततो द्वौ द्वितीयान्तौ । तत एकादश तृतीयान्ताः । द्वितीयतृतीयौ मुक्त्वा रेफोपधाः । पर्पति । पपर्प । रफति । रम्फति । अर्बति । आनर्ब । पर्बति । लर्बति । बर्बति । पवर्गीयादिरयम् । मर्बति । कर्बति । खर्बति । गर्बति । शर्बति । सर्बति । चर्बति ॥ ३१ ॥ कुबि आच्छादने । कुम्बति ॥ ३२ ॥ लुबि तुबि अर्दने । लुम्बति । तुम्बति ॥ ३४ ॥ चुबि वक्त्रसंयोगे । चुम्बति ॥ ३५ ॥ षृभु षृंभु हिंसार्थौ । सर्भति । ससर्भ । सर्भिता । सृम्भति । ससृम्भ । सृभ्यात् ॥ ३७ ॥ षिभु षिम्भु इत्येके । सेभति सिम्भति ॥ ३९ ॥ शुभ शुम्भ भाषणे । भासने इत्येके । हिंसायामित्यन्ये ॥

२३०८-आर्धधातुक उपदेशकालमें अकारान्त धातुके अकारका लोप हो, गोपायाञ्चकार । गोपायाम्बभूव । गोपायामास । जुगोप । जुगुपतुः । ऊकार इत्संज्ञक होनेके कारण विकल्पसे इट् होगा, जुगोपिथ, जुगोप्थ । गोपायिता, गोपिता, गोप्ता । गोपाय्यात्, गुप्यात् । अगोपायीत्, अगोपीत्, अगौप्सीत् ॥ धूप धातु संतापमें है । धूपायति । धूपायाञ्चकार । दुधूप । धूपायितासि, धूपितासि ॥ जप और जल्प धातु व्यक्त वाक्यमें हैं । जप धातु मानसवचनमें भी है ॥ चप धातु शान्त करनेमें है । षप धातु समवायार्थमें है समवायसे सम्बन्ध और सम्यक् अवबोध अर्थ जानना । सपति ॥ रप और लप धातु व्यक्त वाक्यमें है ॥ चुप धातु मन्दगतिमें है । चोपति । चुचोप । चोपिता ॥ तुप, तुम्प, त्रुप, त्रुम्प, तुफ, तुम्फ, त्रुफ और त्रुम्फ धातु हिंसार्थमें हैं । तोपति । तुतोप । तुम्पति । तुतुम्प । तुतुम्पतुः, यहां संयोगके परे लिट्के कित्त्वाभावके कारण नकारका लोप नहीं हुआ ।

"किदाशिषि २२१६" इस सूत्रसे कित्त्वके कारण नकारका लोप होकर तुप्यात् ।

प्रात्तुम्पतौ गवि कर्त्तरि । (प्रशब्दके परे तुम्प धातुके गो कर्ता होनेपर सुट् हो) ऐसा पारस्करादि गणमें पाठके कारण सुट् होकर प्रस्तुम्पति गौः । श्तिप्से निर्देशके कारण यङ्लुगन्तमें नहीं होगा, प्रतोतुम्पीति । त्रोपति । त्रुम्पति । तोफति । तुम्फति । त्रोफति । त्रुम्फति । इस स्थलमें पहली, दूसरी और पांचवीं और छठी धातु रेफरहित और अन्य रेफसहित हैं । आद्य ४ प्रथमान्त, पश्चात् द्वितीयान्त हैं । आठों उकारवान् हैं । पर्प, रफ, रफि, अर्ब, पर्ब, लर्ब, बर्ब, मर्ब, कर्ब, खर्ब, गर्ब, शर्ब, षर्ब और चर्ब धातु गत्यर्थक हैं, आदिस्थित धातु प्रथमान्त है, पश्चात् दो द्वितीयान्त हैं, पश्चात् ११ तृतीयान्त हैं । दूसरी और तीसरी छोडकर और सम्पूर्ण धातु रकारोपध हैं । पर्पति । पपर्प । रफति । रम्फति । अर्बति । आनर्ब । पर्बति । लर्बति । बर्बति, यह धातु पवर्गादि है । मर्बति । कर्बति खर्बति । गर्बति । शर्बति । सर्बति ॥ चर्बति ॥ कुबि धातु आच्छादनमें है । कुम्बति ॥ लुबि और तुबि धातु अर्दन करनेमें है । लुम्बति । तुम्बति ॥ चुबि धातु मुखसंयोग करनेमें है । चुम्बति ॥ षृभु और षृम्भु धातु हिंसार्थमें है । सर्भति । ससर्भ । सर्भिता । सृम्भति । ससृम्भ । सृभ्यात् ॥ षिभु षिम्भु धातु हिंसार्थक है । सेभति । सिम्भति ॥ शुभ धातु और शुम्भ धातु भाषणमें है । कोई २ कहतेहैं कि, भासनेमें और हिंसा करनेमें है ॥

अथानुनासिकान्ताः । तत्र कम्यन्ता अनुदात्तेतो दश । घिणि घुणि घृणि ग्रहणे । नुम् । ष्टुत्वम् । घिण्णते । जिघिण्णे । घुण्णते । जुघुण्णे । घृण्णते । जघृण्णे ॥ ३ ॥ घुण घूर्ण भ्रमणे । घोणते । घूर्णते । इमौ तुदादौ परस्मैपदिनौ ॥ ५ ॥ पण

व्यवहारे स्तुतौ च । पन च । स्तुतावित्येव सम्बध्यते पृथङ्निर्देशात् । पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः । व्यवहारे तु पणते । पेणे । पणितेत्यादि । स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम् । पणायति । पणायाञ्चकार । पेणे । पणायितासि । पणितासे । पणाय्यात् । पनायति । पनायाञ्चकार । पेने ॥ ७ ॥ भाम क्रोधे । भामते । बभामे ॥ ८ ॥ क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे-चक्षंसे । चक्षमिध्वे । चक्षन्ध्वे चक्षमिवहे ॥

इसके उपरान्त अनुनासिक वर्णान्त धातु कहे जातेहैं, उसमें कमि धातु पर्यन्त १० धातु अनुदात्तेत् (आत्मनेपदी) हैं ।

घिणि, घुणि, घृणि, धातु ग्रहण करनेमें हैं । नुम् और ष्टुत्व होकर-घिण्णते । जिघिण्णे । घुण्णते । जुघुण्णे । घृण्णते । जघृण्णे ॥ घुण और घूर्ण धातु भ्रमण करनेमें हैं । घोणते । घूर्णते । यह दो धातु तुदादिमें परस्मैपदी हैं ।

पण धातु व्यवहार और स्तुतिमें है । पन धातु भी इसी अर्थमें है, परन्तु पन धातुके पृथक् निर्देशके कारण स्तुति अर्थका ही सम्बन्ध होताहै । पनि धातुके साहचर्य्यके कारण पणि धातुके उत्तर भी स्तुति अर्थमें ही आय प्रत्यय होगा, व्यवहारार्थमें तो-पणते । पेणे । पणिता, इत्यादि । स्तुति अर्थमें अनुबंधको केवलमें चरितार्थत्वके कारण आयप्रत्ययान्तके उत्तर आत्मनेपद नहीं होगा-पणायति । पणायाञ्चकार । पेणे । पणायितासि । पणितासे । पणाय्यात् । पणिषीष्ट । पनायति । पनायाञ्चकार । पेने ॥ भाम धातु क्रोध करनेमें है । भामते । बभामे ॥ क्षमूष् धातु सहनमें है । क्षमते । चक्षमे । चक्षमिषे, चक्षंसे । चक्षमिध्वे, चक्षन्ध्वे । चक्षमिवहे ॥

२३०९ म्वोश्च । ८ । २ । ६५ ॥

मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे । णत्वम् । चक्षण्वहे । चक्षमिमहे-चक्षण्महे । क्षमिष्यते-क्षंस्यते । क्षमेत । आशिषि, क्षमिषीष्ट-क्षंसीष्ट । अक्षमिष्ट-अक्षंस्त ॥ ९ ॥ कमु कान्तौ । कान्तिरिच्छा ॥

२३०९-मकार और वकार परे रहते मकारान्त धातुके मकारके स्थानमें नकारादेश हो । णत्व होकर-चक्षण्वहे । चक्षमिमहे, चक्षण्महे । क्षमिष्यते, क्षंस्यते । क्षमेत । आशीर्लिङ्में, क्षमिषीष्ट, क्षंसीष्ट । अक्षमिष्ट, अक्षंस्त ॥ कमु धातु कान्ति अर्थात् इच्छामें है ॥

२३१० कमेर्णिङ् । ३ । १ । ३० ॥

स्वार्थे ङित्त्वात्तङ् । कामयते ॥

२३१०-कम् धातुके उत्तर णिङ् हो । ङ इत् होनेके कारण उसके उत्तर तङ् प्रत्यय होकर-कामयते ॥

२३११ अयामन्ताल्वाय्येत्न्विष्णुषु । ६ । ४ । ५५ ॥

आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात् । वक्ष्यमाणलोपापवादः । कामयाञ्चक्रे ॥ आयादय आर्द्धधातुके वा । चकमे । कामयिता-कमिता । कामयिष्यते-कमिष्यते ॥

२३११-आम्, अन्त, आलु, आय्य, इत्नु और इष्णु प्रत्यय परे रहते णिके स्थानमें अयादेश हो, यह अयादेश वक्ष्यमाण लोपका अपवाद है-कामयाञ्चक्रे । " आयादय आर्धधातुके वा २३०५ " इससे आय प्रत्यय आर्धधातुकपरे विकल्प करके होकर-चकमे । कामयिता, कमिता । कामयिष्यते, कमिष्यते ॥

२३१२ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । ३ । १ । ४८ ॥

ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे । अकाम् इ अतेति स्थिते ॥

२३१२-ण्यन्त धातु और श्रि, द्रु और स्रु धातुके उत्तर कर्त्रर्थक लुङ् परे रहते च्लिके स्थानमें चङ् आदेश हो । अकाम् इ अत, ऐसा होनेपर-॥

२३१३ णेरनिटि । ६ । ४ । ५१ ॥

अनिडादावार्धधातुके परे णेर्लोपः स्यात् । परत्वादेरनेकाच इति यणि प्राप्ते ॥ ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन ॥*॥ इति वार्तिकम् ॥ णिलोपस्य तु पाचयतेः पाक्तिरित्यादि क्तिजन्तमवकाश इति भावः । वस्तुतस्त्वनिटीतिवचनसामर्थ्यादार्धधातुकमात्रमस्य विषयः । तथा चेयङादेरपवाद एवायम् । इयङ्, अततक्षत् । यण्, आटिटत् । गुणः, कारणा । वृद्धिः, कारकः । दीर्घः, कार्यते ॥

२३१३-अनिडादि आर्धधातुक परे रहते णिका लोप हो । परत्वके कारण "एरनेकाचः २७२ " इस सूत्रसे यण्की प्राप्ति होनेपर-॥

इयङ्, यण्, गुण, वृद्धि और दीर्घसे पूर्वविप्रतिषेधसे णि और अकारका लोप हो * णिलोपका-पाचयतेः-पाक्तिः, इत्यादि क्तिजन्त अवकाश है इससे तुल्यबलविरोध दिखाया है वास्तविक तो ' अनिटि ' इस वचनके असामर्थ्यके कारण आर्धधातुकमात्र इसका विषय है, तब तो यह इयङादिका अपवाद ही है जैसे-इयङ्-अततक्षत् । यण्-आटिटत् । गुण-कारणा । वृद्धि-कारकः । दीर्घ-कार्य्यते ॥

२३१४ णौ चङ्युपधाया ह्रस्वः । ७ । ४ । १ ॥

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् ॥

२३१४-चङ्परक णि परे रहते धातुकी उपधाको ह्रस्व हो-॥

२३१५ चङि । ७ । १ । ११ ॥

चङि परे अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य ॥

२३१५-चङ् परे रहते अनभ्यास धातुके अवयव प्रथम एकाच्को द्वित्व हो, और अजादि धातुके द्वितीय एकाच्को द्वित्व हो-॥

२३१६ सन्वल्लघुनि चङ्परेऽनग्लोपे । ७ । ४ । ९३ ॥

चङ्परे इति बहुव्रीहिः । स चाङ्गस्येति च द्वयमप्यावर्तते । अंगसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत्, तत्परं यल्लघु तत्परो योऽङ्गस्याऽभ्यासस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति । अथ वांगस्येति नावर्तते । चङ्परे णौ यदंगं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत् ॥

२३१६-चङ्परे यह बहुव्रीहि है 'चङ्परे' अङ्गस्य, इन दोनों पदोंकी आवृत्ति होती है, इससे अङ्गसंज्ञानिमित्तक जो चङ्परक णि तत्परक जो लघु तत्परक जो अङ्गका अभ्यास उसको सन् परे जैसा कार्य होताहै वैसा कार्य हो, णि परे अक्का लोप न हुआ हो तो, अथवा 'अङ्गस्य' इस पदकी आवृत्ति नहीं हो, तो ऐसा अर्थ हुआ कि, चङ्परक णि परे जो अङ्ग उसका जो लघुपरक अभ्यास उसको सन् परे जैसा कार्य्य होताहै वैसा कार्य्य हो, णि परे अक्का लोप नहीं हुआ हो तो-॥

२३१७ सन्यतः । ७ । ४ । ७९ ॥

अभ्यासस्यात इकारः स्यात्सनि ॥

२३१७-सन् परे रहते अभ्यासके अकारके स्थानमें इकार हो-॥

२३१८ दीर्घो लघोः । ७ । ४ । ९४ ॥

लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये । अचीकमत । णिङभावपक्षे।कमेश्च्लेश्चङ्वक्तव्यः ॥*॥ णेरभावान्न दीर्घसन्वद्भावौ । अचकमत ॥
संज्ञायाः कार्यकालत्वादंगं यत्र द्विरुच्यते ।
तत्रैव दीर्घः सन्वच्च नानेकाक्ष्विति माधवः ॥
चकास्त्यर्थापयत्यूर्णोत्यादौ नांगं द्विरुच्यते ।
किं त्वस्यावयवः कश्चित्तस्मादेकाक्ष्विदं द्वयम् ।
वस्तुतोंगस्याऽवयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोर्थापयतौ द्वयं स्यादिति मन्महे ॥
चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया ।
णेर्विशेष्यं सन्निहितं लघुनीत्यंगमेव वा ॥
इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेपि सम्बन्धस्त्वगितामपि सिद्धये ॥९॥१०

अथ क्रम्यन्तास्त्रिंशत्परस्मैपदिनः ॥ अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः । अणति । रणति । वणति । वकारादित्वादेत्वाभ्यासलोपौ न । ववणतुः । ववणिथ ॥ १० ॥ धणिरपि कैश्चित्पठ्यते । धणति ॥ ओणृ अपनयने । ओणति । ओणांचकार ॥ ११ ॥ शोणृ वर्णगत्योः । शोणति । शुशोण ॥ १२ ॥ श्रोणृ संघाते । श्रोणति ॥ १३ ॥ श्लोणृ च । शोणादयस्त्रयोऽमी तालव्योष्मादयः ॥ १४ ॥ पैणृ गतिप्रेरणश्लेषणेषु । प्रैणृ इति क्वचित्पठ्यते । पिपैण ॥ १५ ॥ ध्रण शब्दे । उपदेशे नान्तोयम् । रषाभ्यामिति णत्वम् । ध्रणति । नोपदेशफलं यङ्लुकि । दन्ध्रन्ति ॥ १६ ॥ बणेत्यपि केचित् । बेणतुः । बेणिथ ॥ १७ ॥ कनी दीप्तिकान्तिगतिषु । चकान ॥ १८ ॥ ष्टन वन शब्दे । स्तनति वनति ॥ २० ॥ वन षण सम्भक्तौ । वनेरर्थभेदात्पुनः पाठः । सनति । ससान । सेनतुः ॥

२३१८-सन्वद्भावविषयमें लघुसंज्ञक अभ्यासको दीर्घ हो-अचीकमत । णिङ्के अभाव पक्षमें-

कमि धातुके उत्तर च्लिके स्थानमें चङ् आदेश हो * णिके अभावके कारण दीर्घ और सन्वद्भाव न होकर-अचकमत ।

संज्ञा शास्त्रको कार्य्यकालपक्षमें विधिशास्त्रके साथ एकवाक्यता होनेसे'अङ्गस्य' इससे सम्बद्ध "पूर्वोऽभ्यासः" इसका "सन्वल्लघुनि०" "दीर्घो लघोः" इत्यादि शास्त्रमें सम्बन्ध हुआ और 'द्वे' इसका विशेष्यसमर्पक उच्चारण क्रियानिरूपित 'अङ्गस्य' इसमें कर्म्ममें षष्ठी हुई तब ऐसा अर्थ हुआ कि, अङ्गकर्मक जहां द्विरुच्चारण हो वहां पूर्वकी अभ्यास संज्ञा हो और उसको दीर्घ, सन्वद्भाव हो, इससे अङ्गका जहां द्विरुच्चारण है वहां ही दीर्घ, सन्वद्भाव होगा अनेकाच्में नहीं होगा यह माधवका मत है ।

चकास्, अर्थापि, ऊर्णु, इत्यादि धातुमें अङ्गको द्वित्व नहीं होताहै, किन्तु अङ्गके किसी अवयवको द्वित्व होताहै, इस कारण उन स्थलोंमें दीर्घ, सन्वद्भाव नहीं होगा, किन्तु एकाच् धातुमें ही दीर्घ और सन्वद्भाव होगा ।

अर्थाधिकार पक्षके श्रेष्ठत्वके कारण और वृत्यादिमें ऐसा ही स्वीकार होनेके कारण माधवके मतको कोई आचार्य्य दूषित कहते हैं कि, वास्तविक तो अंगावयव जो अभ्यास ऐसा वर्णनसे ऊर्णु धातुमें दीर्घ और अर्थापि धातुमें दीर्घ और सन्वद्भाव होगा ।

'चकास्' धातुमें तो व्यवस्थासे दोनों (दीर्घ,सन्वद्भाव)नहीं होंगे और होंगे भी, तो व्यवस्था यह है कि,णिका विशेष्य संनिहित होनेसे 'लघुनि' यह अथवा अंग होगा जब 'लघुनि'

होगा, तब णिसे पूर्व लघु न होनेसे दोनों नहीं होंगे और अंग विशेष्य होगा तो णिसे पूर्व अंग है, इस लिये दोनों कार्य होंगे।

कैयटसे ही इस प्रकार वैकल्पिक व्याख्या वर्णित है अगित् धातुको दीर्घ और सन्वद्भाव सिद्धके निमित्त णिके अग्लोपमें भी सम्बन्ध कियाहै।

अनन्तर क्रमु धातुपर्यन्त ३० परस्मैपदी धातु कहतेहैं।

अण, रण, वण, भण, मण, कण, क्वण, व्रण, भ्रण और ध्वण धातु शब्दार्थक हैं। अणति। रणति। वणति।

वकारादित्वके कारण एत्व और अभ्यासका लोप नहीं होकर-ववणतुः। ववणिथ॥ कोई २ धणि धातु भी पढतेहैं। धणति॥ ओणृ धातु अपनयन करनेमें है। ओणति। ओणाञ्चकार॥ शोणृ धातु वर्ण और गतिमें है। शोणति। शुशोण॥ श्रोणृ धातु और श्लोणृ धातु संघातमें है। श्रोणति। शोणादि ३ धातु तालव्योष्मादि हैं॥ पैणृ धातु गति, प्रेरण और श्लेषणमें है। किसी ग्रन्थमें प्रैणृ धातु पठित है। पिप्रैण॥ ध्रण धातु शब्द करनेमें है। उपदेशावस्थामें यह धातु नकारान्त है। "रषाभ्यां २३५" इस सूत्रसे णत्व होकर-ध्रणति। यङ्लुक्विषयमें णोपदेशका फल जानना जैसे-दन्ध्रन्ति, यहां नुक् हुआ। कोई २ बण धातु भी इस अर्थमें पढतेहैं। बेणतुः। बेणिथ॥ कनी धातु दीप्ति, कान्ति और गतिमें है। चकान॥ ष्टन धातु और वन धातु शब्द करनेमें हैं। स्तनति। वनति॥ वन षण धातु सम्भक्तिमें है। वन धातुका अर्थ भिन्न होनेसे पुनः पाठ कियाहै। सनति। ससान। सेनतुः॥

२३१९ ये विभाषा। ६। ४। ४३॥

जनसनखनामात्वं वा स्याद्यादौ क्ङिति। सायात्-सन्यात्॥ २१॥ अमगत्यादिषु। कनीदीप्तिकान्तिगतीत्यत्र गतेः परयोः शब्दसम्भक्त्योरादिशब्देन ग्रहः। अमति। आम॥२२॥ द्रम हम्म मीमृ गतौ। द्रमति। दद्राम। ह्मयन्तेति न वृद्धिः। अद्रमीत्। हम्मति। जहम्म। मीमति। मिमीम। अयं शब्दे च॥२५॥ चमु छमु जमु झमु अदने॥

२३१९-यादि कित् और ङित् प्रत्यय परे रहे तो जन, सन और खन धातुके विकल्प करकी आत्व हो, जैसे-सायात्, सन्यात्।

अम् धातु गत्यादि अर्थमें है "कनी दीप्ति कान्ति गति" इस स्थलमें गतिके परे जो शब्द और सम्भक्ति अर्थ कहा है, वह आदि शब्दसे गृहीत है। अमति। आम॥ द्रम, हम्म, मीमृ धातु गतिमें हैं। द्रमति। दद्राम। "ह्मयन्तक्षण० २२९९" इस सूत्रसे वृद्धि न होकर-अद्रमीत्। हम्मति। जहम्म। मीमति। मिमीम, यह धातु शब्दार्थक भी है॥ चमु, छमु, जमु और झमु धातु भक्षण करनेमें हैं॥

२३२० ष्ठिवुक्लमुचमां शिति।७।३।७५॥

एषामचो दीर्घः स्याच्छिति॥ आङि चम इति वक्तव्यम्॥ *॥ आचामति। आङि किम्। चमति। विचमति। अचमीत्॥२९॥ जिमि केचित्पठन्ति। जेमति॥ क्रमु पादविक्षेपे॥

२३२०-शित् प्रत्यय परे रहते ष्ठिवु, क्लमु, और चमु धातुके अच्को वृद्धि हो।

आङ् पूर्वमें रहते चमु धातुके अच्को वृद्धि हो ऐसा कहना चाहिये * आचामति। आङ्पूर्वक न होनेपर, जैसे-चमति। विचमति। अचमीत्॥ कोई २ जिमि धातु पढतेहैं। जेमति॥ क्रमु धातु पादविक्षेप करनेमें है॥

२३२१ वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः। ३। १। ७०॥

एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे।

२३२१-कर्तृवाचक सार्वधातुक परे रहते भ्राश, भ्लाश, भ्रमु, क्रमु, क्लमु, त्रसि, त्रुटि और लष धातुके उत्तर विकल्प करके श्यन् प्रत्यय हो॥

२३२२ क्रमः परस्मैपदेषु।७।३।७६॥

क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति। क्राम्यति-क्रामति। चक्राम। क्राम्यतु-क्रामतु॥

२३२२-शित् प्रत्यय परे रहते परस्मैपदमें क्रमु धातुके अकारको विकल्प करके दीर्घ हो, जैसे-क्राम्यति, क्रामति। चक्राम। क्राम्यतु, क्रामतु॥

२३२३ स्नुक्रमोरनात्मनेपदनिमित्ते। ७। २। ३६॥

अत्रैवेट्। अक्रमीत्॥ ३०॥ अथ रेवत्यन्ता अनुदात्तेतः॥ अय वय मय पय चय तय णय गतौ। अयते॥

२३२३-आत्मनेपदनिमित्त न रहते स्नु और क्रमु धातुके उत्तर वलादि आर्धधातुकको इट् हो-अक्रमीत्।

अनन्तर रेवत्यन्त अनुदात्तेत् (आत्मनेपदी) धातु कहे जातेहैं।

अय, वय, पय, मय, चय, तय और णय धातु गतिमें हैं। अयते॥

२३२४ दयायासश्च। ३। १। ३७॥

दय अय आस् एभ्य आम् स्याल्लिटि। अयाञ्चक्रे। अयिता। अयिषीष्ट॥

२३२४-लिट् परे रहते दय, अय और आस् धातुके उत्तर आम् हो, अयाञ्चक्रे। अयिता। अयिषीष्ट॥

२३२५ विभाषेटः। ८। ३। ७९॥

इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वम्-अयिषीध्वम्। आयिढ्वम्। आयिध्वम्॥

२३२५-इण्के परे स्थित इट्के उत्तर षीध्वं, लुङ् और लिट् सम्बन्धी धकारके स्थानमें विकल्प करके मूर्द्धन्यादेश (ढ) हो।

अयिषीढ्वम्, अयिषीध्वम् । आयिष्ट । आयिढ्वम्, आयिध्वम् ॥

२३२६ उपसर्गस्यायतौ ।८।२।१९॥

अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात् । प्लायते । पलायते । निस्दुसोरुत्वस्यासिद्धत्वान्न लत्वम् । निरयते । दुरयते । निर्दुरोस्तु निलयते । दुलयते । प्रत्यय इति त्विणो रूपम् । अथ कथमुदयति विततोर्ध्वरश्मिरज्जाविति माघः । इट किट कटी इत्यत्र प्रश्लिष्टस्य भविष्यति । यद्वा । अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् । चक्षिङो ङित्करणाज्ज्ञापकात् । वादित्वात्, ववये । पेये । मेये । चेये । तेये । प्रणयते । नेये ॥ ७ ॥ दय दानगतिरक्षणहिंसादानेषु । आदानं ग्रहणम् । दयांचक्रे ॥ ८ ॥ रय गतौ ॥ ९ ॥ ऊयी तन्तुसन्ताने । ऊयांचक्रे ॥ १० ॥ पूयी विशरणे दुर्गन्धे च । पूयते । पुपूये ॥ ११ ॥ क्नूयी शब्दे उन्दे च । चुक्नूये ॥ १२ ॥ क्ष्मायी विधूनने । चक्ष्माये ॥ १३ ॥ स्फायी ओप्यायी वृद्धौ । स्फायते । पस्फाये । प्यायते ॥

२३२६-अय धातु परे रहते उपसर्गसम्बन्धी रेफके स्थानमें लकार हो, प्लायते । पलायते । निस् और दुस् सम्बन्धी रुत्वके असिद्धत्वके कारण लत्व नहीं होकर-निरयते । दुरयते । निर् और दुर् सम्बन्धी रके स्थानमें ल होकर-निलयते । दुलयते । 'प्रत्ययः' यह पद तो इण्धातुनिष्पन्न है ।

यदि 'अय' धातु आत्मनेपदी हो तो माघमें "उदयति विततोर्ध्वरश्मिरज्जौ" इस स्थलमें 'उदयति' ऐसा परस्मैपद प्रयोग कैसे हुआ ? इसपर कहतेहैं कि, इट, किट, कटी इस स्थलमें प्रश्लिष्ट इ धातुका 'उदयति' ऐसा पद हो, अथवा चक्षिङ् धातुमें ङित्करणके कारण अनुदात्तत्व प्रयुक्त आत्मनेपद अनित्य है, इससे उक्त रूप सिद्ध हुआ । वकारादित्वके कारण 'ववये' पद सिद्ध हुआ, इस स्थानमें एत्व नहीं हुआ । पेये । मेये । चेये । तेये । प्रणयते । नेये ॥ दय धातु दान, गति, रक्षण, हिंसा और आदान अर्थात् ग्रहण करनेमें है । दयाञ्चक्रे ॥ रय धातु गति अर्थमें है । ऊयी धातु-तन्तु सन्तानमें है । ऊयाञ्चक्रे ॥ पूयी धातु विसरण, दुर्गन्ध अर्थमें है । पूयते । पुपूये ॥ क्नूयी धातु शब्द करने और उन्द अर्थात् क्लेदनमें है । चुक्नूये ॥ क्ष्मायी धातु विधूननार्थमें है । चक्ष्माये ॥ स्फायी और ओप्यायी धातु वृद्धि अर्थमें है । स्फायते । पस्फाये । प्यायते ॥

२३२७ लिड्यङोश्च । ६ । १ । २९ ॥

लिटि यङि च प्यायः पीभावः स्यात् । पुनः प्रसंगविज्ञानात्पीशब्दस्य द्वित्वम् । एरनेकाच इति यण् । पिप्ये । पिप्याते । पिप्यिरे ॥

२३२७-लिट् और यङ् प्रत्यय परे रहते प्याय् धातुके स्थानमें पी आदेश हो, दूसरी वार भी प्रसंग (प्राप्ति) के कारण पी शब्दको द्वित्व हुआ, "एरनेकाचः० २७२" इस सूत्रसे यण् हुआ जैसे-पिप्ये । पिप्याते । पिप्यिरे ॥

२३२८ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् । ३ । १ । ६१ ॥

एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे ॥

२३२८-एकवचन त शब्द परे रहते दीप, जन, बुध, पूरि, तायि और प्यायि धातुके उत्तर विहित च्लिके स्थानमें विकल्प करके चिण् आदेश हो ॥

२३२९ चिणो लुक् । ६ । ४ । १०४ ॥

चिणः परस्य लुक् स्यात् । अप्यायि-अप्यायिष्ट ॥ १५ ॥ तायृ सन्तानपालनयोः । सन्तानः प्रबन्धः । तायते । तताये । अतायि-अतायिष्ट ॥ ॥ १६ ॥ शल चलनसंवरणयोः ॥ १७ ॥ वल वल्ल संवरणे संचरणे च । ववले । ववल्ले ॥ १९ ॥ मल मल्ल धारणे । मेले । ममल्ले ॥ २१ ॥ भल भल्ल परिभाषणहिंसादानेषु । बभले । बभल्ले ॥ २३ ॥ कल शब्दसंख्यानयोः । कलते । चकले ॥ २४ ॥ कल्ल अव्यक्ते शब्दे । कल्लते । अशब्द इति स्वामी । अशब्दस्तूष्णींभाव इति च ॥ २५ ॥ तेवृ देवृ देवने । तितेवे । दिदेवे ॥ २७ ॥ षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेवने । परिनिविभ्य इति षत्वम् । परिषेवते । सिषेवे । अयं सोपदेशोऽपाति न्यासकारादयः । तद्भाष्यविरुद्धम् । गेवते । जिगेवे । जिग्लेवे । पिपेवे । मेवते । म्लेवते ॥ ३३ ॥ शेवृ खेवृ केवृ इत्यप्येके ॥ ३६ ॥ रेवृ प्लवगतौ । प्लवगतिः प्लुतगतिः । रेवते ॥ ३७ ॥

अथावत्यन्ताः परस्मैपदिनः । मव्य बन्धने । ममव्य ॥ १ ॥ सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः ॥ ४ ॥ हय गतौ । अहयीत् । यान्तत्वान्न वृद्धिः ॥ ५ ॥ शुच्य अभिषवे । अवयवानां शिथिलीकरणं सुरायाः सन्धानं वाऽभिषवः स्नानं च । शुशुच्य ॥ ६ ॥ चुच्य इत्येके ॥ ७ ॥ हर्य गतिकान्त्योः । जहर्य ॥ ८ ॥ अल भूषणपर्याप्तिवारणेषु । अलति । आल ॥

२३२९-चिण्के परे स्थित त शब्दका लोप हो । अप्यायि, अप्यायिष्ट । तायृ धातु सन्तान और पालनार्थमें है । तायते । तताये । अतायि, अतायिष्ट ।

शल धातु चलन और संवरण अर्थमें है । वल और वल्ल धातु संवरण और संचलन अर्थमें हैं । ववले । ववल्ले ॥ मल

और मल्ल धातु धारणार्थमें हैं। मेले। ममल्ले॥ भल और भल्ल धातु परिभाषण, हिंसा और दानार्थमें। बभले। बभल्ले॥ कल धातु शब्द और संख्यामें है। कलते। चकले॥ कल्ल धातु अव्यक्त शब्द करनेमें है। कल्लते। अशब्दमें है ऐसा स्वामीका मत है, अशब्द अर्थात् तूष्णींभाव।

तेवृ और देवृ धातु देवनार्थमें है. तितेवे। दिदेवे॥ षेवृ, गेवृ, ग्लेवृ, पेवृ, मेवृ, म्लेवृ, धातु सेवनार्थमें हैं। "परिनिविभ्यः० २२७५" इस सूत्रसे षत्व हुआ, परिषेवते। सिषेवे। यह धातु सोपदेश भी है, यह न्यासकारादि कहतेहैं, परन्तु वह भाष्यके विरुद्ध है। गेवते। जिगेवे। जिग्लेवे। पिपेवे। मेवते। म्लेवते॥ शेवृ, खेवृ और केवृ धातुका भी कोई कोई पाठ करतेहैं॥ रेवृ धातु प्लुतगतिमें है। रेवते।

अनन्तर अव धातुपर्यन्त परस्मैपदी धातु कहतेहैं।

मव्य धातु बंधनमें है। ममव्य॥

सूर्क्ष्य, ईर्क्ष्य, ईर्ष्य धातु ईर्ष्यार्थमें हैं॥ हय धातु गत्यर्थमें है। अहयीत्। यान्तत्वके कारण वृद्धि नहीं हुई॥ शुच्य धातु अभिषवमें है। अवयवका शिथिलीकरण और सुराका संधान तथा स्नानको अभिषव कहतेहैं। शुशुच्य। यहां कोई कोई कहतेहैं कि शुच्य धातुके स्थानमें 'चुच्य' ऐसा धातुपाठ करतेहैं। हर्य्य धातु गति और कान्तिमें है। जहर्य्य॥ अल धातु भूषण, पर्याप्ति और वारणमें है। अलति। आल॥

२३३० अतो लरान्तस्य। ७। २। २॥

लरेति लुप्तषष्ठीकम्। अतः समीपौ यौ लरौ तदन्तस्याऽङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि। नेटीति निषेधस्यातो हलादेरिति विकल्पस्य चापवादः। मा भवानालीत्। अयं स्वरितेदित्येके। तन्मते अलते इत्याद्यपि॥९॥ ञिफला विशरणे। तृप्फलेत्येत्त्वम्। फेलतुः। फेलुः। अफालीत्॥ १०॥ मील श्मील स्मील क्ष्मील निमेषणे। निमेषणं संकोचः। द्वितीयस्तालव्यादिः। तृतीयो दन्त्यादिः॥ १४॥ पील प्रतिष्टम्भे। प्रतिष्टम्भो रोधनम्॥ १५॥ नील वर्णे। निनील॥ १६॥ शील समाधौ। शीलति॥ १७॥ कील बन्धने॥ १८॥ कूल आवरणे॥१९॥ शूल रुजायां संघोषे च॥२०॥ तूल निष्कर्षे। निष्कर्षो निष्कोषणम्। तच्चान्तर्गतस्य बहिर्निःसारणम्। तुतूल॥ २१॥ पूल संघाते॥ २२॥ मूल प्रतिष्ठायाम्॥ २३॥ फल निष्पत्तौ। फेलतुः। फेलुः॥ २४॥ चुल्ल भावकरणे। भावकरणमभिप्रायाविष्कारः॥२५॥ फुल्ल विकसने॥ २६॥ चिल्ल शैथिल्ये भावकरणे च॥ २७॥ तिल गतौ। तेलति॥ २८॥ तिल्लेत्येके॥ तिल्लति॥ २९॥ वेल चेल केल खेल क्ष्वेल वेल्ल चलने। पञ्च ऋदितः षष्ठो लोपधः॥३५॥ पेल फेल शेल गतौ॥३८॥ षेल इत्येके॥३९॥ स्खल सञ्चलने। चस्खाल। अस्खालीत्॥४०॥ खल सञ्चये॥४१॥ गल अदने। गलति। अगालीत्॥४२॥ षल गतौ। सलति॥४३॥ दल विशरणे॥४४॥ श्वल श्वल्ल आशुगमने। शश्वाल। अश्वालीत्। शश्वल्ल। अश्वल्लीत्॥ ४६॥ खोल खोऋ गतिप्रतिघाते। खोलति। खोरति॥ ४८॥ धोऋ गतिचातुर्ये। धोरति॥ ४९॥ त्सर छद्मगतौ। तत्सार। अत्सारीत्॥ ५०॥ क्मर हूर्छने। चक्मार॥ ५१॥ अभ्र वभ्र मभ्र चर गत्यर्थाः। चरतिर्भक्षणेऽपि। अभ्रति। आनभ्र। मा भवानभ्रीत्। अङ्गान्त्यरेफस्यातः समीपत्वाभावान्न वृद्धिः॥ ५५॥ ष्ठिवु निरसने। ष्ठिवुक्लम्विति दीर्घः। ष्ठीवति। अस्य द्वितीयस्थकारष्ठकारो वेति वृत्तिः। तिष्ठेव। तिष्ठिवतुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। टिष्ठिवुः। हलि चेति दीर्घः। ष्ठीव्यात्॥ ५६॥ जि जये। अयमजन्तेषु पठितुं युक्तः। जय उत्कर्षप्राप्तिः। अकर्मकोयम्। जयति॥

२३३०–परस्मैपदमें सिच् प्रत्यय परे रहते अकारके समीपवर्ती जो लकार और रकार तदन्त अंगावयव अकारको वृद्धि हो। यह सूत्र "नेटि २२६८" इस निषेधका और "अतो हलादेः० २२८४" इस सूत्रसे विकल्प वृद्धिका अपवाद है। मा भवानालीत्। कोई २ कहते हैं यह धातु स्वरितेत् अर्थात् उभयपदी है, उनके मतमें अलते इत्यादि पद भी होगा॥ फल धातु विशरणमें है "तृफल० २३०१" इस सूत्रसे एत्व होगा। फेलतुः। फेलुः। अफालीत्॥ मील, श्मील, स्मील और क्ष्मील धातु निमेषण अर्थात् संकोचार्थमें हैं। दूसरी धातु तालव्य शकारादि है॥ तीसरी धातु दन्त्यादि है। पील धातु प्रतिष्टम्भ अर्थात् रोधनार्थमें है॥ नील धातु वर्ण अर्थमें है। निनील॥ शील धातु समाधि अर्थमें है। शीलति॥ कील धातु बंधन अर्थमें है॥ कूल धातु आवरण अर्थमें है॥ शूल धातु रुजा और संघोषार्थमें है॥ तूल धातु निष्कोषणार्थमें अर्थात् भीतरसे बाहर निकालनेमें है। तुतूल॥ पूल धातु संघात अर्थमें है॥ मूल धातु प्रतिष्ठार्थमें है॥ फल धातु निष्पत्ति अर्थमें है। फेलतुः। फेलुः॥

चुल्ल धातु भाव करनेमें अर्थात् अभिप्रायज्ञापनार्थमें है॥ फुल्ल धातु विकसनार्थमें है॥ चिल्ल धातु शैथिल्यार्थमें और भावकरणार्थमें है।

तिल धातु गति अर्थमें है। तेलति। कोई २ कहतेहैं। तिल्ल धातु है। तिल्लति॥ वेलृ, चेलृ, केलृ, खेलृ, क्ष्वेलृ और वेल्ल धातु चलनार्थमें हैं। पांच ऋकार इत्संज्ञक और छठा लकारोपध है॥ पेलृ, फेलृ, शेलृ धातु गति अर्थमें हैं। कोई २ षेलृ धातु भी कहते हैं॥ स्खल धातु सञ्चलनार्थमें है।

चस्खाल । अस्खालीत् ॥ खल धातु सञ्चयार्थमें है ॥ गल धातु अदनार्थमें है । अगालीत् ॥ षल धातु गति अर्थमें है । सलति ॥ दल धातु विशरणार्थमें है ॥ श्वल, श्वल्ल धातु शीघ्र गमन अर्थमें हैं । शश्वाल । अश्वालीत् । शश्वल्ल । अश्वल्लीत् ॥ खोल, खोर्ऋ धातु गतिप्रतिरोधमें है । खोलति । खोरति ।

धोर्ऋ धातु गतिचातुर्यार्थमें हैं धोरति ॥ त्सर धातु छद्मगति में है । तत्सार । अत्सारीत् ॥ क्मर धातु हूर्च्छन अर्थात् कौटिल्यमें है । चक्मार ॥

अभ्र, वभ्र, मभ्र, चर धातु गत्यर्थमें हैं । चर धातु भक्षणार्थमें है । अभ्रति । आनभ्र । मा भवानभ्रीत् । अज्ञान्तरकारक अकारके समीपभावके कारण वृद्धि नहीं होगी ।

ष्ठिवु धातु निरसनार्थमें है । "ष्ठिवु क्लमु० २३२० " इस सूत्रसे दीर्घ होगा । ष्ठीवति । इस धातुके द्वितीय थकारके स्थानमें विकल्प करके टकार हो, यह वृत्तिकारका मत है । तिष्ठेव । तिष्ठिवतुः । तिष्ठिवुः । टिष्ठेव । टिष्ठिवतुः । टिष्ठिवुः । "हलि च ३५४" इस सूत्रसे दीर्घ होगा । ष्ठीव्यात् ।

जि धातु जय करनेमें है । इस धातुका अजन्तमें ही पाठ करना उचित है । जय शब्दसे उत्कर्षप्राप्ति जानना । यह अकर्मक है । जयति ॥

२३३१ सन्लिटोर्जेः । ७ । ३ । ५७ ॥

जयतेः सन्लिण्निमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात् । जिगाय।जिग्यतुः।जिग्युः। जिगयिथ-जिगेथ । जिगाय-जिगय । जिग्यिव । जिग्यिम । जेता । जीयात् । अजैषीत् ॥ ५७ ॥ जीव प्राणधारणे । जिजीव ॥ ५८ ॥ पीव मीव तीव णीव स्थौल्ये । पिपीव । मिमीव । तितीव । निनीव ॥ ६२ ॥ क्षीवु क्षेवु निरसने ॥ ॥ ६४ ॥ उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः । ऊर्वांचकार । उपधायां चेति दीर्घः । तुतूर्व ॥ ६९ गुर्वी उद्यमने । गूर्वति । जुगूर्व ॥ ७० ॥ मुर्वी बन्धने ॥ ७१ ॥ पुर्व पर्व मर्व पूरणे ॥ ७४ ॥ चर्व अदने ॥ ७५ ॥ भर्व हिंसायाम् ॥ ७६ ॥ कर्व खर्व गर्व दर्पे ॥ ७९ ॥ अर्व शर्व षर्व हिंसायाम् । आनर्व । शर्वति । सर्वति ॥ ८२ ॥ इवि व्याप्तौ । इन्वति । इन्वांचकार ॥ ८३ ॥ पिवि मिवि णिवि सेचने । तृतीयो मूर्द्धन्योष्मादिरित्येके । सेवन इति तरङ्गिण्याम् । पिन्वति । पिपिन्व ॥ ८६ ॥ हिवि दिवि धिवि जिवि प्रीणनार्थाः । हिन्वति । दिन्वति ॥

२३३१-सन् और लिट् निमित्तक जो अभ्यास उसके परे स्थित जि धातुके स्थानमें कुत्व हो, अर्थात् सन् और लिट् परे रहते जि धातुके स्थानमें गि आदेश हो । जिगाय । जिग्यतुः । जिग्युः । जिगयिथ, जिगेथ । जिगाय, जिगय । जिग्यिव । जिग्यिम । जेता । जीयात् । अजैषीत् ।

जीव धातु प्राणधारण करनेमें है । जिजीव ॥ पीव, मीव, तीव, णीव धातु स्थौल्य अर्थमें हैं । पिपीव । मिमीव । तितीव । निनीव ॥ क्षीवु और क्षेवु धातु निरसन अर्थमें हैं ॥ उर्वी, तुर्वी, थुर्वी, दुर्वी और धुर्वी धातु हिंसार्थमें हैं । ऊर्वाञ्चकार । " उपधायां च २२६५" इस सूत्रसे दीर्घ होगा । तुतूर्व ॥ गुर्वी धातु उद्यमनार्थमें है । गूर्वति । जुगूर्व ॥ मुर्वी धातु बंधनार्थमें है । पुर्व, पर्व और मर्व धातु पूरणार्थमें हैं ॥ चर्व धातु भक्षणमें है ॥ भर्व धातु हिंसार्थमें है ॥ कर्व, खर्व, गर्व धातु दर्पार्थमें हैं ॥ अर्व, शर्व, षर्व धातु हिंसार्थमें हैं । आनर्व । शर्वति । सर्वति ॥ इवि धातु व्याप्ति अर्थमें हैं । इन्वति । इन्वाञ्चकार ॥ पिवि, मिवि और णिवि धातु सेचनार्थमें हैं । कोई २ कहते हैं कि, तीसरी णिवि मूर्द्धन्योष्मादि है, तरंगिणीके मतमें सेवनार्थमें है । पिन्वति । पिपिन्व ॥ हिवि, दिवि, धिवि और जिवि धातु प्रीणनार्थमें हैं । हिन्वति । दिन्वति ॥

२३३२ धिन्विकृण्व्योर च । ३ । १ । ८० ॥

अनयोरकारोन्तादेशः स्यादुप्रत्ययश्च शब्विषये । अतो लोपः । तस्य स्थानिवद्भावाल्लघूपधगुणो न । उप्रत्ययस्य पित्सु गुणः । धिनोति । धिनुतः । धिन्वन्ति ॥

२३३२-शप् विषयमें धिन्व और कृण्व धातुको अकार अन्तादेश और उ प्रत्यय हो, अकारका लोप होगा, उसके स्थानिवद्भावके कारण लघूपध गुण न होगा । पित् परे रहते उ प्रत्ययके उकारको गुण होगा । धिनोति । धिनुतः । धिन्वन्ति ॥

२३३३ लोपश्चास्याऽन्यतरस्यां म्वोः । ६ । ४ । १०७ ॥

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यात् म्वोः परयोः । धिन्वः-धिनुवः । धिन्मः-धिनुमः। मिपि तु परत्वाद्गुणः, धिनोमि ॥

२३३३-व और म परे रहते असंयोगपूर्वक जो प्रत्ययका उकार तदन्त अङ्गका विकल्प करके लोप हो । धिन्वः, धिनुवः । धिन्मः, धिनुमः । मिप् परे रहते परत्वके कारण गुण होगा । धिनोमि ॥

२३३४ उतश्च प्रत्ययादसंयोगपूर्वात् । ६ । ४ । १०६ ॥

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात्परस्य हेर्लुक् स्यात् । धिनु । नित्यत्वादकारलोपात्पूर्वमाट् । धिनवाव । धिनवाम । जिन्वति । इत्यादि ॥ ९० ॥ रिवि रवि धवि गत्यर्थाः । रिण्वति । रण्वति । धन्वति ॥ ९३ ॥ कृवि हिंसाकरणयोश्च । चकाराद्गतौ । कृणोतीत्यादि धिनोतिवत् । अयं स्वादौ च ॥ ९४ ॥ मव बन्धने ।

मवति। मेवतुः। मेवुः। अमवीत्-अमावीत् ॥ ॥९५॥ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। अवति । आव। मा भवानवीत् ॥ ९६ ॥ धावु गतिशुद्ध्योः । स्वरितेत्। धावति। धावते ॥ ९७ ॥ दधाव। दधावे ॥

अथोष्मान्ता आत्मनेपदिनः ॥ धुक्ष धिक्ष सन्दीपनक्लेशनजीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे ॥२॥ वृक्ष वरणे। वृक्षते। ववृक्षे ॥ ३ ॥ शिक्ष विद्योपादाने। शिक्षते ॥४॥ भिक्ष भिक्षायामलाभे लाभे च। भिक्षते ॥५॥ क्लेश अव्यक्तायां वाचि। बाधन इति दुर्गः। क्लेशते। चिक्लेशे ॥६॥ दक्ष वृद्धौ शीघ्रार्थे च। दक्षते। ददक्षे ॥७॥ दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु। दीक्षते। दिदीक्षे ॥ ८ ॥ ईक्ष दर्शने । ईक्षांचक्रे। ॥ ९ ॥ ईष गतिहिंसादर्शनेषु। ईषांचक्रे ॥१०॥ भाष व्यक्तायां वाचि। भाषते ॥ ११ ॥ वर्ष स्नेहने। दन्त्योष्ठ्यादिः। ववर्षे ॥ १२ ॥ गेषृ अन्विच्छायाम्। ग्लेषृ इत्येके। अन्विच्छा अन्वेषणम्। जिगेषे ॥१३॥ पेषृ प्रयत्ने। पेषते ॥१४॥ जेषृ णेषृ एषृ प्रेषृ गतौ। जेषते। नेषते। एषांचक्रे। पिप्रेषे ॥ १८ ॥ रेषृ हेषृ ह्रेषृ अव्यक्ते शब्दे। आद्यो वृकशब्दे। ततो द्वौ अश्वशब्दे। रेषते। हेषते। ह्रेषते ॥ २१ ॥ कासृ शब्दकुत्सायाम्। कासांचक्रे ॥ २२ ॥ भासृ दीप्तौ। बभासे ॥ २३ ॥ णासृ रासृ शब्दे । नासते। प्रणासते ॥ २५ ॥ णस कौटिल्ये। नसते ॥२६॥ भ्यस भये। भ्यसते। बभ्यसे ॥ २७ ॥ आङः शासि इच्छायाम्। आशंसते। आशशंसे ॥२८॥ ग्रसु ग्लसु अदने। जग्रसे। जग्लसे ॥ ३० ॥ ईह चेष्टायाम्। ईहांचक्रे ॥३१॥ बहि महि वृद्धौ। बंहते। बबंहे। मंहते ॥ ३३ ॥ अहि गतौ। अंहते। आनंहे ॥ ३४ ॥ गर्ह गल्ह कुत्सायाम्। जगर्हे। जगल्हे ॥३६॥ बर्ह बल्ह प्राधान्ये। ओष्ठ्यादी ॥ ३८ ॥ वर्ह वल्ह परिभाषणहिंसाच्छादनेषु। दन्त्योष्ठ्यादी। केचित्तु पूर्वयोर्दन्त्योष्ठ्यादितामनयोरोष्ठ्यादितां चाहुः ॥ ४० ॥ प्लिह गतौ। पिप्लिहे ॥ ४१ ॥ वेह जेह बाह प्रयत्ने। आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभा दन्त्योष्ठ्यादी इत्यपरे। वष्ठ्योष्ठ्यादी इत्येके। जेहतिर्गत्यर्थोऽपि बवाहे ॥४४॥ द्राह निद्राक्षये। निक्षेपे इत्येके ॥ ४५ ॥ काशृ दीप्तौ। चकाशे ॥४६॥ ऊह वितर्के। ऊहांचक्रे ॥ ४७ ॥ गाहू विलोडने। गाहते-जगाहे। जगाहिषे-जघाक्षे। जगाहिढ्वे-जगाहिध्वे-जघाढ्वे ॥

२३३४-असंयोगपूर्वक जो प्रत्ययका उकार तदन्त अङ्गके परे स्थित हिका लोप हो। धिनु। नित्यत्वके कारण उकार लोपसे पूर्वमें आट् आगम होगा। धिनवाव। धिनवाम। जिन्वति-इत्यादि ॥ रिवि, रवि और धवि धातु गत्यर्थमें हैं। रिण्वति। रण्वति। धन्वति ॥ कृवि धातु हिंसा और करणार्थ और गत्यर्थमें हैं। कृणोति-इत्यादि धिन्व धातुके तरह रूप होंगे। यह स्वादिगणी भी है ॥ मव धातु बंधनार्थमें है। मवति। मेवतुः। मेवुः। अमवीत्, अमावीत् ॥ अव धातु रक्षण, गति, कान्ति, प्रीति, तृप्ति, अवगम, प्रवेश, श्रवण, स्वाम्यर्थ, याचन, क्रिया, इच्छा, दीप्ति, अवाप्ति, आलिङ्गन, हिंसा, आदान, भाग और वृद्धि अर्थमें है। अवति। आव। मा भवानवीत् ॥ धावु धातु गति और शुद्धिमें है। धावति। धावते। दधाव। दधावे।

अब ऊष्मवर्णान्त आत्मनेपदी धातु कहे जातेहैं।

धुक्ष और धिक्ष् धातु सन्दीपन, क्लेशन और जीवन अर्थमें हैं। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे ॥ वृक्ष धातु वरणमें है। वृक्षते। ववृक्षे ॥ शिक्ष धातु विद्योपार्जनमें है। शिक्षते ॥ भिक्ष धातु भिक्षाके लाभ और अलाभमें है। भिक्षते। क्लेश धातु अव्यक्त वाक्यमें है। क्लेशते। चिक्लेशे। दक्ष धातु वृद्धि और शीघ्रार्थमें है। दक्षते। ददक्षे ॥ दीक्ष धातु मौंड्य, इज्या, उपनयन, नियम और व्रतादेशमें है। दीक्षते। दिदीक्षे। ईक्ष धातु दर्शनमें है। ईक्षाञ्चक्रे ॥

ईष धातु गति, हिंसा और दर्शनमें है। ईषाञ्चक्रे ॥ भाष धातु व्यक्त वाक्यमें है। भाषते ॥ वर्ष धातु स्नेहनार्थमें है। यह दन्त्योष्ठ्यादि है। ववर्षे ॥ गेषृ धातु अन्वेषण अर्थमें है। कोई २ ग्लेषृ धातु का इस अर्थमें पाठ करतेहैं। जिगेषे ॥ पेषृ धातु प्रयत्नार्थमें है। पेषते ॥ जेषृ, णेषृ, एषृ और प्रेषृ धातु गति अर्थमेंहैं। जेषते। नेषते। एषाञ्चक्रे। पिप्रेषे। रेषृ, हेषृ, और ह्रेषृ धातु अव्यक्त शब्द करनेमें हैं ॥ रेषृ धातु वृकशब्द और हेषृ और ह्रेषृ धातु अश्व शब्द करनेमें हैं। रेषते। हेषते। ह्रेषते।

कासृ धातु कुत्सित शब्दमें है। कासाञ्चक्रे ॥ भासृ धातु दीप्तिमें है। बभासे ॥ णासृ और रासृ धातु शब्द करनेमें हैं। नासते। प्रणासते ॥ णस धातु कौटिल्यार्थमें है। नसते ॥ भ्यस धातु भयमें है। भ्यसते। बभ्यसे ॥ आङ्पूर्वक शंसु धातु इच्छार्थमें है। आशंसते। आशशंसे ॥ ग्रसु और ग्लसु धातु भक्षण करनेमें है। जग्रसे। जग्लसे ॥

ईह धातु चेष्टामें है। ईहाञ्चक्रे ॥ बहि और महि धातु वृद्धिमें हैं। बंहते। बबंहे। मंहते ॥ अहि धातु गतिमें है। अंहते। आनंहे ॥ गर्ह, गल्ह धातु कुत्सामें हैं। जगर्हे। जगल्हे ॥ बर्ह और बल्ह धातु प्राधान्यमें हैं। यह दो धातु ओष्ठ्यादि हैं ॥ वर्ह, वल्ह धातु परिभाषण, हिंसा और आच्छादन अर्थमें हैं। वह

दो धातु दन्त्योष्ठ्यादि हैं । कोई २ इसके विपरीत कहते हैं, अर्थात् पूर्वकी दन्त्योष्ठ्यादि और परकी दो पवर्गादि हैं ॥ प्लिह धातु गतिमें है । पिप्लिहे ॥ वेह्ल, जेह्ल और बाह्ल धातु प्रयत्नमें हैं । पहली दन्त्योष्ठ्यादि और शेष केवल ओष्ठ्यादि हैं । कोई २ कहते हैं दोनों ही ओष्ठ्यादि और दन्त्योष्ठ्यादि हैं, ॥ जेह धातु गत्यर्थमें भी है । ववाहे । द्राह्ल धातु निद्राभङ्गमें है । अन्य मतसे निक्षेपमें है ।

काशृ धातु दीप्तिमें है । चकाशे ।

ऊह धातु वितर्कमें है । ऊहाञ्चक्रे । गाहू धातु विलोडनमें है । गाहते । जगाहे । जगाहिषे, जघाक्षे । जगाहिढ्वे, जगाहिध्वे, जघाढ्वे ॥

२३३५ ढो ढे लोपः । ८ । ३ । १३ ॥

ढस्य लोपः स्याड्ढे परे । गाहिता-गाढा । गाहिष्यते-घाक्ष्यते । गाहिषीष्ट-घाक्षीष्ट । अगाहिष्ट-अगाढ । अघाक्षाताम् । अघाक्षत । अगाढाः । अघाढ्वम् । अघाक्षि ॥४८॥ गृहू गर्हणे । गर्हते । जगृहे ॥ ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन ॥ * ॥ जगृहिषे । जघृक्षे । जघृढ्वे । गर्हिता-गर्ढा । गर्हिष्यते-घर्क्ष्यते । गर्हिषीष्ट-घृक्षीष्ट । लुङि । अगर्हिष्ट । इडभावे ॥

२३३५-ढ परे रहते पूर्ववर्ती ढकारका लोप हो । गाहिता, गाढा । गाहिष्यते, घाक्ष्यते । गाहिषीष्ट, घाक्षीष्ट । अगाहिष्ट, अगाढ । अघाक्षाताम् । अघाक्षत । अगाढाः । अघाढ्वम् । अघाक्षि ॥ गृहू धातु गर्हण अर्थात् निन्दामें है । गर्हते । जगृहे ।

पूर्वविप्रतिषेधके कारण गुणको बाधकर ऋकारोपध धातुके उत्तर लिट्की कित्संज्ञा हो * जगृहिषे, जघृक्षे । जघृढ्वे । गर्हिता, गर्ढा । गर्हिष्यते, घर्क्ष्यते । गर्हिषीष्ट, घृक्षीष्ट । लुङ् परे जैसे-अगर्हिष्ट । इट्अभाव पक्षमें-॥

२३३६ शल इगुपधादनिटः क्सः । ३ । १ । ४५ ॥

इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात् । अघृक्षत ॥

२३३६-इक्उपधावाले शलन्त धातुके उत्तर अनिट् च्लिके स्थानमें 'क्स' आदेश हो । जैसे-अघृक्षत ॥

२३३७ क्सस्याचि । ७ । ३ । ७२ ॥

अजादौ तङि क्सस्य लोपः स्यात् । अलोन्त्यस्य । अघृक्षाताम् । अघृक्षन्त ॥४९॥ ग्लह च । ग्लहते ॥ ५० ॥ घुषि कान्तिकरणे । घुंषते । जुघुंषे । केचिद्घषेत्यदुपधं पठन्ति ॥ ५१ ॥

अथार्हत्यन्ताः परस्मैपदिनः । घुषिर् अविशब्दने । विशब्दनं प्रतिज्ञानं ततोऽन्यस्मिन्नर्थे इत्येके । शब्दे इत्यन्ये पेठुः । घोषति । जुघोष । घोषिता । इरित्वादङ् वा । अघुषत्अघोषीत् ॥ १ ॥ अक्षू व्याप्तौ ॥

२३३७-अजादि तङ् परे रहते क्स आदेशका लोप हो । "अलोन्त्यस्य ४२" इस सूत्रसे अन्त्यका लोप होगा, अघृक्षाताम् । अघृक्षन्त ॥ ग्लह धातु निन्दामें है । ग्लहते ।

घुषि धातु कान्तिकरणमें है । घुंषते । जुघुंषे । कोई २'घष' ऐसा अकारोपध पाठ कहते हैं ।

अब घुषिर् धातुसे अर्ह धातुपर्यन्त परस्मैपदी धातु कहे जाते हैं, जैसे-घुषिर् धातु अविशब्दन अर्थात् प्रतिज्ञासे भिन्न अर्थमें है। यह मुख्य मत है । अन्य मतमें शब्द करनेमें है । घोषति । जुघोष । घोषिता । इर् इत् होनेके कारण विकल्प करके च्लिको अङ् होगा । अघुषत्, अघोषीत् ॥ अक्षु धातु व्याप्ति अर्थमें है ॥

२३३८ अक्षोऽन्यतरस्याम् । ३ । १ । ७५ ॥

अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे । पक्षे शप् । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति । अक्षति । अक्षतः । अक्षन्ति । आनक्ष । आनक्षिथ-आनष्ठ । अक्षिता-अष्टा । अक्षिष्यति-स्कोरिति कलोपः । षढोः कः सि । अक्ष्यति । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि । आक्ष्णोत् । आक्ष्णवम् । अक्ष्णुयात् । अक्ष्यात् । ऊदित्वादिट् । नेटि । मा भवानक्षीत् । अक्षिष्टाम् । अक्षिषुः । इडभावे तु मा भवानाक्षीत् । आष्टाम् । आक्षुः ॥ २ ॥ तक्षू त्वक्षू तनूकरणे ॥

२३३८-कर्ता अर्थमें वर्त्तमान सार्वधातुक परे रहते अक्ष धातुके उत्तर विकल्प करके श्नु प्रत्यय हो । विकल्प पक्षमें शप् होगा । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति । अक्षतिः । अक्षतः । अक्षन्ति । आनक्ष । आनक्षिथ, आनष्ठ । अक्षिता, अष्टा । अक्षिष्यति । "स्कोः० ३८०" इस सूत्रसे ककारका लोप हुआ, "षढोः कः सि २९५" अर्थात् सकार परे रहते ष और ढके स्थानमें क हो, इससे षको क हुआ, अक्ष्यति । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि । आक्ष्णोत् । आक्ष्णवम् । अक्ष्णुयात् । अक्ष्यात् । ऊदित्वके कारण विकल्प करके इट् होगा । "नेटि २३६८" इस सूत्रसे वृद्धिका निषेध होताहै, इस कारण मा भवानक्षीत् । अक्षिष्टाम् । अक्षिषुः । इट्के अभावमें मा भवानक्षीत् । आष्टाम् । आक्षुः ॥ तक्षू और त्वक्षू धातु तनू करणमें अर्थात् सूक्ष्म करनेमें हैं ॥

२३३९ तनूकरणे तक्षः । ३ । १ । ७६ ॥

श्नुः स्याद्वा शब्विषये ॥ तक्ष्णोति । तक्षति-काष्ठम् । ततक्षिथ । ततष्ठ । अतक्षीत् । अतक्षिष्टाम् । अताक्षीत् । अताष्टाम् । तनूकरणे किम् । वाग्भिः संतक्षति । भर्त्सयतीत्यर्थः ॥ ४ ॥ उक्ष सेचने । उक्षांचकार ॥ ५ ॥ रक्ष पालने ॥ ६ ॥ णिक्ष चुंबने । प्रणिक्षति ॥ ७ ॥ तृक्ष स्तृक्ष णक्ष

गतौ । तृक्षति । स्तृक्षति।नक्षति॥ १०॥ वक्ष रोषे। संघाते इत्येके ॥ ११ ॥ मृक्ष संघाते । म्रक्ष इत्येके ॥ १२ ॥ तक्ष त्वचने । त्वचनं संवरणं त्वचो ग्रहणं च । पक्ष परिग्रह इत्येके ॥ १४ ॥ सूर्क्ष आदरे । सुसूर्क्ष । अनादर इति तु काचित्कोऽपपाठः।अवज्ञावहेलनमसूर्क्षणमित्यमर १५॥ काक्षि वाक्षि माक्षि काङ्क्षायाम् ॥ १८ ॥ द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च ॥ २१ ॥ चूष पाने । चुचूष ॥ २२ ॥ तूष तुष्टौ ॥ २३ ॥ पूष वृद्धौ ॥ २४ ॥ मूष स्तेये ॥ २५ ॥ लूष रूष भूषायाम् ॥ २७ ॥ शूष प्रसवे । प्रसवोऽभ्यनुज्ञानम् । तालव्योष्मादिः ॥ २८ ॥ यूष हिंसायाम् । जूष च ॥ ३० ॥ भूष अलंकारे । भूषति ॥३१॥ ऊष रुजायाम्।ऊषांचकार॥३२॥ ईष उञ्छे ॥ ३३ ॥ कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः । तृतीयषष्ठौ तालव्योष्मादी । सप्तमो दन्त्योष्ठ्यादिः । चकाष । चखाष । शिशेष । शिशेषिथ । शेष्टा। क्सः । अशिक्षत् । अशेक्ष्यत् । जेषतुः । जझषतुः । शेषतुः । ववषतुः । मेषतुः ॥

२३३९–तनूकरण अर्थात् क्षीणकरण अर्थ होनेपर तक्ष धातुके उत्तर श्नुके विषयमें विकल्प करके श्नु प्रत्यय हो, जैसे–तक्ष्णोति, तक्षति वा काष्ठम् । ततक्षिथ,ततष्ठ । अतक्षीत्। अतक्षिष्टाम् । अताक्षीत् । अताष्टाम् ।

तनूकरणार्थ न होनेपर 'वाग्भिः सन्तक्षति' इस स्थलमें भर्त्सनार्थ होनेके कारण श्नु प्रत्यय नहीं हुआ ।

उक्ष धातु सेचन करनेमें है । उक्षाञ्चकार॥रक्ष धातु पालन करनेमें है ॥ णिक्ष धातु चुम्बन करनेमें है। प्रणिक्षति ॥ तृक्ष, स्तृक्ष और णक्ष धातु गमन करनेमें हैं । तृक्षति । स्तृक्षति । नक्षति ॥ वक्ष धातु क्रोध करनेमें है । किसी २ मतमें संघात अर्थमें है॥मृक्ष धातु संघातार्थमें है । कोई२म्रक्ष धातु उक्तार्थमें पढतेहैं ॥ तक्ष धातु त्वचनमें है अर्थात् संवरण और त्वक्के ग्रहणमें है ॥ पक्ष धातु परिग्रहमें है ॥ सूर्क्ष धातु आदरमें है । सुसूर्क्ष । कोई २ कहतेहैं कि यह धातु 'अनादरे' ऐसे कहीं२ पाठके कारण अनादर अर्थमें है, परन्तु 'अनादरे' यह अपपाठ है कारण कि, अवज्ञा, अवहेलन और असूर्क्षण यह पर्य्यायशब्द हैं ऐसा अमरकोशमें है ॥

काक्षि, वाक्षि और माक्षि धातु कांक्षार्थमें हैं ॥ द्राक्षि,ध्राक्षि और ध्वाक्षि धातु घोर ध्वनिमें हैं॥ चूष धातु पान करनेमें है॥ तूष धातु तुष्टिमें है ॥ पूष धातु वृद्धिमें है ॥ मूष धातु चोरी करनेमें है ॥ लूष और रूष धातु भूषा करनेमें है ॥ शूष धातु प्रसव अर्थात् अभ्यनुज्ञामें है । यह धातु तालव्य और ऊष्मादि है ॥ यूष और जूष धातु हिंसा करनेमें हैं । जूषति ॥ भूष धातु अलङ्कार अर्थमें है ॥ ऊष धातु पीडित करनेमें है । ऊषाञ्चकार ॥ ईष धातु उञ्छार्थमें है ॥ कष, खष, शिष, जष, झष, शष, वष, मष, रुष और रिष धातु हिंसार्थमें हैं । इनमेंसे तीसरा और छठवां धातु तालव्य और ऊष्मादि है और सातमां दन्त्योष्ठ्यादि है । चकाष । चखाष । शिशेष । शिशेषिथ । शेष्टा । क्स प्रत्यय होकर–अशिक्षत् । अशेक्ष्यत् । जेषतुः । जझषतुः । शेषतुः । ववषतुः । मेषतुः ॥

२३४० तीषसहलुभरुषरिषः।७।२।४८॥

इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात् । रोषिता–रोष्टा । रोषिष्यति । रेषिता–रेष्टा । रेषिष्यति ॥ ४३ ॥ भष भर्त्सने । इह भर्त्सनं श्वरवः । भषति । बभाष ॥ ४४ ॥ उष दाहे । ओषति ॥

२३४०–ईष,सह,लुभ,रुष और रिष इन धातुओंके परे जो तकारादि आर्धधातुक प्रत्यय उनको विकल्प करके इट् आगम हो।रोषिता,रोष्टा।रोषिष्यति।रेषिता,रेष्टा।रेषिष्यति॥भष धातु भर्त्सनार्थमें है। इस स्थलमें भर्त्सन शब्दसे कुक्कुरका शब्द जानना। भषति । बभाष ॥ उष धातु दाहमें है । ओषति ॥

२३४१ उषविदजागृभ्योऽन्यतरस्याम् । ३ । १ । ३८ ॥

एभ्यो लिट्याम्वा स्यात् । ओषांचकार । उवोष । ऊषतुः । उवोषिथ ॥ ४९ ॥ जिषु विषु मिषु सेचने । जिजेष । क्रादिनियमादिट् । विवेषिथ । विवेषिव । वेष्टा । वेक्ष्यति । अविक्षत् ॥ ४८ ॥ पुष पुष्टौ । पोषति । पोषिता । पोषिष्यति । अपोषीत् । अनिट्सु पुष्येति श्यना निर्देशादयं सेट् अतो न क्सः । अङ्विधौ दैवादिकस्य ग्रहणान्नाङ्॥४९॥ श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। शिश्रेष ।श्रेषिता। श्लेषति । शिश्लेष-श्लेषिता । अयमपि सेट् । अनिट्सु दैवादिकस्यैव ग्रहणमिति कैयटादयः। यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तम्, तत्त्वोक्तिविरोधाद्ग्रन्थान्तरविरोधाच्चोपेक्ष्यम् । पुप्रोष । पुप्लोष ॥ ५३ ॥ पृषु वृषु मृषु सेचने । मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च । पर्षति । पपर्ष । पृष्यात् ॥ ५६ ॥ घृषु संघर्षे ॥ ५७ ॥ हृषु अलीके ॥ ५८ ॥ तस ह्लस ह्रस रस शब्दे । ततास । जह्लास । जह्रास । ररास ॥ ६२ ॥ लस श्लेषणक्रीडनयोः ॥ ६३ ॥ घस्लृ अदने । अयं न सार्वत्रिकः । लिट्यन्यतरस्यामित्यदेर्घस्लादेशविधानात् । ततश्च यत्र लिंगं वचनं वास्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिंगम् । लृदित्करणमङि । अनि-

इकारिकासु पाठो वलाद्यार्धातुके । क्मरचि तु विशिष्योपादानम् । घसति । घस्ता ॥

२३४१-लिट् लकार परे रहते उष, विद और जागृ धातुके उत्तर विकल्प करके आम् प्रत्यय हो । ओषाञ्चकार । उवोष । ऊषतुः । उवोषिथ ॥ जिषु, विषु और मिषु धातु सेचन करनेमें हैं । जिजेष । क्रादिनियमके कारण इट् होगा । विवेषिथ । विवेषिव । वेष्टा । वेक्ष्यति । अविक्षत् ॥ पुष धातु पुष्टिमें है । पोषति । पोषिता । पोषिष्यति । अपोषीत् ।

अनिट्कारिकामें 'पुष्य' ऐसे श्यन्युक्त धातुके निर्देशके कारण यह धातु सेट् है, इस कारण इसके उत्तर 'क्स' आदेश नहीं होगा, और टाङ् विधिमें दिवादिके ग्रहणके कारण इस स्थलमें अङ् भी नहीं होगा ।

श्रिषु, श्लिषु, प्रुषु, और प्लुषु धातु दाहमें हैं । श्रेषति । शिश्रेष । श्रेषिता । श्लेषति । शिश्लेष । श्लेषिता । यह धातु भी सेट् है, अनिट्कारिकामें दिवादिगणीय श्लिष धातुका ही ग्रहण होताहै यह कैयटादिका मत है । अनिट्कारिकाके न्यास-ग्रन्थमें दोनोंका ही ग्रहण होताहै ऐसा जो कहतेहैं वह स्वोक्त ग्रन्थान्तरोंके विरुद्ध होनेसे उपेक्षणीय है । पुप्रोष । पुप्लोष ॥

पृषु, वृषु और मृषु धातु सेचनार्थमें हैं । मृषु धातु सह-नार्थमें भी है । अन्य दो हिंसा और संक्लेशनार्थक भी हैं । पर्षति । पपर्ष । पृष्यात् ॥ घृषु धातु संघर्षमें है ॥ हृषु धातु अलीकार्थमें है ।

तुस, ह्रस ह्लस और रस धातु शब्द करनेमें हैं । तुतोष । जह्रास । जह्लास । ररास ॥ लस धातु श्लेषण और क्रीडामें है ॥

घस्लृ धातु भक्षणार्थमें है । लिट् परे अद् धातुके स्थानमें विकल्प करके घस् आदेश होने (२४२४) के कारण यह धातु सार्वत्रिक नहीं है, इस कारण जिस स्थानमें लिङ्ग वा वचन है, उस स्थानमें ही इसका प्रयोग होगा, इस स्थल (भ्वादि) में पाठके कारण परस्मैपदमें शप्विषय रहते लृकार इत्संज्ञक होनेके कारण और अङ्विषयमें, अनिट्कारिकाके मध्यमें पाठके कारण वलादि आर्धधातुक विषयमें इसके प्रयोग होंगे । क्मरच् प्रत्यय परे रहते इसका विशेष रूपसे उपादान होगा । घसति । घस्ता ॥

२३४२ सः स्यार्धधातुके । ७ । ४ । ४९ ॥

सस्य तः स्यात्सादावार्धधातुके । घत्स्यति । घसतु । अघसत् । घसेत् । लिंगाद्यभावादाशिष्यप्रयोगः ॥

२३४२-सकारादि आर्धधातुक प्रत्यय परे रहते धातुके सकारके स्थानमें तकार हो, जैसे-घत्स्यति । घसतु । अघसत् । घसेत् । लिङ्गादिके अभावके कारण आशीर्वादार्थमें इसका प्रयोग नहीं होगा ॥

२३४३ पुषादिद्युताद्य्लृदितः परस्मैपदेषु । ३ । १ । ५५ ॥

श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् ॥ ६४ ॥ जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु ॥ ६७ ॥ पिसृ पेसृ गतौ । पिपिसतुः । पिपेसतुः ॥ ६९ ॥ हसे हसने । एदित्त्वान्न वृद्धिः । अहसीत् ॥ ७० ॥ णिश समाधौ । तालव्योष्मान्तः । प्रणेशति ॥ ॥ ७१ ॥ मिश मश शब्दे रोषकृते च । तालव्योष्मान्तौ ॥ ७३ ॥ शव गतौ ॥ दन्त्योष्ठ्यान्तस्तालव्योष्मादिः । शवति ॥ अशावीत्-अशवीत् ॥ ७४ ॥ शश प्लुतगतौ । तालव्योष्माद्यन्तः । शशाश । शेशतुः । शेशुः । शेशिथ । ॥ ७५ ॥ शसु हिंसायाम् । दन्त्योष्मान्तः । न शसददेत्येत्वं न । शशसतुः । शशसुः । शशसिथ ॥ ७६ ॥ शंसु स्तुतौ । अयं दुर्गतावपीति दुर्गः । नृशंसो घातुकः क्रूर इत्यमरः । शशंस । आशिषि नलोपः । शस्यात् ॥ ७७ ॥ चह परिकल्कने । परिकल्कनं शाठ्यम् । अचहीत् ॥ ७८ ॥ मह पूजायाम् । अमहीत् ॥ ७९ ॥ रह त्यागे ॥ ८० ॥ रहि गतौ । रंहति । रंह्यात् ॥ ८१ ॥ दृह दृहि बृह बृहि वृद्धौ । दर्हति । ददर्ह । ददृहतुः । दृंहति । बर्हति । बृंहति । बृहि शब्दे च । बृंहितं करिगर्जितम् । ॥ ८५ ॥ बृहिर् इत्येके । अबृहत्-अबर्हीत् ॥ ८६ ॥ तुहिर् दुहिर् उहिर् अर्दने । तोहति । तुतोह । अतुहत्-अतोहीत् । दोहति । अदुहत्-अदोहीत् । अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति । ओहति । उवोह । ऊहतुः । ओहिता । मा भवानुहत् । औहीत् ॥ ८९ ॥ अर्ह पूजायाम् । आनर्ह ॥ ९० ॥ अथ कृपूपर्यन्ता अनुदात्तेतः ॥ द्युत दीप्तौ । द्योतते ॥

२३४३-परस्मैपदमें श्यन् विकरण हो जिनसे ऐसे जो पुषादि धातु, द्युतादि धातु और ऋकारइत् धातु उनके उत्तर च्लिके स्थानमें अङ् आदेश हो । अघसत् ॥ जर्ज, चर्च और झर्झ धातु परिभाषण, हिंसा और तर्जनार्थमें हैं ॥ पिस और पेसृ धातु गतिमें हैं । पिपिसतुः । पिपेसतुः ॥ हसे धातु हास्य करनेमें है । एकारइत्के कारण वृद्धि न होगी-अहसीत् ॥ णिश धातु समाधि अर्थमें है । यह तालव्य ऊष्मवर्णान्त है । प्रणेशति ॥ मिश और मश धातु शब्द और रोष करनेमें हैं । यह दो धातु तालव्य ऊष्मवर्णान्त हैं ॥ शव धातु गति अर्थमें है । यह धातु दन्त्योष्ठ्यान्त और तालव्य ऊष्मादि हैं । शवति । अशावीत-अशवीत् ॥ शश धातु प्लुतगतिमें है । यह तालव्य ऊष्माद्यन्त है । शशाश । शेशतुः । शेशुः । शेशिथ ।

शसु धातु हिंसार्थमें है । यह धातु दन्त्योष्मान्त है, " न शसदद० २२६३ " इस सूत्रसे एत्वका निषेध होगा-शश-

सतुः । शशसुः । शशसिथ ॥ शंसु धातु स्तुतिमें है । यह धातु दुर्गतार्थमें भी जानना । नृशंस, घातुक, क्रूर–इत्यादि शब्द अमरकोशमें एकपर्यायमें लिखेहैं । शशंस । आशीर्थमें नकारका लोप होगा । शस्यात्॥ चह धातु परिकल्कन अर्थात् शठतामें है । अचहीत् ॥ मह धातु पूजार्थमें है । अमहीत् ॥रह धातु त्याग करनेमें है ॥ रहि धातु गति अर्थमें है । रंहति । रंह्यात् ॥ दृह, दृहि, बृह और बृहि धातु वृद्धिमें हैं । दर्हति । ददर्ह । ददृहतुः । दृंहति । बर्हति । बृंहति । बृहि धातु शब्द करनेमें भी है । बृंहित शब्दसे हाथीकी गर्जना जाननी । कोई उसको बृहिर् धातु कहतेहैं । अबृहत्, अबर्हीत् ।

तुहिर्, दुहिर् और उहिर् धातु अर्दन करनेमें हैं । तोहति । तुतोह । अतुहत्, अतोहीत् । दोहति । अदुहत्, अदोहीत् । अनिट्कारिकामें इस दुह धातुका ग्रहण नहीं है । ओहति । उवोह । ऊहतुः । ओहिता । मा भवानूहत् । औहीत् ॥ अर्ह धातु पूजार्थमें है । आनर्ह ।

अब कृप् धातु पर्य्यन्त अनुदात्तेत् कहतेहैं–।

द्युत धातु दीप्तिमें है । द्योतते ॥

२३४४ द्युतिस्वाप्योः संप्रसारणम् । ७ । ४ । ६७ ॥

अनयोरभ्यासस्य संप्रसारणं स्यात् । दिद्युते । दिद्युताते । द्योतिता ॥

२३४४–द्युति और स्वप धातुके अभ्यासको संप्रसारण हो। दिद्युते । दिद्युताते । द्योतिता ॥

२३४५ द्युद्भ्यो लुङि । १ । ३ । ९१ ॥

द्युतादिभ्यो लुङः परस्मैपदं वा स्यात् । पुषादिसूत्रेण परस्मैपदेऽङ् । अद्युतत्–अद्योतिष्ट ॥ १ ॥ श्विता वर्णे । श्वेतते । शिश्विते । अश्वितत् । अश्वेतिष्ट ॥२॥ ञिमिदा स्नेहने । मेदते ॥

२३४५–द्युतादि धातुके उत्तर लुङ्का परस्मैपद विकल्प करके हो "पुषादि०" इस सूत्रसे परस्मैपदमें अङ् होगा–अद्युतत् । अद्योतिष्ट ॥ श्विता धातु वर्णमें है । श्वेतते । शिश्विते । अश्वितत् । अश्वेतिष्ट ॥ ञिमिदा धातु स्नेह करनेमें है । मेदते ॥

२३४६ मिदेर्गुणः । ७ । ३ । ८२ ॥

मिदेरिको गुणः स्यादित्संज्ञकशकारादौ । एश आदिशित्त्वाभावान्नानेन गुणः । मिमिदे । अमिदत् । अमेदिष्ट ॥ ३ ॥ ञिष्विदा स्नेहनमोचनयोः । मोहनयोरित्येके । स्वेदते । सिष्विदे । अस्विदत् । अस्वेदिष्ट ॥४॥ ञिक्ष्विदा चेत्येके । अक्ष्विदत् । अक्ष्वेदिष्ट ॥ ५ ॥ रुच दीप्तावभिप्रीतौ च । रोचते सूर्यः । हरये रोचते भक्तिः । अरुचत् । अरोचिष्ट ॥ ६ ॥ घुट परिवर्तने । घोटते । जुघुटे । अघुटत् । अघोटिष्ट ॥ ७ ॥ रुट लुट लुठ प्रतिघाते । अरुटत् । अरोटिष्ट ॥१०॥ शुभ दीप्तौ ॥ ११ ॥ क्षुभ सञ्चलने ॥ १२ ॥ णभ तुभ हिंसायाम् । आद्योऽभावेऽपि । नभन्तामन्यके समे । मा भूवन्नन्यके सर्वे इति निरुक्तम् । अनभत् । अनभिष्ट । अतुभत् । अतोभिष्ट । इमौ दिवादौ क्र्यादौ च ॥ १४ ॥ स्रंसु ध्वंसु भ्रंसु अवस्रंसने । ध्वंसु गतौ च । अङि नलोपः । अस्रसत् । अस्रंसिष्ट । नास्रसत्करिणां ग्रैवमिति रघुकाव्ये । भ्रशु इत्यपि केचित्पेठुः । अत्र तृतीय एव तालव्यान्त इत्यन्ये । भ्रशु भ्रंशु अधःपतन इति दिवादौ ॥१९॥ स्रम्भु विश्वासे । अस्रभत् । अस्रम्भिष्ट । दन्त्यादिरयम् । तालव्यादिस्तु प्रमादे गतः ॥२०॥ वृतु वर्तने । वर्तते । ववृते ॥

२३४६–इत्संज्ञक सकारादि प्रत्यय परे रहते मिद् धातुके इकारको गुण हो । जिस स्थानमें नकारके तके स्थानमें एश् आदेश होगा, उस स्थानमें आदिशित्त्वाभावके कारण इस सूत्रसे गुण नहीं होगा । मिमिदे । अमिदत् । अमेदिष्ट ॥ ञिष्विदा धातु स्नेह और मोचनार्थमें है । किसीके मतमें मोहनार्थमें भी है । स्वेदते । सिष्विदे । अस्विदत् । अस्वेदिष्ट ॥ किसीके मतमें ञिक्ष्विदा धातु भी उक्तार्थक है । अक्ष्विदत् । अक्ष्वेदिष्ट ॥ रुच धातु दीप्ति और अभिप्रीतिमें है । रोचते सूर्यः । हरये रोचते भक्तिः । अरुचत् । अरोचिष्ट ।

घुट धातु परिवर्तनमें है । घोटते । जुघुटे । अघुटत् । अघोटिष्ट । रुट, लुट और लुठ धातु प्रतिघातार्थमें है । अरुटत् । अरोटिष्ट ॥

शुभ धातु दीप्तिमें है ॥ क्षुभ धातु संचलनार्थमें है । णभ और तुभ हिंसार्थमें हैं । "नभन्तामन्यके समे" "मा भूवन्नन्यके सर्वे" इस निरुक्तके अनुसार पहलेका अभावार्थ भी है । अनभत् । अनभिष्ट । अतुभत् । अतोभिष्ट । यह दो धातु दिवादि और क्र्यादिगणी हैं ॥

स्रंसु, ध्वंसु और भ्रंसु धातु अवस्रंसनार्थमें हैं ॥ ध्वंस धातुका गति अर्थ भी जानना । अङ् परे रहते धातुके नकारका लोप होगा–अस्रसत् । अस्रंसिष्ट "नास्रसत् करिणां ग्रैवम्" ऐसा रघुवंशमें प्रयोग है । अस्रंसिष्ट । कोई २ भ्रंशु धातुका भी यही अर्थ कहतेहैं, इनमेंसे तीसरा धातु ही तालव्यशकारान्त है, यह किसी पंडितका मत है । दिवादि गणमें अधः पतनार्थमें भ्रशु और भ्रंशु धातु लिखी हैं॥स्रम्भु धातु विश्वास करनेमें है । अस्रभत् । अस्रम्भिष्ट । यह धातु दन्त्यादि हैं, कोई २ तालव्यादि भी कहते हैं, परन्तु यह उनका प्रमाद है ।

वृतु धातु वर्तनार्थमें है । वर्त्तते । ववृते ॥

२३४७ वृद्भ्यः स्यसनोः । १ । ३ । ९२ ॥

वृतादिभ्यः परस्मैपदं वा स्यात्स्ये सनि च ॥

२३४७-स्य और सन् प्रत्यय परे रहते वृतादि धातुओंके उत्तर विकल्प करके परस्मैपद हो ।

२३४८ न वृद्भ्यश्चतुर्भ्यः । ७ । २।५९॥

एभ्यः सकारादेरार्धधातुकस्येण्न स्यात्तङानयोरभावे । वर्त्स्यति-वर्तिष्यते । अवृतत् । अवर्तिष्ट । अवर्त्स्यत्-अवर्तिष्यत् ॥ २१ ॥ वृधु वृद्धौ । शृधु शब्दकुत्सायाम् । इमौ वृतिवत्॥२३॥ स्यन्दू प्रस्रवणे । स्यन्दते । सस्यन्दे । सस्यन्दिषे-सस्यन्त्से । सस्यन्दिध्वे-सस्यन्ध्वे । स्यन्दिता-स्यन्ता । वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदिल्लक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्न वृद्भ्य इति निषेधः। स्यन्त्स्यति-स्यन्दिष्यते-स्यन्त्स्यते । स्यन्दिषीष्ट-स्यन्त्सीष्ट । द्युद्भ्यो लुङीति परस्मैपदपक्षे अङ् । नलोपः । अस्यदत् । अस्यन्दिष्ट-अस्यन्त । अस्यन्त्साताम् । अस्यन्त्सत । अस्यन्त्स्यत् । अस्यन्दिष्यत-अस्यन्त्स्यत ॥

२३४८-तङ् और आन(शानच्, कानच्)के अभाव होनेपर वृतादि चार धातुओंके उत्तर सकारादि आर्धधातुक प्रत्ययको इट् न हो, जैसे-वर्त्स्यति । वर्तिष्यते । अवृतत् । अवर्तिष्ट । अवर्त्स्यत्, अवर्तिष्यत् ॥ वृधु धातु वृद्धि अर्थमें है । शृधु धातु शब्द और कुत्सार्थमें है । इन दोनों धातुओंके वृतु धातुके समान रूप होंगे । स्यन्दू धातु प्रस्रवणमें है । स्यन्दते। सस्यन्दे । सस्यन्दिषे, सस्यन्त्से । सस्यन्दिध्वे, सस्यन्ध्वे । स्यन्दिता, स्यन्ता ।

"वृद्भ्यः स्यसनोः २३४७" इस सूत्रसे परस्मैपद करनेपर ऊदिल्लक्षण अन्तरङ्ग भी विकल्पको बाधकर चतुर्ग्रहण सामर्थ्यके कारण "न वृद्भ्यः २३४८" इस सूत्रसे इट् निषेध होगा-स्यन्त्स्यति, स्यन्दिष्यते, स्यन्त्स्यते । स्यन्दिषीष्ट, स्यन्त्सीष्ट । "द्युद्भ्यो लुङि२३४५" इस सूत्रसे परस्मैपद पक्षमें अङ् और नकारका लोप होकर-अस्यदत् । अस्यन्दिष्ट, अस्यन्त । अस्यन्त्साताम् । अस्यन्त्सत । अस्यन्त्स्यत् । अस्यन्दिष्यत, अस्यन्त्स्यत ॥

२३४९ अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु । ८ । ३ । ७२ ॥

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्।अनुष्यन्दते-अनुस्यन्दते वा जलम्। अप्राणिषु किम्।अनुस्यन्दते हस्ती। अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यन्दते इत्यत्रापि पक्षे षत्वं भवत्येव प्राणिषु नेत्युक्तौ तु न स्यात्॥ ॥ २४ ॥ कृपू सामर्थ्ये ॥

२३४९-अनु, वि, परि, अभि और निपूर्वक अप्राणि कर्तृक स्यन्द धातुके सकारके स्थानमें विकल्प करके षकार हो, अनुष्यन्दते, अनुस्यन्दते वा जलम् । प्राणिकर्तृकमें अनुस्यन्दते हस्ती ।

'अप्राणिषु' इस पर्युदासके कारण 'मत्स्योदके अनुष्यन्दते' इस स्थलमें भी विकल्प करके षत्व होताही है, प्राणिकर्तृकमें नहीं हो, ऐसा कहते तो इस स्थानमें षत्व नहीं होता ॥ कृपू धातु सामर्थ्यार्थमें है ॥

२३५० कृपो रो लः । ८ । २ । १८॥

कृप उः इति च्छेदः । कृपेति लुप्तषष्ठीकम् । तच्चावर्तते । कृपो यो रेफस्तस्य लः स्यात् । कृपेः ऋकारस्यावयवो यो रः रेफसदृशस्तस्य च लकारसदृशः स्यात् । कल्पते । चक्लपे । चक्लपिषे-चक्लप्से इत्यादि स्यन्दिवत् ॥

२३५०-'कृप-उः' ऐसा पदच्छेद है 'कृप' यह लुप्तषष्ठ्यन्त है, उसकी आवृत्ति है, तब कृप धातुके रकारके स्थानमें लकार हो और कृप धातुके ऋकारका अवयव जो रेफ सदृश रकार उसको लकारसदृश आदेश हो, जैसे-कल्पते । चक्लपे । चक्लपिषे, चक्लप्से, इत्यादि स्यन्दि धातुकी समान होंगे ॥

२३५१ लुटि च क्लपः । १ । ३।९३॥

लुटि स्यसनोश्च क्लपेः परस्मैपदं वा स्यात्॥

२३५१-लुट् लकार और स्य तथा सन् परे रहते कृप धातुके उत्तर विकल्प करके परस्मैपद हो ॥

२३५२ तासि च क्लपः । ७ ।२।६०॥

क्लपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्तङानयोरभावे । कल्प्तासि । कल्प्तास्थः । कल्पितासे-कल्प्तासे । कल्प्स्यति । कल्पिष्यते-कल्प्स्यते । कल्पिषीष्ट-क्लृप्सीष्ट । अक्लपत् । अकल्पिष्ट-अक्लृप्त । अकल्प्स्यत् । अकल्पिष्यत-अकल्प्स्यत ॥ वृत् ॥ वृत्तः सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः ॥ २५ ॥

अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः षितश्च । घट चेष्टायाम् । घटते । जघटे । घटादयो मित इति वक्ष्यमाणेन मित्संज्ञा । तत्फलं तु णौ मितां ह्रस्व इति चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति च वक्ष्यते । घटयति । विघटयति । कथं तर्हि कमलवनोद्घाटनं कुर्वते ये, प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवेत्यादि । शृणु । घट सङ्घात इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषे मित्वार्थमनुवादोऽयमिति वाच्यम्।नान्ये मितोऽहेताविति निषेधात् । अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः। ॥ १ ॥ व्यथ भयसञ्चलनयोः । व्यथते ॥

२३५२-तङ् और आन (शानच्, कानच्) इन दोके अभाव रहते कृप धातुके परे स्थित तासि और सकारादि आर्धधातुक प्रत्ययको इट् न हो- कल्तासि । कल्तास्थः । कल्पितासे, कल्प्तासे । कल्प्स्यति । कल्पिष्यते, कल्प्स्यते । कल्पिषीष्ट, क्लृप्सीष्ट । अक्लृपत् । अकल्पिष्ट । अकल्प्स्यत् । अकल्पिष्यत, अकल्प्स्यत । वृतादि और द्युतादि धातु सम्पूर्ण हुए ॥

अब त्वर धातु पर्यन्त १३ अनुदात्तेत् और षित् धातु कहे जातेहैं । घट धातु चेष्टामें है । घटते । जघटे ।

"घटादयो मितः" इस वक्ष्यमाण सूत्रसे मित् संज्ञा हुई, मित् संज्ञाका फल तो "मितां ह्रस्वः" इससे ह्रस्व और "चिण्णमुलोर्दीर्घोऽन्यतरस्याम् २३६२" इस वक्ष्यमाण सूत्रसे चिण् और णमुल् प्रत्यय परे रहते धातुको विकल्प करके दीर्घ कहेंगे-घटयति । विघटयति ।

मितां ह्रस्वः इसको जागरूक रहते जो कहो "कमलवनोद्घाटनं कुर्वते ये" "प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव" इत्यादि स्थलमें दीर्घप्रयोग कैसे हुआ ? तो सुनो "घट संघाते" यह चुरादिगणीय घट धातुका प्रयोग है, यदि कहो कि, संघातार्थक चुरादिगणीय घट धातुके ही अर्थ विशेषमें, अर्थात् चेष्टार्थमें मित् संज्ञा होनेके निमित्त ऐसा अनुवाद है, सो भी "नान्ये मितोऽहेतौ" इस सूत्रसे मित् संज्ञाके निषेधके कारण नहीं कहसकते हो । अहेतु अर्थात् स्वार्थमें विहित णिच् परे रहते ज्ञपादि पांच धातु भिन्न चुरादि गणीय धातुकी मित्संज्ञा न हो ॥ व्यथ धातु भय और संचलनार्थमें है । व्यथते ॥

२३५३ व्यथो लिटि । ७ । ४ । ६८ ॥

व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि । हलादिःशेषापवादः । थस्य हलादिःशेषेण निवृत्तिः। विव्यथे ॥ २ ॥ प्रथ प्रख्याने । पप्रथे ॥ ३ ॥ प्रस विस्तारे । पप्रसे ॥ ४ ॥ म्रद मर्दने ॥ ५ ॥ स्खद स्खदने । स्खदनं विद्रावणम् ॥ ६ ॥ क्षजि गतिदानयोः । मित्त्वसामर्थ्यादनुपधात्वेपि चिण्णमुलोरिति दीर्घविकल्पः । अक्षाञ्जि-अक्षञ्जि । क्षाञ्जंक्षाञ्जम्-क्षञ्जंक्षञ्जम् ॥ ७ ॥ दक्ष गतिहिंसनयोः। योऽयं वृद्धिशैघ्ययोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषे मित्त्वार्थोनुवादः ॥ ८ ॥ क्रप कृपायां गतौ ॥ ९ ॥ कदि क्रदि क्लदि वैक्लव्ये । वैकल्य इत्येके । त्रयोप्यनिदित इति नन्दी । इदित इति स्वामी । कदिक्रदी इदितौ, क्लद क्लदेति चानिदिताविति मैत्रेयः । कदिक्रदिक्लदी नामाह्वानरोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च ॥ १२ ॥ ञित्वरा संभ्रमे ॥ १३ ॥ घटादयः षितः । षित्त्वादङ् कृत्सु वक्ष्यते ॥

२३५३-लिट् परे रहते व्यथ धातुके अभ्यासको संप्रसारण हो, यह सूत्र हलादिःशेषका अपवाद है । "हलादिःशेषः" इस सूत्रसे थकारकी निवृत्ति हुई-विव्यथे ॥ प्रथ धातु प्रख्यानार्थमें है । पप्रथे ॥ प्रस धातु विस्तारमें है । पप्रसे ॥ म्रद धातु मर्दनार्थमें है ॥ स्खद धातु स्खदन, अर्थात् विद्रावणार्थमें है ॥ क्षजि धातु गति और दानार्थमें है ।

मित्त्वसामर्थ्यके कारण अनुपधाभूत अच् होनेपर भी "चिण्णमुलोः २७६२" इस सूत्रसे विकल्प करके दीर्घ होकर-अक्षाञ्जि, अक्षञ्जि । क्षाञ्जंक्षाञ्जम्, क्षञ्जंक्षञ्जम् ॥

दक्ष धातु गति और हिंसार्थमें है । जो दक्ष धातु वृद्धि और शैघ्यार्थमें आत्मनेपदीमें पढा है, उसका ही अर्थविशेषमें, अर्थात् गति और हिंसार्थमें मित्संज्ञाके निमित्त इस स्थलमें अनुवाद कियाहै ॥

क्रप धातु कृपा और गति अर्थमें है ॥ कदि, क्रदि और क्लदि धातु वैक्लव्य और किसी२के मतसे वैकल्य अर्थमें है । नन्दीके मतसे यह तीनों धातु अनिदित् हैं । स्वामीके मतसे इदित् हैं ॥ मैत्रेयके मतसे कदि और क्रदि धातु इदित्, और "क्रद, क्लद" दो धातु अनिदित् हैं । आह्वान और रोदनार्थमें परस्मैपदी धातुके मध्यमें उक्त कदि, क्रदि और क्लदि धातुका इस स्थलमें पाठ मित्वार्थ और आत्मनेपदार्थ जानना ॥ ञित्वरा धातु सम्भ्रमार्थमें है ॥

घटादि धातु षित् हों । षित्त्वके कारण अङ् प्रत्यय कृदन्तमें कहेंगे ॥

अथ फणान्ताः परस्मैपदिनः ॥ ज्वर रोगे । ज्वरति । जज्वार ॥ १ ॥ गड सेचने । गडति । जगाड ॥ २ ॥ हेड वेष्टने । हेडृ अनादर इत्यात्मनेपदिषु गतः स एवोत्सृष्टानुबन्धोनूद्यते अर्थविशेषे मित्त्वार्थम्।परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येऽनुवादसामर्थ्यात्परस्मैपदम् । हेडति । जिहेड । हिडयति । अहीडि-अहिडि।अनादरे तु हेडयति॥३॥वट भट परिभाषणे । वट वेष्टने भट भृताविति पठितयोः परिभाषणे मित्त्वार्थोनुवादः ॥ ५ ॥ नट नृत्तौ । इत्थमेव पूर्वमपि पठितं तत्रायं विवेकः । पूर्वं पठितस्य नाट्यमर्थः । यत्कारिषु नटव्यपदेशः । वाक्यार्थाभिनयो नाट्यम् । घटादौ तु नृत्तं नृत्यं चार्थः । यत्कारिषु नर्तकव्यपदेशः । पदार्थाभिनयो नृत्यम् । गात्रविक्षेपमात्रं नृत्तम् । केचित्तु घटादौ नट नताविति पठन्ति । गतावित्यन्ये । णोपदेशपर्युदासवाक्ये भाष्यकृता नाटीतिदीर्घपाठाद् घटादिर्णोपदेश एव ॥ ६ ॥ ष्टक प्रतिघाते । स्तकति ॥ ७ ॥ चक तृप्तौ । तृप्तिप्रतिघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थो-

नुवादः । आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम् ॥ ८ ॥ कखे हसने । एदित्वान्न वृद्धिः । अकखीत् ॥ ९ ॥ रगे शंकायाम् ॥ १० ॥ लगे सङ्गे ॥ ११ ॥ ह्रगे ह्लगे षगे ष्टगे संवरणे ॥ १५ ॥ कगे नोच्यते । अस्यायमर्थ इति विशिष्य नोच्यते क्रियासामान्यार्थत्वात् । अनेकार्थत्वादित्यन्ये ॥ १६ ॥ अक अग कुटिलायां गतौ ॥ १८ ॥ कण रण गतौ । चकाण । रराण ॥ २० ॥ चण शण श्रण दाने च । शण गतावित्यन्ये ॥ २३ ॥

अत्र फण धातु पर्यन्त परस्मैपदी धातु कहतेहैं ।

ज्वर धातु रोगार्थमें है, ज्वरति । जज्वार॥ गड धातु सेचनार्थमें है । गडति । जगाड ॥

हेड धातु वेष्टनार्थमें है ॥ हेडृ धातु अनादरार्थमें आत्मनेपदी पूर्वमें कह आयेहैं, वही अनुबंधवर्जित अर्थविशेषमें मित्संज्ञार्थ अनूदित हुआहै । परस्मैपदी ज्वरादि धातुओंके पूर्वमें ही अनुवाद कर्तव्य होनेपर उसके मध्यमें अनुवादसामर्थ्यके कारण परस्मैपद होगा, हेडति । जिहेड । हिडयति । अहीडि, अहिडि । अनादरार्थमें तो 'हेडयति' ऐसा होगा ॥

वट और भट धातु परिभाषणार्थमें हैं । वट धातु वेष्टनार्थमें और भट धातु भरणार्थमें पहले पठित हैं उनका परिभाषणार्थमें मित्वार्थ यहां अनुवाद है ॥

नट धातु नृत्यमें है । ऐसा ही पूर्वमें पढा है, वहां यह जानना चाहिये कि, पूर्व पठित धातुका अर्थ नाट्य है, जिसके करनेवालेको 'नट' कहतेहैं । वाक्यार्थके अभिनयको नाट्य कहतेहैं । घटादिमें तो नट धातुका नृत्त और नृत्य अर्थ है, जिसको करनेवालेमें नर्त्तकव्यवहार होताहै । पदार्थाभिनयको नृत्य कहतेहैं । गात्रविक्षेपमात्रको नृत्त कहतेहैं । कोई तो घटादिमें नट धातुका नति अर्थ करतेहैं । कोई उसका गत्यर्थ कहतेहैं । णोपदेशपर्य्युदास वाक्यमें भाष्यकृतसे 'नाटि' ऐसा दीर्घ पाठ करनेके कारण घटादि गणीय नट धातु णोपदेश ही है ॥

ष्टक धातु प्रतिघातमें है । स्तकति ॥

चक धातु तृप्तिमें है । तृप्ति और प्रतिघातार्थमें पूर्वमें पठित इस धातुका तृप्तिमात्रमें जो अनुवाद, वह मित्संज्ञार्थ जानना । आत्मनेपदी धातुके मध्यमें पठित धातुके परस्मैपदमें अनुवादके कारण परस्मैपद होगा ॥ कखे धातु हसन अर्थमें है । एकार इत् होनेके कारण वृद्धि न होकर--अकखीत् ॥ रगे धातु शंकार्थमें है ॥ लगे धातु सङ्ग अर्थमें है ॥

ह्रगे, ह्लगे, षगे और ष्टगे धातु संवरणार्थमें हैं ॥ क्रियासामान्यार्थत्व और किसीके मतसे अनेकार्थत्वके कारण कगे धातु विशेष करके नहीं कहाजाताहै ॥ अक और अग धातु कुटिल गतिमें हैं ॥ कण और रण धातु गातम हैं । चकाण । रराण ॥ चण, शण और श्रण धातु दानार्थमें हैं । कोई २ कहतेहैं कि, शण धातु गतिमें है ॥

श्रथ श्लथ क्नथ क्लथ हिंसार्थाः । जासिनिप्रहणेतिसूत्रे क्राथेति मित्वेपि वृद्धिर्निपात्यते । क्राथयति । मित्त्वं तु निपातनात्परत्वाच्चिण्णमुलोरिति दीर्घे चरितार्थम् । अक्राथि-अक्नथि । क्राथंक्राथम्, क्नथंक्नथम् ॥ २७ ॥ वन च । हिंसायामिति शेषः ॥ २८ ॥ वनु च नोच्यते । वनु इत्यपूर्व एवायं धातुर्न तु तानादिकस्यानुवादः । उदित्करणसामर्थ्यात् । तेन क्रियासामान्ये वनतीत्यादि । प्रवनयति । अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते ॥ २९ ॥ ज्वल दीप्तौ । णप्रत्ययार्थं पठिष्यमाण एवायं मित्त्वार्थमनूद्यत । प्रज्वलयति ॥ ३० ॥ ह्वल ह्मल चलने । प्रह्वलयति । प्रह्मलयति ॥ ३२ ॥ स्मृ आध्याने । चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोनुवादः । आध्यानमुत्कण्ठापूर्वकं स्मरणम् ॥ ३३ ॥ दॄ भये, दॄ विदारणे इति क्र्यादेरयं मित्वार्थोनुवादः । दृणन्तं प्रेरयति दरयति । भयादन्यत्र दारयति । धात्वन्तरमेवेदमिति मते तु दरतीत्यादि । केचिद्घटादौ अर्त्तिस्मृदॄत्वरेति सूत्रे च दॄ इति दीर्घस्थाने ह्रस्वं पठन्ति, तन्नेति माधवः ॥ ३४ ॥ नॄ नये । क्र्यादिषु पठिष्यमाणस्यानुवादः । नयादन्यत्र नारयति ॥ ३५ ॥ श्रा पाके, श्रै इति कृतात्वस्य श्रा इत्यदादिकस्य च सामान्येनानुकरणम्, लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषाभ्याम् । श्रपयति विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति । स्वेदयतीत्यर्थः ॥ ३६ ॥

श्रथ, श्लथ, क्नथ और क्लथ धातु हिंसार्थमें हैं । "जासिनिप्रहण० ६१७" इस सूत्रमें 'क्राथ' ऐसे निपातनके कारण मित्संज्ञा होनेपर भी वृद्धि होकर क्राथयति। मित्व तो निपातनसे परत्वके कारण "चिण्णमुलोः" इस सूत्रसे दीर्घविषयमें चरितार्थ होगा । अक्राथि, अक्नथि । क्राथम् क्राथंक्नथंक्नथम् ॥

वन धातु हिंसामें है । वनु ऐसा धातु नहीं कहतेहैं, कारण कि, वनु धातु अपूर्व है, उदित्करणसामर्थ्यके कारण तनादि धातुका अनुवाद नहीं है । इसलिये क्रियासामान्यमें 'वनति' इत्यादि पद होंगे । प्रवनयति । अनुपसृष्ट वनु धातुको तो मित्त्व विकल्प करके कहेंगे ॥

ज्वल धातु दीप्तिमें है । ण प्रत्ययार्थ पठिष्यमाण यह धातु मित्वार्थ अनूदित है, प्रज्वलयति॥ ह्वल, ह्मल चलनार्थमें हैं । प्रह्वलयति । प्रह्मलयति ॥

स्मृ धातु आध्यानार्थमें है । चिन्तार्थमें पठिष्यमाण इस धातुका आध्यानार्थमें अनुवाद मित्संज्ञार्थ है । आध्यान शब्दसे

उत्कंठापूर्वक स्मरण जानना ॥ दॄ धातु भय अर्थमें है, 'दॄ विदारणे' इस क्र्यादिगणीय धातुका यहां मित्संज्ञार्थ अनुवाद है । दृणन्तं प्रेरयति=दरयति । भयभिन्नार्थमें दारयति । यह धात्वन्तर ही है इस मतमें 'दराति' इत्यादि पद होंगे। किसी २ ने घटादिमें और "अत्स्मृ दॄ त्वर २५६६" इस सूत्रमें दॄ ऐसे दीर्घके स्थानमें ह्रस्व पाठ कियाहै, परन्तु माधवके मतसे वह ठीक नहीं है ॥

नॄ-धातु नयार्थमें है, यह क्र्यादिके मध्यमें पठिष्यमाणका अनुवाद है । नयभिन्नार्थमें नारयति ॥

श्रा धातु पाक करनेमें है, "लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य"१, "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्" २, अर्थात् लुग्विकरण और अलुग्विकरणके ग्रहणमें जहां संदेह हो वहां अलुग्विकरणका ही ग्रहण हो, जो सूत्रसे कार्य होकर बना हो वह लाक्षणिक और जो स्वाभाविक है, वह प्रतिपदोक्त होताहै, उन लाक्षणिक और प्रतिपदोक्तके बीचमें जहां संदेह पडे वहां प्रतिपदोक्तकाही ग्रहण हो लाक्षणिकका नहीं। इन दो परिभाषाबलसे श्रै धातुके ऐकारके स्थानमें आकार करके जो श्रा धातु हुआ है, उसका और अदादिगणीय श्रा धातुका इस स्थानमें सामान्यसे अनुकरण कियाहै । श्रपयति, अर्थात् विक्लेदन करताहै । पाकभिन्नार्थमें श्रापयति, अर्थात् घर्म (पसीना) करताहै ॥

मारणतोषणनिशामनेषु ज्ञा । निशामनं चाक्षुषज्ञानमिति माधवः । ज्ञापनमात्रमित्यन्ये । निशानेष्विति पाठान्तरम् । निशानं तीक्ष्णीकरणम् । एष्वेवार्थेषु जानातिर्मित् । ज्ञप मिच्चेति चुरादौ ज्ञापनं मारणादिकं च तस्यार्थः । कथं विज्ञापना भर्तृषु सिद्धिमेतीति तज्ज्ञापयत्याचार्य इति च । शृणु । माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात् । ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोग इति चौरादिकस्य। धातूनामनेकार्थत्वात्। निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः ॥ ३७ ॥ कम्पने चलिः । चल कम्पने इति ज्वलादिः । चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति अन्यथा करोतीत्यर्थः । हरतीत्यर्थ इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः ॥ ३८ ॥ छदिरूर्जने । छद अपवारण इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वार्थोयमनुवादः । अनेकार्थत्वादूर्जेरर्थे वृत्तिः । छदन्तं प्रयुंक्ते छदयति । बलवन्तं प्राणवन्तं वा करोतीत्यर्थः । अन्यत्र छादयति । अपवारयन्तं प्रयुंक्ते इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति । प्राणीभवति । अपवारयति वेत्यर्थः ॥ ३९॥ जिह्वोन्मथने लडिः । लड विलास इति पठितस्य मित्त्वार्थोनुवादः । उन्मथनं ज्ञापनम् । जिह्वाशब्देन षष्ठीतत्पुरुषः । लडयति जिह्वाम् । तृतीयातत्पुरुषो वा । लडयति जिह्वया । अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते । समाहारद्वन्द्वोयम् । लडयति शत्रुम् । लडयति दधि । अन्यत्र लाडयति पुत्रम् ॥४०॥ मदी हर्षग्लेपनयोः । ग्लेपनं दैन्यम् । दैवादिकस्य मित्त्वार्थोयमनुवादः । मदयति । हर्षयति। ग्लेपयति वेत्यर्थः । अन्यत्र मादयति । चित्तविकारमुत्पादयतीत्यर्थः ॥ ४१ ॥ ध्वन शब्दे । भाव्ययं मित्त्वार्थमनूद्यते । ध्वनयति घण्टाम् । अन्यत्र ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः ॥ ४२ ॥ अत्र भोजः; दलि-वलि-स्खलि-रणि-ध्वनि-त्रपि-क्षपयश्चेति पपाठ । तत्र ध्वनिरणी उदाहृतौ । दल विशरणे । वल संवरणे। स्खल सञ्चलने। त्रपूष् लज्जायामिति। गताः। तेषां णौ दलयति । वलयति । स्खलयति त्रपयति । क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः । क्षपयति ॥ ४९ ॥ स्वन अवतंसने । शब्दे इति पठिष्यमाणस्यानुवादः । स्वनयति । अन्यत्र स्वानयति ॥ ५० ॥

मारण, तोषण और निशामनार्थमें ज्ञा धातु मित्संज्ञक हो । माधवके मतसे निशामन शब्दसे चाक्षुष ज्ञान और अन्य मतसे ज्ञानार्थ जानना । 'निशानेषु' ऐसा पाठान्तर है, निशान शब्दसे तीक्ष्णीकरण जानना । इन सम्पूर्ण अर्थोंमें ही ज्ञा धातु मित्संज्ञक हो ॥

"ज्ञप मिच्च" ज्ञप धातु भी मित्संज्ञक हो, यह चुरादिमें पठित है उसका ज्ञापन और मारणा अर्थ है ।

ज्ञा वा ज्ञप धातुको मित्त्व होनेपर 'विज्ञापना भर्तृषु सिद्धिमेति' इस स्थलमें 'विज्ञापना' यह पद और 'तज्ज्ञापयत्याचार्यः' इस स्थलमें 'ज्ञापयति' यह पद किस प्रकारसे सिद्ध हुआ ? इस पर कहतेहैं कि, माधवके मतसे अचाक्षुषज्ञानमें मित्त्वाभाव है, इससे 'विज्ञापना' आदि प्रयोग होसकतेहैं ज्ञापनमात्रमें मित्त्व हो इस मतसे तो 'ज्ञा नियोगे' इस चौरादिक धातुका होगा, अर्थभेद नहीं कहसकते हो कारण कि, धातुको अनेकार्थत्व है । जो 'निशानेषु' ऐसे पढतेहैं, उन हरदत्तादिके मतमें तो कुछ भी अनुपपत्ति नहीं है ॥

कम्पनार्थमें चल धातु मित्संज्ञक हो । चल धातु कंपनार्थमें है, यह धातु ज्वलादि है । चलयति शाखाम् । कम्पभिन्नार्थमें (शीलञ्चालयति) ऐसा प्रयोग होगा । चालन शब्दसे अन्यथाकरण और स्वामीके मतसे हरणार्थ जानना, 'सूत्रं' चालयति, अर्थात् निक्षेप करताहै ॥

ऊर्जी, अर्थात् बल और प्राणनार्थमें छदि धातु मित्संज्ञक हो । अपवारणार्थक चुरादिगणीय छद धातुके उत्तर स्वार्थिक

णिच्के अभाव पक्षमें मित् संज्ञाके निमित्त यहां अनुवाद जानना। अनेकार्थत्वके कारण ऊर्जार्थमें वृत्ति है। 'छदन्तं प्रयुङ्क्ते' इस वाक्यमें छदयति, अर्थात् बलवन्त और प्राणवन्त करताहै । अन्यार्थमें छादयति, अर्थात् अपवारण करनेवालेको प्रयुक्त करताहै, स्वार्थ णिच्में तो छादयति, अर्थात् बली होताहै, प्राणी होताहै अथवा अपवारण करताहै ऐसे अर्थ होंगे ॥

लड धातु जिह्वाके उन्मथनार्थमें मित्संज्ञक हो। यहां विलासार्थक लड धातुका मित्संज्ञार्थ अनुवाद है । उन्मथन शब्दसे ज्ञापनार्थ जानना । जिह्वा शब्दके साथ उन्मथन शब्दका षष्ठीतत्पुरुष अथवा तृतीयातत्पुरुष समास है । लडयति जिह्वाम् । लडयति जिह्वया । कोई तो कहतेहैं कि, जिह्वा शब्दसे तद्व्यापार लक्षित होताहै, 'जिह्वोन्मथने' यह समाहार द्वन्द्व है । लडयति शत्रुम् । लडयति दधि । अन्यार्थमें पुत्रं लाडयति ॥

मदी धातु हर्ष और ग्लेपन,अर्थात् दैन्यार्थमें है । दिवादिगणीय धातुकी मित्संज्ञार्थ यहां अनुवाद है । मदयति, हर्षयति, ग्लेपयति वेत्यर्थः। अन्यार्थमें मादयति,अर्थात् चित्तविकारको उत्पादन करताहै । ध्वन धातु शब्द करनेमें है । फणादिगणके मध्यमें पठिष्यमाण इस धातुका मित्त्वार्थ यहां अनुवाद है ध्वनयति घंटाम् । अन्यार्थमें ध्वानयति, अर्थात् अस्पष्टाक्षरको उच्चारण करताहै । यहां भोजराज दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि और क्षपि धातु मित् हों, ऐसा पढतेहैं, उनमें ध्वनि और रणि धातु उदाहृत हैं ॥

दल धातु विशरणार्थमें, वल धातु संवरणमें, स्खल धातु संचलनमें, त्रपूष् धातु लज्जा करनेमें कह गये हैं उनको णिच् परे दलयति, वलयति, स्खलयति, त्रपयति । क्षयार्थमें वक्ष्यमाण कृतात्व क्षै धातुके पुक् करके निर्देश यहां है, क्षपयति ॥ स्वन धातु अवस्रंसनमें है । शब्दार्थमें पठिष्यमाण स्वन धातुका यहां अनुवाद है । स्वनयति । अन्यार्थमें स्वानयति ॥

घटादयो मितः ॥ मित्संज्ञा इत्यर्थः ॥ **जनी-जॄष्-क्नसु-रञ्जोऽमन्ताश्च** ॥ मित इत्यनुवर्तते । जॄषिति षित्त्वनिर्देशाज्जीर्यतेर्ग्रहणम् । जृणातेस्तु जारयति । केचित्तु जनी जॄ ष्णसु इति पठित्वा ष्णसु निरसने इति दैवादिकमुदाहरन्ति ॥९४॥ **ज्वल-ह्वल-ह्मल-नमामनुपसर्गाद्वा** ॥ एषां मित्त्वं वा । प्राप्तविभाषेयम् । ज्वलयति-ज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कथं तर्हि प्रज्वालयति, उन्नामयतीति । घञन्तात्तत्करोतीति णौ । कथं संक्रामयतीति । मितां ह्रस्व इति सूत्रे वा चित्तविराग इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत् । एतेन रजो विश्रामयन् राज्ञाम्, धुर्यान्विश्रामयति स इत्यादि व्याख्यातम् ॥ ९८ ॥ **ग्ला-स्ना-वनु-वमां च** अनुपसर्गादेषां मित्त्वं वा स्यात् । आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा ॥ ६२ ॥

घटादि धातु मित्संज्ञक हों ।

जनी, जॄष्, क्नसु, रञ्ज और अमन्त धातु मित्संज्ञक हों । जॄष्धातुमें षित्त्व निर्देशके कारण दैवादिक जॄष्धातुका ग्रहण है । क्र्यादिक जॄ धातुका तो 'जारयति' ऐसा होगा । कोई २ 'जनी, जॄ ष्णसु' ऐसा पाठ करके "ष्णसु निरसने" इस दैवादिक धातुका उदाहरण करतेहैं ॥

ज्वल, ह्वल, ह्मल और नम धातुको विकल्प करके मित्त्व हो । ज्वलयति, ज्वालयति । उपसृष्टार्थमें तो नित्य मित्त्व होगा, प्रज्वलयति, प्रज्वालयति । उन्नामयति, यह पद तो घञन्त ज्वाल और नाम शब्दके उत्तर "तत्करोति तदाचष्टे" इससे णिच् करके सिद्ध हुआहै ।

अमन्तको मित्त्व होनेसे'संक्रामयति' यह पद किस प्रकारसे सिद्ध हुआ ? इस विषयमें कहतेहैं कि, "मितां ह्रस्वः २५६८" इस सूत्रमें "वा चित्तविरागे २६०५" इस त्रसे 'वा' इस पदकी अनुवृत्ति करके व्यवस्थित विभाषा श्रवणके कारण कहीं मित्त्व नहीं भी होगा,यह वृत्तिकारका मत है इसीसे'रजो विश्रामयन् राज्ञाम्' 'धुर्यान् विश्रामयेति सः' इत्यादि भी सिद्ध हुए ॥

उपसर्गके परे स्थित ग्ला, स्ना, वनु और वम धातुको विकल्प करके मित्त्व हो । आद्य दो धातुको प्राप्त होनेपर औरको अप्राप्त होनेपर यह विकल्प करके मित्त्व विधान है ॥

न कम्यमिचमाम् ॥ अमन्तत्वात्प्राप्तं मित्त्वमेषां न स्यात् । कामयते । आमयति । चामयति ॥ ६५ ॥ **शमो दर्शने** ॥ शाम्यतिर्दर्शने मिन्न स्यात् । निशामयति रूपम् । अन्यत्र तु प्रणयिनो निशमय्य वधूः कथाः । कथं तर्हि निशामय तदुत्पत्तिं विस्तराद्गदतो ममेति । शम आलोचन इति चौरादिकस्य । धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः, शाम्यतिवत् ॥ ६६ ॥ **यमोऽपरिवेषणे** ॥ यच्छतिर्भोजनतोऽन्यत्र मिन्न स्यात् । आयामयति । द्राघयति । व्यापारयति वेत्यर्थः । परिवेषणे तु । यमयति ब्राह्मणान् भोजयतीत्यर्थः । पर्यवसितं नियमयन्नित्यादि तु नियमवच्छब्दात्तत्करोतीति णौ बोध्यम् ६७॥ **स्खदिरवपरिभ्यां च** ॥ मिन्नेत्येव । अवस्खादयति । परिस्खादयति । अपावपरिभ्य इति न्यासकारः । स्वामी तु न कमीति नञमुत्तरत्रिसूत्र्यामननुवर्त्य शम अदर्शने इति चिच्छेद । यमस्त्वपरिवेषणे मित्त्वमाह । तन्मते पर्यवसितं नियमयन्नित्यादि सम्यगेव । उपसृष्टस्य स्खदेश्चेदेवादिपूर्वस्येति नियमात्प्रस्खादयतीत्याह । तस्माद् सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः

फलितः । इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम् ॥ ६९ ॥ फण गतौ ॥ नेति निवृत्तमसम्भवात् । निषेधात्पूर्वमसौ न पठितः । फणादिकार्यानुरोधात् ॥

कम्, अम्, चम् धातुको अमन्तत्वके कारण प्राप्त मित्त्व नहीं हो, कामयते । आमयति । चामयति ॥

शम् धातु दर्शन अर्थमें मित् न हो । निशामयति । अन्यार्थमें तो (प्रणयिनो निशमय्य वधूः कथाः) दर्शन ही अर्थमें मित्त्वका निषेध होनेसे 'निशामय तदुत्पत्तिं विस्तराद्गदतो मम' इस स्थलमें किस प्रकारसे वृद्धि हुई ? इसपर कहतेहैं कि, इस स्थलमें आलोचनार्थक चुरादिगणीय शम धातुका प्रयोग है, धातुओंके अनेकार्थत्वके कारण शम धातुकी समान श्रवणार्थमें वृत्ति है ॥

यम धातु भोजनभिन्न अर्थमें मित् न हो, आयामयति, अर्थात् द्राघयति, अथवा व्यापारयति । परिवेषणार्थमें यमयति ब्राह्मणान्, अर्थात् भोजन कराताहै ।

'पर्य्यवसितं नियमयन्' इत्यादि तो नियमवत् शब्दसे "तत्करोति" इससे णिच् करके सिद्ध हुआ है, ऐसा जानना।

अव और परिपूर्वक स्खद् धातु मित् न हो, अवस्खादयति। परिस्खादयति । न्यासकारके मतसे अय, अव, और परिपूर्वक स्खद धातु मित् नहीं होगा। स्वामीने तो "नकामि०" इस सूत्रसे उत्तर तीन सूत्रोंमें 'नञ्' की अनुवृत्ति न करके "शमः अदर्शने" ऐसा छेद किया है । और 'अपरिवेषण' अर्थमें यम धातुको मित् कहाहै । उनके मतमें 'पर्य्यवसितं नियमयन्' इत्यादि पद समीचीन ही है । सोपसर्ग स्खद धातुको मित्त्व हो तो अवादि पूर्वक ही को हो इस नियमसे 'प्रस्खादयति' ऐसा कहतेहैं, इस कारण दोनों सूत्रोंके उदाहरण, प्रत्युदाहरणोंमें व्यत्यास फलित हुआ । वृत्तिकार और न्यासकारको असम्मत होनेके कारण यह मत त्याग करने योग्य है।*

*(यमोऽपरिवेषणे) यम् धातु भोजना अर्थसे अन्यत्र मित् न हो, यहां 'यम्-उपरमे' यह धातु समझना चाहिये । भोजना शब्द "रायासश्रन्थो युच् ३२८४" इस सूत्रसे युच् प्रत्ययान्त स्त्रीलिङ्ग है, और 'परिवेषण' यहां भोजनानुकूलव्यापार है, (यहांपर परोसना अर्थ लियाहै) इससे अन्य अर्थमें मित्का निषेध है और इस सूत्रमें "न कम्यमिचमाम्" इस सूत्रसे 'न' इस पदकी अनुवृत्ति होती है, इस कारण यह अर्थ हुआ कि, यम धातु भोजनार्थमें तो मित् है जैसे-यमयति ब्राह्मणान्, यहां मित् होनेका फल णि प्रत्यय परे रहते यमके आकारको ह्रस्व होना है (२५६८) भोजनासे अन्यत्र यम धातु मित् नहीं होता, जैसे-आयामयति-द्राघयति, व्यापारयति वेत्यर्थः। यहां यम धातुको ह्रस्व न हुआ। यदि कोई कहै कि, 'पर्य्यवसितं नियमयन्' इत्यादि प्रयोगोंमें भोजना अर्थके न होनेपर भी मित्संज्ञाका फल ह्रस्व दीखताहै, सो कैसे हुआ ? इसका उत्तर यह है कि, उक्त प्रयोगमें नियमवत् शब्दसे 'करोति' इस अर्थमें णिच् प्रत्यय करनेसे होताहै, ऐसा जानना । इसी प्रकार "शमो दर्शने" "स्खदिरवपरिभ्यां च" इन दोनों सूत्रोंमें भी पूर्वोक्त सूत्रसे ही 'न' इस पदकी अनुवृत्ति होतीहै, इससे यह अर्थ हुआ कि, 'शम धातु दर्शन अर्थमें मित् न हो' इसका उदाहरण यह है-निशामयति रूपम् । दर्शनसे अन्यत्र मित् होताहै, इसका उदाहरण-

फण धातु गतिमें है । 'न' यह पद निवृत्त हुआ, क्योंकि, असम्भव है, अर्थात् जब मित्त्वकी प्राप्ति कहीं नहीं तो निषेध किसका ? फणादि कार्यके अनुरोधसे निषेधके पूर्व यह नहीं पठित हुआहै ॥

२३६४ फणां च सप्तानाम् ६।४।१२५॥

एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । फेणतुः । फेणुः । फेणिथ । पफणतुः । पफणुः । फणयति ॥ वृत् ॥ घटादिः समाप्तः ॥ फणेः प्रागेव वृदित्येके । तन्मते फाणयतीत्येव ॥ ७० ॥ राजृ दीप्तौ । स्वरितेत् । राजति । राजते । रेजतुः-रराजतुः । रेजे-रराजे । अत इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वम् ॥ ७१ ॥ टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । अनुदात्तेतः । भ्राजतेरिह पाठः फणादिकार्यार्थः । पूर्वं पाठस्तु व्रश्चादिषत्वाभावार्थः । तत्र हि राजिसाहचर्यात् फणादेरेव ग्रहणम् । भ्रेजे-बभ्राजे । वा भ्राशेति श्यन्वा । भ्राश्यते-भ्राशते । भ्रेशे-बभ्राशे । भ्लाश्यते-भ्लाशते । भ्लेशे-बभ्लाशे । द्वाव-

-'प्रणयिनो निशमय्य वधूः कथाः' है, यहां मित् होनेसे शम धातुको ह्रस्व होगया । यदि कोई कहै कि, "निशामय तदुत्पत्तिं विस्तराद्गदतो मम" इस दुर्गासप्तशतीके श्लोकमें शम धातुका श्रवण अर्थ है, तो मित् होकर ह्रस्व क्यों न हुआ ? तो इसका उत्तर यह है कि, यहां 'शम-आलोचने' यह चुरादि गणका धातु है और आलोचनका अर्थ यहां श्रवण है, क्योंकि, धातुओंका अनेक अर्थ होताहैं और चुरादि गण ज्ञपादि पांच धातुओंके सिवाय और धातु स्वार्थणिच्में मित् नहीं होते इस कारण मित् न होनेसे ह्रस्व नहीं हुआ । इसी प्रकार तीसरे सूत्रका अर्थ यह है कि, अव और परि इन दो उपसर्गोंसे आगे स्खद धातु मित् नहीं होता इसके उदाहरण यह हैं-'अवस्खादयति, परिस्खादयति' इन दोनों प्रयोगोंमें मित् न होनेसे ह्रस्व न हुआ । न्यासकार तो कहतेहैं कि, 'अव, परि, अप' इन तीन उपसर्गोंसे आगे स्खद धातु मित् नहीं होता । अब स्वामीने तो "न कम्यमिचमाम्" इस गण सूत्रसे 'न' इस पदकी 'अनुवृत्ति' अगले तीनों सूत्रोंमें न करके "शमोदर्शने" इस गण सूत्रमें "शमः अदर्शने" ऐसा पदच्छेद करके 'शम धातु अदर्शनमें मित् हो ऐसा अर्थ कियाहै । यद्यपि इस अर्थमें किसी प्रकारका पूर्वोक्त उदाहरणोंमें दोष नहीं आता, तो भी 'यमोपरिवेषणे' इसके उदाहरण तथा प्रत्युदाहरणमें वैपरीत्य दोष आवेगा, क्योंकि पूर्व अर्थमें यम धातु परिवेषण अर्थमें मित् होताथा, अब नहीं होगा । इस प्रकार इनके मतमें 'पर्य्यवसितं नियमयन्' इत्यादि प्रयोग ठीक रहेंगे, और सोपसर्ग स्खद मित्त्व होते अव परि उपसर्गसे ही परको हो अन्यको नहीं, ऐसा नियम मानकर प्र उपसर्गसे परे स्खद धातुको मित् मानकर 'प्रस्खादयति' ऐसा रूप (स्वामीने) माना है, इस कारण इस सूत्रके भी उदाहरण, प्रत्युदाहरणोंमें व्यत्यास अर्थात् वैपरीत्य होगा, परन्तु यह स्वामीका मत वृत्तिकार और न्यासकारके मतसे विरुद्ध होनेसे त्याज्य है ॥

पीमौ तालव्यान्तौ ॥ ७४ ॥ स्यमु स्वन ध्वन शब्दे । स्यमादयः क्षरत्यन्ताः परस्मैपदिनः । स्येमतुः-सस्यमतुः । अस्यमीत् । स्वेनतुः-सस्वनतुः । सस्वनुः । अस्वानीत्-अस्वनीत् । विष्वणति । अवष्वणति । सशब्दं भुंक्ते इत्यर्थः । वेश्च स्वन इति षत्वम् । फणादयो गताः ॥ दध्वनतुः ॥ ३ ॥ षम ष्टम अवैकल्पे । ससाम । तस्ताम॥५॥ज्वल दीप्तौ । अतो ल्रान्तस्य।अज्वालीत् ॥६॥चल कम्पने॥७॥ जल घातने । घातनं तैक्ष्ण्यम् ॥ ८ ॥ टल ट्वल वैक्लव्ये ॥ १० ॥ ष्ठल स्थाने ॥ ११ ॥ हल विलेखने ॥१२॥ णल गन्धे । बन्धन इत्येके ॥ १३ ॥ पल गतौ । पलति ॥ १४ ॥ बल प्राणने धान्यावरोधने च। बलति । बेलतुः । बेलुः ॥ १५ ॥ पुल महत्त्वे ॥ पोलति ॥ १६ ॥ कुल संस्त्याने बन्धुषु च । संस्त्यानं सङ्घातः । बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल ॥ १७ ॥ शल हुल पत्ल गतौ । शशाल । जुहोल । पपात । पेततुः । पतिता ॥

२३५४-कित् लिट् और सेट् थल् परे रहते फणादि सात धातुओंको विकल्प करके एत्व और अभ्यासका लोप हो । फेणतुः । फेणुः । फेणिथ । पफणथुः । पफणुः । फणयति । (वृत्) घटादि धातु समाप्त हुए । कोई कहते हैं कि फणादि धातुके पूर्वमें ही 'वृत्' है, उनके मतमें 'फाणयति' पद सिद्ध होताहै ॥

राजृ धातु दीप्तिमें है । यह उभयपदी है । राजति । राजते । रेजतुः,रराजतुः।रेजे, रराजे"अत: एक०२२६०"से'अतः' इस पदकी अनुवृत्ति (२३५४ में) होनेपर भी विधान (फणादिमें 'राज' के पाठ) सामर्थ्यसे आकारके स्थानमें एकार होताहै ॥

भ्राजृ, भ्राशृ और भ्लाशृ धातु दीप्तिमें हैं, यह आत्मनेपदी इस स्थलमें भ्राज धातुका पाठ फणादिकार्यार्थ है और पूर्वमें पाठ "व्रश्च० २९४" से षत्वके अभावार्थ है, क्योंकि, उस (२९४) में राज धातुके साहचर्य्यसे फणादिका ही ग्रहण होता है । भ्रेजे, बभ्राजे ॥

"वा भ्राश० २३२१" इस सूत्रसे विकल्प करके श्यन् हो । भ्राश्यते, भ्राशते । भ्रेशे, बभ्राशे । भ्लाश्यते, भ्लाशते । भ्लेशे, बभ्लाशे । यह दोनों धातु तालव्यान्त हैं ।

स्यमु,स्वन और ध्वन धातु शब्दमें हैं । स्यमादि क्षरत्यन्त धातु परस्मैपदी हैं । स्येमतुः, सस्यमतुः । अस्यमीत्॥ स्वेनतुः, सस्वनतुः । सस्वनुः । अस्वानीत्, अस्वनीत् । विष्वणति । अवष्वणति । अर्थात् शब्दसहित भोजन करताहै । "वेश्च स्वनः २२७४" इस सूत्रसे षत्व होताहै । फणादि धातुसमाप्त हुए । दध्वनतुः ॥

षम और ष्टम धातु अवकल्पमें हैं । ससाम । तस्ताम ।

ज्वल धातु दीप्तिमें है । "अतो ल्रान्तस्य २२३०" इस सूत्रसे 'अज्वालीत्' पद होताहै । चल धातु कंपनमें, जल धातु घातन अर्थात् तीक्ष्णतामें है । टल और ट्वल धातु वैक्लव्यमें हैं । ष्ठल धातु स्थानमें है । हल धातु विलेखनमें है । णल धातु गंधमें है । किसीके मतमें बंधनार्थमें भी है । पल धातु गतिमें है । पलति । बल धातु प्राणन और धान्यावरोधनमें है। बलति । बेलतुः । बेलुः ॥ पुल धातु महत्त्वमें है । पोलति ॥ कुल धातु संस्त्यान और बन्धुमें है । संस्त्यान शब्दसे समूह और बन्धु शब्दसे तद्व्यापारका ग्रहण है । कोलति । चुकोल ॥ शल, हुल और पत्ल धातु गतिमें हैं । शशाल । जुहोल । पपात । पेततुः । पतिता ॥

२३५५ पतः पुम् । ७ । ४ । १९ ॥

अङि परे । अपप्तत्।नेर्गदेति णत्वम् । प्रण्यपप्तत् ॥२०॥ कथे निष्पाके । कथति । चकाथ । अकथीत् ॥ २१ ॥ पथे गतौ । अपथीत् ॥२२॥ मथे विलोडने । मेथतुः।अमथीत् ॥ २३ ॥ टुवम उद्गिरणे । इहैव निपातनाद्दत इत्वमिति सुधाकरः । ववाम।ववमतुः। वादित्वादेत्त्वाभ्यासलोपौ न । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृतं तद्भाष्यादौ न दृष्टम् ॥ २४ ॥ भ्रमु चलने । वा भ्राशेति श्यन्वा । भ्रम्यति-भ्रमति । भ्राम्यतीति तु दिवादेर्वक्ष्यते ॥

२३५५-अङ् परे रहते पत धातुको पुम्का आगम हो, अपप्तत् । "नेर्गद० २२८५" इस सूत्रसे णत्व होकर-प्रण्यपप्तत् ॥ कथे धातु निष्पाकमें है । कथति । चकाथ । अकथीत् ॥ पथे धातु गतिमें है । अपथीत् । मथे धातु विलोडनमें है । मेथतुः । अमथीत् । टुवम धातु उद्गिरणमें है । इसी स्थलमें निपातनसे ऋकारान्त गृ धातुको इत्व हुआ, यह सुधाकरका मत है । ववाम । ववमतुः, यहां वकारादित्वके कारण एत्व और अभ्यासका लोप न हुआ । भ्रमु धातु चलनमें है "वा भ्राश०२३२१" इस सूत्रसे विकल्प करके श्यन् होकर-भ्रम्यति, भ्रमति । भ्राम्यति, यह तो दिवादि धातुका रूप कहेंगे ॥

२३५६ वा जॄभ्रमुत्रसाम् ।६।४।१२४॥

एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च । भ्रेमतुः-बभ्रमतुः । अभ्रमीत् ॥ ॥ २५ ॥ क्षर सञ्चलने । अक्षारीत् ॥ २६ ॥

अथ द्वावनुदात्तेतौ ॥ षह मर्षणे । परिनिविभ्य इति षत्वम् । परिषहते । सेहे । सहिता । तीषसहेति वा इट् । इडभावे ढत्वधत्वष्टुत्वढलोपाः ॥

२३५६-कित् लिट् और सेट् थल् परे रहते जॄ, भ्रम और त्रस धातुको विकल्प करके एत्व और अभ्यासका लोप हो, भ्रेमतुः, बभ्रमतुः । अभ्रमीत् ॥ क्षर धातु संचलनमें है । अक्षारीत् ॥

अब दो अनुदात्तेत् धातु कहतेहैं।

षह धातु मर्षणमें है। "परिनिविभ्यः० २२७५" इस सूत्रसे षत्व होकर-परिषहते। सेहे। सहिता। "तीषसह० २३४०" इस सूत्रसे विकल्प करके इट् होगा, इड्भाव पक्षमें ढत्व, धत्व, ष्टुत्व और ढलोप होगा॥

२३५७ सहिवहोरोदवर्णस्य।६।३।११२॥

अनयोरवर्णस्य ओत्स्यात् ढलोपे सति॥

२३५७-ढकारका लोप होनेपर सह और वह धातुके वर्णके स्थानमें ओकार हो-॥

२३५८ सोढः।८।३।११५॥

सोढ्रूपस्य सहेः सस्य षत्वं न स्यात्।परिसोढा॥

२३५८-सोढ् रूपको प्राप्त हुए सह धातुके सकारको षत्व न हो, परिसोढा॥

२३५९ सिवादीनां वाऽड्व्यवायेऽपि। ८।३।७१॥

परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेपि। पर्यषहत-पर्यसहत॥१॥ रमु क्रीडायाम्। रेमे। रेमिषे। रन्ता। रंस्यते। रंसीष्ट। अरंस्त॥२॥

अथ कसन्ताः परस्मैपदिनः॥ षद्लृ विशरणगत्यवसादनेषु॥

२३५९-अड्व्यवाय रहते भी परि, नि और वि के परे स्थित सिवादि धातुके सकारको विकल्प करके षत्व हो, पर्यषहत, पर्यसहत॥ रमु धातु क्रीडामें है। रेमे। रेमिषे। रन्ता। रंस्यते। रंसीष्ट। अरंस्त॥

अब कसन्त परस्मैपदी धातु कहतेहैं।

षद्लृ धातु विसरण, गति और अवसादनार्थमें हैं॥

२३६० पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः।७।३।७८॥

पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे। सीदति। ससाद। सेदतुः। सेदिथ-ससत्थ। सत्ता। सत्स्यति। लृदित्वादङ्। असदत्॥ सदिरप्रतेः॥ निषीदति। न्यषीदत्॥

२३६०-इत्संज्ञक शकारादि प्रत्यय परे रहते पा धातुके स्थानमें पिब, घ्रा-जिघ्र, ध्मा-धम, स्था-तिष्ठ, म्ना-मन्, दाण-यच्छ, दृश्-पश्य, ऋ-ऋच्छ, सृ-धौ, शद, शीय और सद धातुके स्थानमें सीद आदेश हो। सीदति। ससाद। सेदतुः। सेदिथ, ससत्थ। सत्ता। सत्स्यति। लृकार इत् होनेके कारण इसके उत्तर अङ् होगा-। असदत्। प्रतिभिन्न उपसर्ग पूर्वक सद धातुसम्बन्धी सको षत्व हो (२२७१) निषीदति। न्यषीदत्॥

२३६१ सदेः परस्य लिटि।८।३।११८॥

सदेरभ्यासात्परस्य षत्वं न स्यात् लिटि।निषसाद। निषेदतुः॥१॥ शद्लृ शातने। विशीर्णतायामयम्। शातनं तु विषयतया निर्दिश्यते॥

२३६१-लिट् परे रहते सद धातुके अभ्यासके परे स्थित सके स्थानमें षत्व न हो। निषसाद। निषेदतुः। शद्लृ धातु शातनमें है, शातनसे विशीर्णता जानना, यदि यह कहो कि, शातनसे विशीर्णताका ग्रहण हो तो हेतुमत् णिच् करके 'शातन' यह पद कैसे निर्दिष्ट हुआ? तो सो ठीक नहीं कारण कि, विना प्रयोजकव्यापारके विशीर्णताका असम्भव होनेके कारण 'विषयतया' अर्थात् धात्वर्थ (विशीर्णता) जनकताद्वारा 'शातन' यह पद निर्दिष्ट हुआहै॥

२३६२ शदेः शितः।१।३।६०॥

शिद्भाविनोऽस्मादात्मनेपदं स्यात्। शीयते। शशाद। शेदतुः। शेदिथ-शशत्थ। शत्ता। अशदत्॥२॥ क्रुश आह्वाने रोदने च। क्रोशति। क्रोष्टा। च्लेः क्सः। अक्रुक्षत्॥३॥ कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कोचति। चुकोच॥४॥ बुध अवगमने। बोधति। बोधिता। बोधिष्यति॥५॥ रुह बीजजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्॥६॥ कस गतौ। अकासीत्-अकसीत्॥७॥ वृत्। ज्वलादिगणः समाप्तः॥

अथ गूहत्यन्ताः स्वरितेतः॥ हिक्क अव्यक्ते शब्दे। हिक्कति। हिक्कते॥१॥ अञ्चु गतौ याचने च। अञ्चति। अञ्चते॥२॥ अचु इत्येके॥३॥ अचि इत्यपरे॥४॥ टुयाचृ याच्ञायाम्। याचति। याचते॥५॥ रेटृ परिभाषणे। रेटति। रेटते॥६॥ चते चदे याचने। चचात। चेते। अचतीत्। चचाद। चेदे। अचदीत्॥८॥ प्रोथृ पर्याप्तौ। पुप्रोथ। पुप्रोथे॥९॥ मिदृ मेदृ मेधाहिंसनयोः। मिमेद। मिमेदे। थान्ताविमाविति स्वामी। मिमेथ। धान्ताविति न्यासः॥११॥ मेधृ सङ्गमे च। मेधति। मिमेधे॥१२॥ णिदृ णेदृ कुत्सासन्निकर्षयोः। निनेद। निनिदतुः। निनेदे॥१४॥ शृधु मृधु उन्दने। उन्दनं क्लेदनम्। शर्धति। शर्धते। शर्धिता। मर्धति। मर्धते॥१६॥ बुधिर् बोधने। बोधति। बोधते। इरित्वादङ् वा। अबुधत्-अबोधीत्। अबोधिष्ट। दीपजनेति चिण् तु न भवति

पूर्वोत्तरसाहचर्येण दैवादिकस्यैव तत्र ग्रहणात् ॥ ॥१७॥ उबुन्दिर् निशामने । निशामनं ज्ञानम् । बुबुन्द । अबुदत् अबुन्दीत् ॥ १८ ॥ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेणति । वेणते । नान्तोऽप्ययम् ॥ १९ ॥ खनु अवदारणे। खनति । खनते ॥

२३६२–शित्संज्ञक प्रत्यय होगा । जिससे ऐसा जो शद धातु उसके उत्तर आत्मनेपद हो । शीयते । शशाद । शेदतुः । शेदिथ, शशत्थ । शत्ता । अशदत् ॥ क्रुश धातु आह्वान और रोदनमें है । क्रोशति । क्रोष्टा । च्लिके स्थानमें क्स आदेश होगा–अक्रुक्षत् ॥ कुच धातु सम्पर्चन, कौटिल्य, प्रतिष्टम्भ और विलेखनमें है । कोचति । चुकोच ॥ बुध धातु अवगमनमें है । बोधति । बोधिता । बोधिष्यति॥ रुह धातु बीजोत्पत्ति तथा प्रादुर्भावमें है । रोहति। रुरोह । रुरोहिथ । रोढा । रोक्ष्यति । अरुक्षत् ॥ कस धातु गतिमें है । अकासीत् , अकसीत् ॥

ज्वलादि गण समाप्त हुआ ॥

अब गुह धातु तक उभयपदी धातु कहे जातेहैं–

हिक धातु अव्यक्त शब्दमें है । हिकति । हिकते ॥ अञ्चु धातु गति और याचनार्थमें है । अञ्चति । अञ्चते । किसीके मतमें अचु धातु है । अन्य मतमें अचि धातु है॥ टुयाचृ धातु याचनामें है । याचति । याचते ॥ रेटृ धातु परिभाषणमें है । रटति । रेटते ॥ चते और चदे धातु याचनार्थमें हैं । चचात । चेते । अचतीत् । चचाद । चेदे । अचदीत् ॥ प्रोथृ धातु पर्य्याप्तिमें है । पुप्रोथ । पुप्रोथे॥मिदृ और मेदृ धातु मेधा और हिंसामें हैं । मिमेद । मिमिदे । स्वामीके मतमें यह थकारान्त है । मिमेथ । न्यासकारके मतमें यह धातु धकारान्त है ॥ मेधृ धातु संगममें है । मेधति । मिमेधे ॥ णिदृ और णेदृ धातु कुत्सा और सन्निकर्षमें हैं । निनेद । निनिदतुः । निनेदे ॥ शृधु और मृधु धातु उन्दन अर्थात् क्लेदनमें हैं । शर्द्धति । शर्द्धते । शर्द्धिता । मर्द्धति । मर्द्धते ॥

बुधिर् धातु बोधनमें है । बोधति । बोधते । इरित्त्वके कारण विकल्प करके अङ् होगा–अबुधत् , अबोधीत् । अबोधिष्ट । " दीपजन० २३२८ " इस सूत्रके अनुसार चिण् नहीं होगा, क्योंकि पूर्वोत्तर साहचर्य्यके कारण दिवादि गणीय धातुका ही उस स्थलमें ग्रहण हुआ है ॥ उबुन्दिर् धातु निशामन (ज्ञान) में है । बुबुन्दे । अबुदत् । अबुन्दीत् ॥ वेणृ धातु गति, ज्ञान, चिन्ता, निशामन और वादित्रग्रहणमें है । वेणति । वेणते । यह धातु नकारान्त भी है ॥ खनु धातु अवदारणमें है । खनति । खनते ॥

२३६३ गमहनजनखनघसां लोपः क्ङित्यनङि । ६ । ४ । ९८ ॥

एषामुपधाया लोपः स्यादजादौ क्ङिति न त्वङि । चख्नतुः ॥

२३६३–अजादि कित् ङित् प्रत्यय परे रहते गम, हन, जन, खन और घस धातुकी उपधाका लोप हो, अङ् परे न हो । चख्नतुः । कित् और ङित्संज्ञक यकारादि कित्, ङित् प्रत्यय परे रहते जन, सन और खन धातुके स्थानमें विकल्प करके आकार हो ॥

(२३१९ ये विभाषा । ६ । ४ । ४३॥)

खायात्–खन्यात् ॥ २० ॥ चीवृ आदानसंवरणयोः । चिचीव । चिचीवे ॥ २१ ॥ चायृ पूजानिशामनयोः ॥ २२ ॥ व्यय गतौ । अव्ययीत्॥ २३॥दाशृ दाने । ददाश । ददाशे ॥२४॥ भेषृ भये। गतावित्येके । भेषति। भेषते ॥ २५॥ भ्रेषृ भ्लेषृ गतौ ॥ २६ ॥ अस गतिदीप्त्यादानेषु । असति । असते । आस । आसे । अयं षान्तोऽपि ॥२७॥ स्पश बाधनस्पर्शनयोः। स्पर्शनं ग्रथनम् । स्पशति । स्पशते ॥ २८ ॥ लष कान्तौ । वा भ्राशेति श्यन्वा । लष्यति । लषति । लेषे ॥ २९ ॥ चष भक्षणे ॥ ३० ॥ छष हिंसायाम् । चच्छषतुः । चच्छषे ॥ ३१॥ झष आदानसंवरणयोः ॥ ३२ ॥ भ्रक्ष भ्लक्ष अदने ॥ ३४ ॥ भक्ष इति मैत्रेयः ॥ ३५ ॥ दासृ दाने॥३६॥माहृ माने ॥३७॥ गुहू संवरणे॥

(२३१९) खायात्, खन्यात् । चीवृ धातु आदान और संवरणमें है । चिचीव । चिचीवे ॥ चायृ धातु पूजा और निशामनार्थमें है ॥ व्यय धातु गतिमें है । अव्ययीत् ॥ दाशृ धातु दानमें है । ददाश । ददाशे ॥ भेषृ धातु भय और किसीके मतसे गतिमें है । भेषति । भेषते॥भ्रेषृ और भ्लेषृ धातु गतिमें हैं ॥ अस धातु गति, दीप्ति और आदानमें है । असति । असते । आस । आसे । यह धातु षकारान्त भी है ॥ स्पश धातु बाधन और स्पर्शन अर्थात् ग्रथनमें है । स्पशति स्पशते ॥ लष धातु कान्तिमें है । "वा भ्राश० २३२१" सूत्रसे इसके उत्तर विकल्प करके श्यन् प्रत्यय होगा । लष्यति । लषति । लेषे ॥ चष धातु भक्षणमें है ॥ छष धातु हिंसामें है चच्छषतुः । चच्छषे ॥ झष धातु आदान और संवरणमें है ॥ भ्रक्ष और भ्लक्ष धातु भक्षणमें हैं । मैत्रेय मुनिके मतमें भक्ष धातु उक्तार्थमें है ॥ दासृ धातु दानमें है ॥ माहृ धातु मानमें है ॥ गुहू धातु संवरणमें है ॥

२३६४ ऊदुपधाया गोहः । ६।४।८९॥

गुह उपधाया ऊत्स्याद् गुणहेतावजादौ प्रत्यये । गूहति । गूहते । ऊदित्त्वादिड्वा । गूहिता–गोढा । गूहिष्यति–घोक्ष्यति । गूहेत् । गुह्यात् । अगूहीत् । इडभावे क्सः । अघुक्षत् ॥

२३६४–गुणके हेतुभूत अजादि प्रत्ययके परे रहते गुह धातुकी उपधाके स्थानमें ऊकार हो । गूहति । गूहते । ऊकार इत् होनेके कारण इसके उत्तर विकल्प करके इट् होगा ।

गूहिता, गोढा । गूहिष्यति, घोक्ष्यति । गूहेत । गुह्यात् । अगूहीत् । इट्के अभावमें क्स होगा । अघुक्षत् ॥

२३६५ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । ७ । ३ । ७३ ॥

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि । ढत्वधत्वष्टुत्वढलोपदीर्घाः । अगूढ–अघुक्षत । क्सस्याचीत्यन्तलोपः । अघुक्षाताम् । अघुक्षन्त । अगुह्वहि–अघुक्षावहि । अघुक्षामहि ॥ ३८ ॥ अथाजन्ता उभयपदिनः । श्रिञ् सेवायाम् । श्रयति । श्रयते । शिश्रियतुः । श्रयिता । णिश्रीति चङ् । अशिश्रियत् ॥ १ ॥ भृञ् भरणे। भरति । बभार । बभ्रतुः । बभर्थ । बभृव । बभृषे । भर्ता ॥

२३६५–दन्त्य तङ् प्रत्यय परे रहते दुह, दिह और लिह और गुह धातुके उत्तर स्थित क्स प्रत्ययका आत्मनेपदमें विकल्प करके लुक् हो । क्रमसे ढत्व, धत्व, ष्टुत्व, ढलोप और दीर्घ होगा–अगूढ । अघुक्षत । "क्सस्याचि २३३७" इस सूत्रसे अन्तवर्णका लोप होगा–अघुक्षाताम् । अघुक्षन्त । अगुह्वहि, अघुक्षावहि । अगुह्महि, अघुक्षामहि ॥

अब अजन्त उभयपदी धातु कहे जाते हैं ।

श्रिञ् धातु सेवामें है । श्रयति । श्रयते । शिश्रियतुः । श्रयिता "णिश्रि० २३१२" इस सूत्रसे चङ् आदेश होगा । अशिश्रियत् ॥ भृञ् धातु भरणमें है । भरति । बभार। बभ्रतुः। बभर्थ । बभृव । बभृषे । भर्त्ता ॥

२३६६ ऋद्धनोः स्ये । ७ । २ । ७० ॥

ऋतो हन्तेश्च स्यस्य इट् स्यात् । भरिष्यति ॥

२३६६–ऋकारान्त धातु और हन धातुके स्यके इट्का आगम हो । भरिष्यति ॥

२३६७ रिङ् शयग्लिङ्क्षु ।७।४।२८ ॥

शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात् । रीङि प्रकृते रिङ्विधिसामर्थ्याद्दीर्घो न । भ्रियात् ॥

२३६७–श, यक्, यकारादि आर्धधातुक और लिङ् प्रत्यय परे रहते ऋकारान्त धातुके ऋकारके स्थानमें रिङ् आदेश हो । रीङ् करनेसे ही इष्ट सिद्ध होता था, फिर ह्रस्व विधानके कारण दीर्घ न हुआ–भ्रियात् ॥

२३६८ उश्च । १ । २ । १२ ॥

ऋवर्णात्परौ झलादी लिङ्सिचौ तङ्परः सिचौ त्येतौ कितौ स्तः । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् । अभार्ष्टाम् । अभार्षुः ॥

२३६८–ऋवर्णके परवर्त्ती झलादि लिङ् तथा तङ् परक सिच् इनकी कित्संज्ञा हो । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् । अभार्ष्टाम् । अभार्षुः ॥

२३६९ ह्रस्वादङ्गात् । ८ । २ । २७ ॥

सिचो लोपः स्यात् झलि । अभृत । अभृषाताम् । अभरिष्यत् ॥ २ ॥ हृञ् हरणे । हरणं प्रापणं स्वीकारस्तेयं नाशनं च । जहर्थ । जहिव। जाहिषे । हर्ता । हरिष्यति ॥ ३ ॥ धृञ् धारणे । धरति । अधार्षीत् । अधृत ॥४॥ णीञ् प्रापणे । निनयिथ–निनेथ । निन्यिषे ॥ ५ ॥

अथाजन्ताः परस्मैपदिनः ॥ धेट् पाने । धयति॥

२३६९–झल् परे रहते ह्रस्वान्त अङ्गके उत्तर सिच्का लोप हो । अभृत । अभृषाताम् । अभरिष्यत् ॥ हृञ् धातु हरणमें है । हरण शब्द प्राप्ति चोरी और नाश करनेमें है । जहर्थ । जहिव । जाहिषे । हर्त्ता । हरिष्यति ॥ धृञ् धातु धारण करनेमें है । धरति । अधार्षीत् । अधृत ॥ णीञ् धातु प्रापणमें है निनयिथ, निनेथ । निन्यिषे ॥

अब अजन्त परस्मैपदी धातु कहे जातेहैं ।

धेट् धातु पान करनेमें है । धयति ॥

२३७० आदेच उपदेशेऽशिति।६।१।४५॥

उपदेशे एजन्तस्य धातोरात्त्वं स्यान्न तु शिति॥

२३७०–शित् भिन्न प्रत्यय परे रहते उपदेश अवस्थामें ए, ऐ, ओ और औकारान्त धातुके स्थानमें आकार हो ॥

२३७१ आत औ णलः । ७ । १।३४॥

आदन्ताद्धातोर्णल औकारादेशः स्यात् । दधौ॥

२३७१–आकारान्त धातुके उत्तर णल् विभक्तिके स्थानमें औकार आदेश हो । दधौ ॥

२३७२ आतो लोप इटि च ।६।४।६४॥

अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात् । द्वित्वात्परत्वाल्लोपे प्राप्ते द्विर्वचनेऽचीति निषेधः । द्वित्वे कृते आलोपः। दधतुः। दधुः । दधिथ–दधाथ । दधिव। दधिम ।धाता॥

२३७२–अजादि जो कित् ङित् आर्धधातुक और इट्के परे आकारान्त धातुके आकारका लोप हो । द्वित्वके परे लोपकी प्राप्ति होनेपर "द्विर्वचनेऽचि २२४३"इस सूत्रसे निषेध होगा, द्वित्व होनेपर आकारका लोप होगा–दधतुः । दधुः । दधिथ, दधाथ । दधिव । दधिम । धाता ॥

२३७३ दा धा घ्वदाप् । १ । १ । २०॥

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना ॥

२३७३–दा और धा धातुकी घु संज्ञा हो,परन्तु दाप् और दैप् धातुकी न हो ॥

२३७४ एर्लिङि । ६ । ४ । ६७ ॥

घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातुके किति लिङि। धेयात्। धेयास्ताम्। धेयासुः॥

२३७४-आर्धधातुक कित् लिङ् परे रहते घुसंज्ञक, मा और स्थादि धातुको एत्व हो। धेयात्। धेयास्ताम्। धेयासुः॥

२३७५ विभाषा धेट्श्व्योः ।३।१।४९॥

आभ्यां च्लेश्चङ् वा स्यात्कर्तृवाचिनि लुङि परे। चङीति द्वित्वम्। अदधत्। अदधताम्॥

२३७५-कर्तृ वाच्यमें लुङ् परे रहते धेट् और श्वि धातुके उत्तर स्थित च्लिके स्थानमें विकल्प करके चङ् हो चङ् परे रहते द्वित्व होगा (२३१५) अदधत्। अदधताम्॥

२३७६ विभाषा घ्राधेट्शाच्छासः । २।४।७८॥

एभ्यः सिचो लुग्वा स्यात्परस्मैपदे परे। अधात्। अधाताम्। अधुः॥

२३७६-परस्मैपद परे रहते घ्रा, धेट्, शो, छो और सो धातुके उत्तर विकल्प करके सिच्का लोप हो। अधात्। अधाताम्। अधुः॥

२३७७ यमरमनमाऽऽतां सक् च । ७।२।७३॥

एषां सक् स्यादेभ्यः सिच इट् स्यात्परस्मैपदेषु। अधासीत्। अधासिष्टाम्। अधासिषुः॥ ॥ १ ॥ ग्लै म्लै हर्षक्षये। हर्षक्षयो धातुक्षयः। ग्लायति। जग्लौ। जग्लिथ-जग्लाथ॥

२३७७-परस्मैपदमें यम, रम, नम और आकारान्त धातुको सक्का आगम हो और सिच्के उत्तर इट् भी हो। अधासीत्। अधासिष्टाम्। अधासिषुः॥ ग्लै और म्लै धातु हर्षक्षयमें हैं। हर्षक्षय शब्दसे धातुक्षय जानना। ग्लायति। जग्लौ। जग्लिथ, जग्लाथ॥

२३७८ वाऽन्यस्य संयोगादेः।६।४।६८॥

घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। ग्लेयात्-ग्लायात्। अग्लासीत्। म्लायति॥ ३ ॥ द्यै न्यक्करणे। न्यक्करणं तिरस्कारः॥ ४ ॥ द्रै स्वप्ने॥ ५ ॥ ध्रै तृप्तौ॥ ६॥ ध्यै चिन्तायाम्॥७॥ रै शब्दे॥ ॥ ८ ॥ स्त्यै ष्ट्यै शब्दसङ्घातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यम्। षोपदेशफलं तु तिष्ट्यासति।अतिष्ट्यपदित्यत्र षत्वम्॥ ॥ १० ॥ खै खदने॥ ११ ॥ क्षै जै षै क्षये। क्षायति। जजौ। ससौ। साता। घुमास्थेत्यत्र विभाषा घ्राधेडित्यत्र च स्यतेरेव ग्रहणं न त्वस्य। तेन एत्वसिज्लुकौ न। सायात्। असासीत्॥१४॥ कै गै शब्दे। गेयात्। अगासीत्॥ १६ ॥ शै श्रै पाके॥ १८ ॥ पै ओवै शोषणे। पायात्। अपासीत्। घुमास्थेतीत्वं तदपवाद एर्लिङीत्येत्वं गातिस्थेति सिज्लुक् च न। पारूपस्य लाक्षणिकत्वात्॥ २० ॥ ष्टै वेष्टने। स्तायति॥२१॥ ष्णै वेष्टने शोभायां चेत्येके। स्नायति॥ २२ ॥ दैप् शोधने। दायति। अघुत्वादेत्वसिज्लुकौ न। दायात्। अदासीत्॥ २३ ॥ पा पाने। पाघ्राध्मेति पिबादेशः तस्यादन्तत्वान्नोपधागुणः। पिबति। पेयात्। अपात्॥ २४॥ घ्रा गन्धोपादाने। जिघ्रति। घ्रायात्-घ्रेयात्। अघ्रासीत्-अघ्रात्॥२५॥ ध्मा शब्दाग्निसंयोगयोः। धमति॥ ॥ २६ ॥ ष्ठा गतिनिवृत्तौ। तिष्ठति। स्थादिष्वभ्यासेनेति षत्वम्। अधितष्ठौ।उपसर्गादिति षत्वम्। अधिष्ठाता। स्थेयात्॥ २७ ॥ म्ना अभ्यासे। मनति॥२८॥दाण् दाने। प्रणियच्छति। देयात्।अदात्॥२९॥ ह्वृ कौटिल्ये। ह्वरति॥

२३७८-आर्धधातुक कित् लिङ् विभक्ति परे रहते घु संज्ञक धातु, मा धातु और स्थादि धातु भिन्न संयोगादि धातुके आकारके स्थानमें विकल्प करके एकार हो। ग्लेयात्, ग्लायात्। अग्लासीत्। म्लायति॥ द्यै धातु न्यक्कार अर्थात् तिरस्कारमें है॥ द्रै धातु स्वप्नमें है॥ ध्रै धातु तृप्तिमें है॥ ध्यै धातु चिन्तामें है॥ रै धातु शब्दमें है। स्त्यै ष्ट्यै धातु शब्दसमूहमें हैं। षोपदेश धातुका भी सकार करने पर रूप तुल्य ही होगा, किन्तु षोपदेशका फल कुछ विशेष होगा, जैसे-'तिष्ट्यासति, अतिष्ट्यपत्'-इत्यादि स्थलमें षत्व हुआ है॥ खै धातु खदनमें है॥ क्षै, जै और षै धातु क्षयमें हैं। क्षायति। जजौ। ससौ। साता।

"घुमास्था० २४६२" और "विभाषा घ्राधेट्०२३७६" इन दोनों सूत्रोंमें स्यतिके ग्रहण ही होनेसे इसका ग्रहण नहीं होताहै। इस कारण एत्व और सिच्का लुक् नहीं होगा-सायात्। असासीत्॥

कै, गै, धातु शब्द करनेमें हैं। गेयात्। अगासीत्॥ शै और श्रै धातु पाक करनेमें हैं॥ पै और वै धातु शोषण करनेमें हैं। पायात्। अपासीत्। इस स्थलमें "पा" इसके लाक्षणिकत्वके कारण "घुमास्था० २४६२" इस सूत्रसे विहित इत्व, तथा उसका अपवाद "एर्लिङि २३७४" इससे एत्व और "गातिस्था० २२२३" इस सूत्रसे विहित सिच्का लुक् नहीं होगा॥ ष्टै धातु वेष्टनमें है। स्तायति॥ ष्णै धातु वेष्टन और किसीके मतसे शोभामें भी है। स्नायति॥ दैप् धातु शोधनमें है। दायति। घुसंज्ञक न होनेके कारण एत्व और सिच्का लुक् नहीं होगा। दायात्। अदासीत्। पा धातु पानमें है। "पा घ्राध्मा० २३६०" इस सूत्रसे पा धातुके स्थानमें पिब आदेश होगा-अकारान्त होनेके कारण उपधा गुण नहीं होगा। पिबति। पेयात्। अपात्॥ घ्रा धातु गन्धोपादानमें है। जिघ्रति। घ्रायात्, घ्रेयात्। अघ्रासीत्, अघ्रात्॥ ध्मा धातु शब्द और अग्निसंयोगमें है।धमति॥ष्ठा धातु गतिनिवृत्तिमें है। तिष्ठति। "स्थादिष्वभ्यासेन० २२७७" इस सूत्रसे षत्व होगा-अधितष्ठौ। उपसर्गके उत्तर (२२७०)

पत्व हो–अधिष्ठाता। स्थेयात्॥ म्ना धातु अभ्यास करनेमें है। मनति। दाण धातु दानमें है। प्रणियच्छति। देयात्। अदात्॥ ह्वृ धातु कौटिल्यमें है। ह्वरति॥

२३७९ ऋतश्च संयोगादेर्गुणः।७।४।१०॥

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि। किदर्थमपीदं परत्वाण्णल्यपि भवति। रपरत्वम्। उपधावृद्धिः। जह्वार। जह्वरतुः। जह्वरुः। जह्वर्थ। ह्वर्ता॥ ऋद्धनोः स्ये, ह्वरिष्यति॥

२३७९–लिट् परे रहते ऋकारान्त और संयोगादि अङ्गसंज्ञक धातुके ऋकारको गुण हो। यद्यपि यह गुण कित् परे रहते भी होनेके कारण अपवाद न हुआ, तथापि परत्वके कारण णल् परे रहते भी होगा, रपरत्वके कारण उपधाको वृद्धि होगी–जहार। जह्वरतुः। जह्वरुः। जह्वर्थ। ह्वर्ता। "ऋद्धनोः स्ये २३६६" इस सूत्रसे स्य प्रत्ययके इट्का आगम होगा–ह्वरिष्यति॥

२३८० गुणोऽर्तिसंयोगाद्योः।७।४।२९॥

अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। ह्वर्यात्। अह्वार्षीत्। अह्वार्ष्टाम्॥ ३०॥ स्वृ शब्दोपतापयोः। स्वरतिसूतीति वेट्। सस्वरिथ–सस्वर्थ। वमयोस्तु॥

२३८०–यक् और यकारादि आर्धधातुक लिङ् प्रत्यय परे रहते ऋ धातु और संयोगादि ऋकारान्त धातुके ऋकारको गुण हो। ह्वर्यात्। अह्वार्षीत्। अह्वार्ष्टाम्॥ स्वृ धातु शब्द और उपतापमें है। "स्वरतिसूति० २२७९" इस सूत्रसे विकल्प करके इट् होगा–सस्वरिथ, सस्वर्थ। व और म परे रहते किस प्रकारसे होगा सो आगे कहतेहैं॥

२३८१ श्र्युकः किति।७।२।११॥

श्रिञ एकाच उगन्ताच्च परयोर्गित्कितोरिण्न स्यात्। परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वादृद्धनोरिति नित्यमिट्। स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टाम्। अस्वार्षीत्। अस्वार्ष्टाम्॥ ३१॥ स्मृ चिन्तायाम्॥ ३२॥ ह्वृ संवरणे॥ ३३॥ सृ गतौ। क्रादित्वान्नेट्। ससर्थ। सस्रुव। रिङ्, स्रियात्। असार्षीत्। असार्ष्टाम्॥

२३८१–श्रि धातु और एकाच् उक् (उ, ऋ, ऌ) अन्तवाले धातुके परे स्थित गित् और कित् प्रत्ययको इट् न हो। "स्वरति०" इससे प्राप्त विकल्पको बाधा देकर पूर्वमें प्रतिषेधकांडारम्भसामर्थ्यके कारण इस सूत्रसे निषेध प्राप्ति होनेपर क्र्यादि नियमके अनुसार नित्य इट् होगा–सस्वरिव। सस्वरिम। परत्वके कारण ऋकारान्त धातु और हन् धातुके उत्तर स्थित स्यको नित्य इट् होगा–स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टाम्। अस्वार्षीत्। अस्वार्ष्टाम्॥ स्मृ धातु चिन्ता करनेमें है॥ ह्वृ धातु संवरणमें है॥ सृ धातु गतिमें है। क्रादित्वके कारण इट् न होगा–ससर्थ। सस्रुव। ऋकारके स्थानमें रिङ् हुआ–। स्रियात्। असार्षीत्। असार्ष्टाम्॥

२३८२ सर्तिशास्त्यर्तिभ्यश्च।३।१।५६॥

एभ्यश्च्लेरङ् स्यात्कर्तरि लुङि। इह लुग्विकरणशासिना साहचर्यात्सर्त्यर्ती जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योर्नाङ्। शीघ्रगतौ तु पाघ्राध्मेति शिति धौरादेशः। धावति॥ ३४॥ ऋ गतिप्रापणयोः। ऋच्छति॥

२३८२–कर्तृ वाच्यमें लुङ् परे रहते सृ, शास् और ऋ धातुके उत्तर च्लिके स्थानमें अङ् हो। इस स्थलमें लुप्तशप् शास धातुके साहचर्य्यके कारण 'सर्त्ति' और 'अर्त्ति' धातु भी जुहोत्यादिगणीय गृहीत हुए हैं, इस कारण भ्वादि गणीय उक्त धातुके उत्तर अङ् नहीं होगा। शीघ्र गतिके अर्थमें "पाघ्राध्मा०" इस सूत्रसे शित् परे धौ आदेश होगा–धावति॥ ऋ धातु गति और प्रापणार्थमें है–ऋच्छति॥

२३८३ ऋच्छत्यॄताम्।७।४।११॥

तौदादिकऋच्छेर्ऋधातोर्ॠतां च गुणः स्याल्लिटि। णलि प्राग्वदुपधावृद्धिः। आर। आरतुः। आरुः॥

२३८३–लिट् परे रहते तुदादिगणीय ऋच्छ धातु और ऋ धातु और ॠकारान्त धातुके ऋकारको गुण हो। णल् परे रहते पूर्ववत् उपधाको वृद्धि होगी–आर। आरतुः। आरुः॥

२३८४ इडत्त्यर्तिव्ययतीनाम्।७।२।६६॥

अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टाम्॥ ३५॥ गृ घृ सेचने। गरति। जगार। जगर्थ। जग्रिव। रिङ्। ग्रियात्। अगार्षीत्॥ ३७॥ ध्वृ हूर्छने॥ ३८॥ स्रु गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। णिश्रीति चङ्। लघूपधगुणादन्तरङ्गत्वादुवङ्। असुस्रुवत्॥ ३९॥ षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सुषोथ–सुषविथ। सुषुविव। सोता॥

२३८४–अद, ऋ और व्येञ् धातुके उत्तर थल् प्रत्ययको नित्य इट्का आगम हो। आरिथ। अर्ता। अरिष्यति। अर्य्यात्। आर्षीत्। आर्ष्टाम्॥ गृ और घृ धातु सेचन करनेमें है। गरति। जगार। जगर्थ। जग्रिव। ऋके स्थानमें रिङ् आदेश होगा। ग्रियात्। अगार्षीत्॥ ध्वृ धातु हूर्छनमें है॥ स्रु धातु गतिमें है। सुस्रोथ। सुस्रुव। स्रूयात्।

"णिश्रि० २३१२" इस सूत्रसे चङ् हुआ, लघूपध गुणको बाधकर अन्तरङ्गत्वके कारण उवङ् हुआ-असुसुवत् ॥ षु धातु प्रसव और ऐश्वर्यमें है । प्रसव शब्दसे अभ्यनुज्ञा जानना। सुषोथ, सुषुविथ । सुषुविव । सोता ॥

२३८५ स्तुसुधूञ्भ्यः परस्मैपदेषु।७। २।७२॥

एभ्यः सिच इट् स्यात्परस्मैपदेषु । असावीत् । पूर्वोत्तराभ्यां ञिद्भ्यां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे । असौषीत् ॥ ४० ॥ श्रु श्रवणे ॥

२३८५-स्तु, सु और धूञ् धातुके उत्तर परस्मैपदमें सिच्को इट्का आगम हो-असावीत् । पूर्वोत्तर ञित्के (ञ्इत् धातुके) साहचर्य्यके कारण 'सुनोति' इस सु धातुका ही ग्रहण है-असौषीत् ॥ श्रु धातु श्रवणमें है ॥

२३८६ श्रुवः शृ च । ३ । १।७४॥

श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च । शपोपवादः । श्नोर्ङित्त्वाद्धातोर्गुणो न । शृणोति। शृणुतः ॥

२३८६-श्रु धातुके स्थानमें शृ आदेश और श्नु प्रत्यय हो। यह आदेश शप्का विशेषक है । श्नु प्रत्ययके ङित्वके कारण धातुके उकारको गुण नहीं होगा । शृणोति । शृणुतः ॥

२३८७हुश्नुवोः सार्वधातुके ।६।४।८७॥

जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चासंयोगपूर्वोवर्णस्य यण् स्यादजादौ सार्वधातुके । उवङोऽपवादः । शृण्वन्ति । शृणोमि । शृण्वः-शृणुवः । शृण्मः-शृणुमः। शुश्रोथ। शुश्रुव। शृणु। शृणवानि । शृणुयात् । श्रूयात्।अश्रौषीत्॥४१॥ ध्रु स्थैर्ये। ध्रुवति।अयं कुटादौ गत्यर्थोऽपि ॥४२॥ दु द्रु गतौ । दुदोथ-दुदविथ । दुदुविव । दुद्रोथ । दुद्रुव । णिश्रीति चङ्। अदुद्रुवत्॥४३॥ जि ज्रि अभिभवे । अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सकर्मकः । शत्रून् जयति । द्वितीये त्वकर्मकः । अध्ययनात्पराजयते । अध्येतुं ग्लायतीत्यर्थः। विपराभ्यां जेरिति तङ्। पराजेरसोढ इत्यपादानत्वम् ॥ ४५ ॥

अथ ङीङन्ता ङितः ॥ ष्मिङ् ईषद्धसने । स्मयते । सिष्मिये । सिष्मियिढ्वे-सिष्मियिध्वे ॥ १ ॥ गुङ् अव्यक्ते शब्दे । गवते । जुगुवे ॥ २ ॥ गाङ् गतौ । गाते । गाते । गाते । इट एत्वे कृते वृद्धिः । गै । लङ् इटि । अगे । गेत । गेयाताम् । गेरन् । गासीष्ट । गाङ्कुटादिसूत्रे इङादेशस्यैव गाङो ग्रहणं न त्वस्य । तेनाङित्त्वाद् घुमास्थेतीत्वं न । अगास्त । अदादिकोऽयमिति हरदत्तादयः । फले तु न भेदः ॥ ॥ ३ ॥ कुङ् घुङ् उङ् ङुङ् शब्दे । अन्ये तु उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्याहुः । कवते । चुकुवे । घवते । अवते । ऊवे । वार्णादाङ्गं बलीय इत्युवङ् । ततः सवर्णदीर्घः । ओता । ओष्यते । ओषीष्ट । औष्ट । ङवते । ञुङुवे । ङोता ॥७॥ च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ ॥११॥ क्लुङ् इत्येके ॥ १२ ॥ रुङ् गतिरेषणयोः । रेषणं हिंसा । रुरुवे । रवितासे ॥ १३ ॥ धृङ् अवध्वंसने । धरते । दध्रे ॥ १४ ॥ मेङ् प्रणिदाने । प्रणिदानं विनिमयः प्रत्यर्पणं च । प्रणिमयते । नेर्गदेति णत्वम् । तत्र घुप्रकृतिमाङिति पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात् ॥ ॥ १९ ॥ देङ् रक्षणे । दयते ॥

२३८७-अजादि सार्वधातुक प्रत्यय परे रहते हु धातु तथा श्नुप्रत्ययान्त अनेकाच् अङ्गसंज्ञक धातुके असंयोग पूर्वक उवर्णके स्थानमें यण् आदेश हो । यह उवङ्का अपवाद है । शृण्वन्ति । शृणोमि । शृण्वः, शृणुवः । शृण्मः, शृणुमः । शुश्रोथ । शुश्रुव । शृणु। शृणवानि। शृणुयात्। श्रूयात् । अश्रौषीत् ॥ ध्रु धातु स्थैर्य्यमें है । ध्रवति । ध्रु धातु कुटादि होनेपर गत्यर्थक हो ॥ दु और द्रु धातु गतिमें है। दुदोथ, दुदविथ । दुदुविव । दुद्रोथ । दुद्रुव । "णिश्रि० २३१२" इस सूत्रसे चङ् हुआ-अदुद्रुवत् ॥ जि और ज्रि धातु अभिभवमें हैं। अभिभव शब्दसे न्यूनीकरण और न्यूनीभवन जानना । प्रथम अर्थमें सकर्मक है-शत्रून् जयति । द्वितीय अर्थमें अकर्मक है-अध्ययनात् पराजयते, अर्थात् अध्ययनके निमित्त ग्लानिको प्राप्त होताहै "विपराभ्यां जेः २६२५" (वि और परापूर्वक जि धातुके उत्तर आत्मनेपदसंज्ञक प्रत्यय हों) इससे तङ् हुआ, "पराजेरसोढः ५८९" इस सूत्रसे अपादानत्व हुआ ॥

अब डीङ् धातु तक ङकारइत् धातु कहतेहैं ।

ष्मिङ् धातु ईषद्धसनमें है । स्मयते । सिष्मिये । सिष्मियिढ्वे, सिष्मियिध्वे॥गुङ् धातु अव्यक्त शब्दमें है। गवते ।जुगुवे॥

गाङ् धातु गतिमें है । गाते । इट्के स्थानमें एत्व होनेपर वृद्धि होगी-गै । लङ्के स्थानमें इट् करनेपर-अगे । गेत । गेयाताम् । गेरन् । गासीष्ट । "गाङ् कुटादिभ्यः० २४६१" इस सूत्रमें इङ् धातुके स्थानमें आदिष्ट गाङ्का ही ग्रहण है गाङ् धातुका नहीं, इसी कारण ङित्ववशसे "घुमास्था० २४६२" इस सूत्रसे प्राप्त इत्व न हुआ । अगास्त । हरदत्तादिके मतमें यह अदादिगणीय है, दोनों गणमें इसके रूप एक ही तरह होंगे ॥

कुङ्, घुङ्, उङ् और ङुङ् धातु शब्द करनेमें हैं। अन्य मतमें 'उङ्,कुङ्, खुङ्,गुङ्,घुङ्, ङुङ्' धातु पठित हैं। कवते। चुकुवे। घवते। अवते। ऊवे, यहां "वार्णादाङ्गं बलीयः" (वर्णके कार्यसे अंगका कार्य बलवान् होताहै) इस परिभाषासे पहले उवङ् आदेश हुआ और पीछे सवर्णदीर्घ हुआ, कारण कि, उवङ् अंगकार्य है और सवर्णदीर्घ वर्णकार्य है। ओता। ओष्यते। ओषीष्ट। औष्ट। ङवते। जुङुवे। ङोता॥ च्युङ्, ज्युङ्, प्रुङ् और प्लुङ् धातु गतिमें हैं। किसीके मतमें क्लुङ् धातु भी उक्तार्थमें है॥ रुङ् धातु गति और रेषणमें है, रेषण शब्दसे हिंसा जानना। रुरुवे। रवितासे॥ धृङ् धातु अवध्वंसनमें है। धरते। दध्रे॥ मेङ् धातु प्रणिदान अर्थात् विनिमय और प्रत्यर्पणमें है।

प्रणिमयते। 'नेर्गद० २२८५" इस सूत्रसे णत्व हुआ, कारण कि, इस सूत्रमें घु प्रकृतिक माङ् ऐसा पाठ करके ङित् प्रकृतिमेंके भी ग्रहणका इष्टत्व होताहै॥ देङ् धातु रक्षणमें है, दयते॥

२३८८ दयतेर्दिगि लिटि। ७। ४। ९॥

दिग्यादेशेन द्वित्वबाधनमिष्यत इति वृत्तिः। दिग्ये॥

२३८८–लिट् परे रहते देङ् धातुके स्थानमें 'दिगि' आदेश हो। दिगि आदेशसे द्वित्वका बाध इष्ट है, अर्थात् दिगि आदेश होनेपर द्वित्व न हो, ऐसी वृत्ति है–दिग्ये॥

२३८९ स्थाघ्वोरिच्च। १। २। १७॥

अनयोरिदादेशः स्यात् सिच्च कित्स्यात्। अदित। अदिथाः। अदिषि॥ १६॥ श्यैङ् गतौ। श्यायते। शश्ये॥ १७॥ प्यैङ् वृद्धौ। प्यायते। पप्ये। प्याता॥ १८॥ त्रैङ् पालने। त्रायते। तत्रे॥ १९॥ पूङ् पवने। पवते। पुपुवे। पविता॥ २०॥ मूङ् बन्धने। मवते॥ २१॥ डीङ् विहायसा गतौ। डयते। डिड्ये। डयिता॥ २२॥ तॄ प्लवनतरणयोः॥

२३८९–स्था और घुसंज्ञक धातुओंको इदादेश हो और सिच् की कित्संज्ञा हो। अदित। अदिथाः। अदिषि॥ श्यैङ् धातु गतिमें है। श्यायते। शश्ये॥ प्यैङ् धातु वृद्धिमें है। प्यायते। पप्ये। प्याता॥ त्रैङ् धातु पालन करनेमें है। त्रायते। तत्रे॥ पूङ् धातु पवनमें है। पवते। पुपुवे। पविता॥ मूङ् धातु बन्धनार्थमें है। मवते॥ डीङ् धातु आकाशगमनमें है। डयते। डिड्ये। डयिता॥ तॄ धातु प्लवन और तरणमें है॥

२३९० ऋत इद्धातोः। ७। १। १००॥

ऋदन्तस्य धातोरङ्गस्य इत्स्यात्॥ इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन॥ * ॥ तरति। ऋच्छत्यॄतामिति गुणः। तॄफलेत्येत्वम्। तेरतुः। तेरुः॥

२३९०–ऋदन्त अङ्गसंज्ञक धातुको इत् हो। पूर्वविप्रतिषेधसे इत्व और उत्वको बाधकर गुण और वृद्धि हो * तरति "ऋच्छत्यॄताम् २३८३" इस सूत्रसे गुण हुआ। "तॄफल० २३०१" इस सूत्रसे एत्व होगा–तेरतुः। तेरुः॥

२३९१ वॄतो वा। ७। २। ३८॥

वृङ्वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। तरीता-तरिता। अलिटीति किम्। तेरिथ। हलि चेति दीर्घः। तीर्यात्॥

२३९१–वृङ्, वृञ् और ॠदन्त धातुके उत्तर इट्को विकल्प करके दीर्घ हो लिट् परे न हो–तरीता, तरिता। लिट् परे रहते–तेरिथ। "हलि च २५४" इस सूत्रसे दीर्घ होगा–तीर्यात्॥

२३९२ सिचि च परस्मैपदेषु। ७। २। ४०॥

अत्र वॄत इटो दीर्घो न। अतारिष्टाम्॥ २३॥ अथाष्टावनुदात्तेतः। गुप गोपने॥ १॥ तिज निशाने॥ २॥ मान पूजायाम्॥ ३॥ बध बन्धने॥

२३९२–परस्मैपद संज्ञक प्रत्ययपरक सिच् परे रहते वृङ्, वृञ् और ॠदन्त धातुके उत्तर इट्को दीर्घ न हो। अतारिष्टाम्॥

अब आठ अनुदात्तेत् धातु कहे जातेहैं॥

गुप धातु छिपानेमें है॥ तिज धातु निशानमें है॥ मान धातु पूजा करनेमें है॥ बध धातु बन्धनमें है॥

२३९३ गुप्तिज्किद्भ्यः सन्। ३। १। ५॥

२३९४ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। ३। १। ६॥

सूत्रद्वयोक्तेभ्यः सन् स्यान्मानादीनामभ्यासस्येकारस्य दीर्घश्च॥ गुपेर्निन्दायाम्॥ * ॥ तिजेः क्षमायाम्॥ * ॥ कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च॥ * ॥ मानेर्जिज्ञासायाम्॥ * ॥ बधेश्चित्तविकारे॥ * ॥ दानेरार्जवे॥ * ॥ शानेर्निशाने॥ * ॥ सनाद्यन्ता इति धातुत्वम्॥

२३९३–२३९४–इन दोनों सूत्रोंमें जो गुप तिज और ककारइत् धातु और मान, बध, दान और शान धातु इन धातुओंके उत्तर सन् प्रत्यय हो, उनमें मानादि धातुओंके अभ्याससम्बन्धी इकारको दीर्घ हो। किस धातुके उत्तर किस अर्थमें सन् होगा सो दिखाते हैं–गुप धातुके उत्तर निन्दार्थमें, तिज धातुके उत्तर क्षमार्थमें, कित् धातुके उत्तर व्याधिप्रतीकार, निग्रह और अपनयन, नाश और संशयार्थमें, मान धातुके उत्तर जिज्ञासार्थमें, बध धातुके उत्तर चित्तविकारार्थमें, दान धातुके उत्तर आर्जवार्थमें, और शान धातुके उत्तर निशानार्थमें ही सन् हो। "सनाद्यन्ताः० २३०४" इस सूत्रसे धातुत्व होगा॥

२३९५ सन्यङोः । ६ । १ । ९ ॥

सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य । अभ्यासकार्यम् । गुपिप्रभृतयः किद्भिन्ना निन्दाद्यर्थका एवानुदात्तेतः । दानशानौ च स्वरितेतौ । एते नित्यं सन्नन्ताः । अर्थान्तरे त्वननुबन्धकाश्चुरादयः । अनुबन्धस्य केवलेऽचरितार्थत्वात्सन्नन्तात्तङ् । धातोरित्यविहितत्वात्सनोऽत्र नार्धधातुकत्वम् । तेनेड्गुणौ न । जुगुप्सते । जुगुप्सांचक्रे । तितिक्षते । मीमांसते । भष्भावः । चर्त्वम् । बीभत्सते ॥ ४ ॥ रभ राभस्ये । आरभते । आरेभे । रब्धा । रप्स्यते ॥ ५ ॥ डुलभष् प्राप्तौ । लभते ॥ ६ ॥ ष्वञ्ज परिष्वङ्गे ॥

२३९५–सन्नन्त और यङन्त धातुके प्रथम एकाच्को द्वित्व हो । अजादि धातुके द्वितीय एकाच्को द्वित्व हो । द्वित्व होनेपर अभ्यासकार्य्य होगा । किद्भिन्न निन्दाद्यर्थक ही गुपिआदि धातु अनुदात्तेत् अर्थात् आत्मनेपदी हैं, दान और शान धातु उभयपदी हैं, यह सब धातु नित्य सन्नन्त हैं, किन्तु अर्थान्तरमें अनुबन्धशून्य चुरादिगणीय हैं, केवल धातुमें अनुबन्धके अचरितार्थत्वके कारण सन्नन्तसे आत्मनेपद होगा । धातुका अधिकार करके विहित न होनेके कारण इस स्थलमें सन्को आर्धधातुकत्व नहीं हुआ, इस कारण इट् और गुण भी न हुआ–जुगुप्सते । जुगुप्सांचक्रे । तितिक्षते । मीमांसते । भष्भाव और चर्त्व हुआ–बीभत्सते ॥ रभ धातु राभस्य अर्थात् आरंभ करना अर्थमें है । आरभते । आरेभे । रब्धा । रप्स्यते ॥ डुलभष् धातु प्राप्तिमें है । लभते ॥ ष्वञ्ज धातु परिष्वङ्गमें है ॥

२३९६ दंशसञ्जस्वञ्जां शपि।६।४।२५॥

२३९६–शप् परे रहते दंश, सञ्ज, स्वञ्ज इन धातुओंके नकारका लोप हो ॥

२३९७ रञ्जेश्च । ६ । ४ । २६ ॥

एषां शपि न लोपः । स्वजते । परिष्वजते ॥ श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरम्॥ देभतुः । सस्वज इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते । सदेः परस्य लिटीतिसूत्रे, स्वञ्जेरुपसंख्यानम् ॥ * ॥ अतोऽभ्यासात्परस्य षत्वं न । परिषस्वजे–परिषस्वञ्जे । सस्वजिषे–सस्वञ्जिषे । स्वक्ता । स्वङ्क्ष्यते । स्वजेत । स्वङ्क्षीष्ट । अस्वंक्त । प्रत्यष्वंक्त । प्राक्सितादिति षत्वम् । परिनिविभ्यस्तु सिवादीनां वेति विकल्पः । एतदर्थमेवोपसर्गात्सुनोतीत्येव सिद्धे स्तुस्वञ्ज्योः परिनिवीत्यत्र पुनरुपादानम् । पर्यष्वंक्त–पर्यस्वंक्त ॥ ७ ॥ हद पुरीषोत्सर्गे । हदते । जहदे । हत्ता । हत्स्यते । हदेत । हत्सीष्ट । अहत्त ॥

अथ परस्मैपदिनः ॥ ञिष्विदा अव्यक्ते शब्दे ॥ १ ॥ स्कन्दिर् गतिशोषणयोः । चस्कन्दिथ–चस्कन्थ । स्कन्ता । स्कन्त्स्यति । नलोपः । स्कद्यात् । इरित्त्वादङ् वा । अस्कदत्–अस्कान्त्सीत् । अस्कान्ताम् । अस्कान्त्सुः ॥

२३९७–शप् परे रहते रञ्ज धातुके भी नकारका लोप हो । स्वजते । परिष्वजते ॥ श्रन्थि, ग्रन्थि, दंभि और स्वञ्जि धातुके उत्तर स्थित लिट्को विकल्प करके कित्त्व हो, यह दूसरे व्याकरणका मत है, भाष्यमें " देभतुः, सस्वजे " ऐसे उदाहरण देखेजानेके कारण इस स्थानमें भी उस व्याकरणका आश्रयण हुआहै । " सदेः परस्य लिटि २३३१ " इस सूत्रमें वृत्तिकारने स्वञ्ज धातुका उपसंख्यान (स्वञ्ज धातुसम्बन्धी अभ्याससे परे स्थित सकारको षत्वनिषेध) कियाहै, इस कारण अभ्याससे पर भागको षत्व नहीं होगा–परिषस्वजे, परिषस्वञ्जे । सस्वजिषे । सस्वञ्जिषे । स्वङ्क्ता । स्वङ्क्ष्यते । स्वजेत । स्वङ्क्षीष्ट । अस्वङ्क्त । प्रत्यष्वङ्क्त, यहां " प्राक्सितात्० २२७६ " इस सूत्रसे षत्व हुआ ।

परि, नि और विपूर्वक स्वञ्ज धातुके " सिवादीनां वा २३५९ " इस सूत्रसे सकारको विकल्प करके षत्व होगा, इस कारण ही " उपसर्गात् सुनोति० २२७० " इस सूत्रसे षत्व सिद्ध होनेपर भी " परिनिविभ्यः० २२७५ " इस सूत्रमें दुबारा ग्रहण कियाहै । पर्यष्वंक्त, पर्यस्वंक्त ॥

हद धातु मलत्यागनेमें है । हदते । जहदे । हत्ता । हत्स्यते । हदेत । हत्सीष्ट । अहत्त ॥

अब परस्मैपदी धातु कहे जातेहैं ।

ञिष्विदा धातु अव्यक्त शब्द करनेमें है ॥ स्कन्दिर् धातु गति और शोषणमें है । चस्कन्दिथ, चस्कन्थ । स्कन्ता । स्कन्त्स्यति । नकारका लोप हुआ–स्कद्यात् । इरित् धातुके उत्तर विकल्प करके अङ् होताहै–अस्कदत्, अस्कान्त्सीत् । अस्कान्ताम् । अस्कान्त्सुः ॥

२३९८ वेस्कन्देरनिष्ठायाम् ।८।३।७३॥

षत्वं वा स्यात् । कृत्येवेदम् । अनिष्ठायामितिपर्युदासात् । विष्कन्ता–विस्कन्ता । निष्ठायां तु विस्कन्नः ॥

२३९८–निष्ठाभिन्न प्रत्यय परे रहते विपूर्वक स्कन्द धातुके सकारको विकल्प करके षत्व हो । 'अनिष्ठायाम्' इस सूत्रोक्त पर्य्युदासके कारण कृत्य प्रत्यय परे रहते ही विकल्प करके षत्व हो,अन्य प्रत्यय परे रहते न हो । विष्कन्ता, विस्कन्ता । निष्ठा प्रत्यय परे षत्व नहीं होगा–विस्कन्नः ॥

२३९९ परेश्च । ८ । ३ । ७४ ॥

अस्मात्परस्य स्कन्देः सस्य षो वा । योगविभागादनिष्ठायामिति न संबध्यते । परिष्कन्दति–परिस्कन्दति । परिष्कण्णः–परिस्कन्नः । षत्वपक्षे

णत्वम्। न च पदद्वयाश्रयतया बहिरङ्गत्वात्षत्वस्यासिद्धत्वम्। धातूपसर्गयोः कार्यमन्तरङ्गमित्यभ्युपगमात्। पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यम्। पूर्वं साधनेनेति मतान्तरे तु न णत्वम्॥ २॥ यभ मैथुने। येभिथ-ययब्ध। यब्धा। यप्स्यति। अयाप्सीत्॥ ३॥ णम प्रह्वत्वे शब्दे च। नेमिथ-ननन्थ। नन्ता। अनंसीत्। अनंसिष्टाम्॥४॥ गम्लृ सृप्लृ गतौ॥

२३९९-परिपूर्वक स्कन्द धातुके सकारको विकल्प करके षत्व हो। भिन्न सूत्र करणके कारण इस स्थलमें 'अनिष्ठायाम्' इस सूत्रोक्त पर्य्युदासका संबन्ध नहीं होगा। परिष्कन्दति, परिस्कन्दति। परिष्कण्णः, परिस्कन्नः। षत्व होनेपर णत्व होगा। पद द्वयके आश्रयके कारण षत्वविधायक सूत्रके बहिरङ्गत्वके कारण असिद्धि होगी ऐसा कहना चाहिये, क्योंकि धातु और उपसर्गका जो कार्य्य है वह अन्तरङ्ग है, बहिरंग नहीं है, इस कारण भाष्यकारने कहाहै कि, प्रथम धातु और उपसर्गके साथ युक्त होताहै, पश्चात् कार्य होताहै। पूर्वमें ही कार्य हो, ऐसा मतान्तर है, तब णत्व नहीं होगा॥

यभ धातु मैथुनमें है। येभिथ, ययब्ध। यब्धा। यप्स्यति। अयाप्सीत्॥ णम धातु प्रह्वत्व और शब्दमें है। नेमिथ, ननन्थ। नन्ता। अनंसीत्। अनंसिष्टाम्॥ गम्लृ और सृप्लृ धातु गतिमें हैं॥

२४०० इषुगमियमां छः। ७।३। ७७॥

एषां छः स्याच्छिति परे। गच्छति। जगाम। जग्मतुः। जग्मुः। जगमिथ-जगन्थ। गन्ता॥

२४००-शित् प्रत्यय परे रहते इषु, गम् और यम् इन धातुओंके अन्त्य वर्णके स्थानमें छ आदेश हो। गच्छति। जगाम। जग्मतुः। जग्मुः। जगमिथ, जगन्थ। गन्ता॥

२४०१ गमेरिट् परस्मैपदेषु। ७।२।५८॥

गमेः परस्य सकारादेरिट् स्यात्। गमिष्यति। लृदित्वादङ्। अनङीतिपर्युदासान्नोपधालोपः। अगमत्। सर्पति। ससर्प॥

२४०१-परस्मैपदमें गम धातुके उत्तर स्थित सकारादि प्रत्ययको इट्का आगम हो। गमिष्यति। लृइत् होनेके कारण गम धातुके उत्तर अङ् होगा "गमहन०" इस सूत्रमें 'अनङि' इस पर्य्युदास विधानके कारण धातुकी उपधाका लोप न होगा-अगमत्॥ सर्पति। ससर्प॥

२४०२ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्। ६। १। ५९॥

उपदेशेनुदात्तो य ऋदुपधस्तस्याम्वा स्याज्झलादावकिति परे। स्रप्ता-सर्प्ता। स्रप्स्यति-सर्प्स्यति। असृपत्॥ ६॥ यम उपरमे। यच्छति। येमिथ-ययन्थ। यन्ता। अयंसीत्। अयंसिष्टाम्॥ ७॥ तप सन्तापे। तप्ता। अताप्सीत्॥

२४०२-झलादि अकित् प्रत्यय परे रहते उपदेशावस्थामें अनुदात्त जो ऋकारोपध धातु उसको विकल्प करके अम्का आगम हो। स्रप्ता, सर्प्ता। स्रप्स्यति, सर्प्स्यति। असृपत्॥ यम धातु उपरममें है। यच्छति। येमिथ, ययन्थ। यन्ता। अयंसीत्। अयंसिष्टाम्॥ तप धातु संतापमें है। तप्ता। अताप्सीत्॥

२४०३ निसस्तपतावनासेवने। ८।३।१०२॥

षः स्यात्। आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्विषये। निष्टपति॥ ८॥ त्यज हानौ। तत्यजिथ-तत्यक्थ। त्यक्ता। अत्याक्षीत्॥९॥ षञ्ज सङ्गे। दंशसञ्जस्वञ्जां शपीति नलोपः। सजति। सङ्क्ता॥ १०॥ दृशिर् प्रेक्षणे। पश्यति॥

२४०३-आसेवन शब्द पौनःपुन्यमें है, अनासेवनमें अर्थात् अपौनःपुन्यार्थमें तप धातुके पूर्ववर्ती निस् उपसर्गके सकारको षत्व हो। निष्टपति॥ त्यज धातु हानिमें है। तत्यजिथ, तत्यक्थ। त्यक्ता। अत्याक्षीत्॥ षञ्ज धातु संगमें है। "दंशसञ्जस्वञ्जां शपि २३९६" इस सूत्रसे नकारका लोप हुआ-सजति। सङ्क्ता॥ दृशिर् धातु प्रेक्षणमें है। पश्यति॥

२४०४ विभाषा सृजिदृशोः। ७।२।६५॥

आभ्यां थल इड्वा॥

२४०४-सृज और दृश् धातुके उत्तर थल् प्रत्ययके स्थानमें विकल्प करके इट् हो॥

२४०५ सृजिदृशोर्झल्यमकिति। ६।१।५८॥

अनयोरमागमः स्याज्झलादावकिति। ददर्ष्ठ-ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्। इरित्वादङ् वा॥

२४०५-कित्भिन्न झलादि प्रत्यय परे रहते सृज और दृश् धातुको अमागम हो। ददर्ष्ठ, ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्। इरित्वके कारण विकल्पसे अङ् होगा-॥

२४०६ ऋदृशोऽङि गुणः। ७।४।१६॥

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे॥

२४०६-अङ् प्रत्यय परे रहते ऋवर्णान्त धातु और दृश् धातुको गुण हो। अदर्शत्। अङ्के अभाव पक्षमें कैसा होगा सो आगेके सूत्रसे कहतेहैं-॥

२४०७ न दृशः। ३। १। ४७॥

दृशेः क्सो न। अद्राक्षीत्॥ ११॥ दंश दशने। दशनं दंष्ट्राव्यापारः। पृषोदरादित्वाद-

नुनासिकलोपः । अत एव निपातनादित्येके । तेषामप्यत्रैव तात्पर्यम् । अर्थनिर्देशस्याधुनिकत्वात् । दंशसञ्जेति नलोपः । दशति । ददंशिथ–ददंष्ठ । दंष्टा । दङ्क्ष्यति । दश्यात् । अदाङ्क्षीत् ॥ १२ ॥ कृष विलेखने । विलेखनमाकर्षणम् । क्रष्टा–कर्ष्टा । क्रक्ष्यति–कर्क्ष्यति ॥ स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः ॥ * ॥ अक्राक्षीत् । अक्राष्टाम् । अकार्क्षीत् । अकार्ष्टाम् । अकार्क्षुः । पक्षे क्सः । अकृक्षत् । अकृक्षताम् । अकृक्षन् ॥ १३ ॥ दह भस्मीकरणे । देहिथ–ददग्ध । दग्धा । धक्ष्यति । अधाक्षीत् । अदाग्धाम् । अधाक्षुः ॥ १४ ॥ मिह सेचने । मिमेह । मिमेहिथ । मेढा । मेक्ष्यति । अमिक्षत् ॥ १५ ॥ कित निवासे रोगापनयने च । चिकित्सति । संशये प्रायेण विपूर्वः । विचिकित्सा तु संशय इत्यमरः । अस्यानुदात्तेत्त्वमाश्रित्य चिकित्सते इत्यादि कश्चिदुदाजहार । निवासे तु केतयति १६ ॥ दान खण्डने । शान तेजने ॥ इतो वहत्यन्ताः स्वरितेतः । दीदांसति–दीदांसते । शीशांसति–शीशांसते । अर्थविशेषे सन् । अन्यत्र दानयति । शानयति ॥ २ ॥ डुपचष् पाके । पचति । पचते । पेचिथ–पपक्थ । पेचे । पक्ता । पक्षीष्ट ॥ ३ ॥ षच समवाये । सचति । सचते ॥ ॥ ४ ॥ भज सेवायाम् । बभाज । भेजतुः । भेजुः । भेजिथ–बभक्थ । भक्ता । भक्ष्यति । भक्ष्यते । अभाक्षीत् । अभक्त ॥ ५ ॥ रञ्ज रागे । नलोपः । रजति । रजते । रज्यात् । रङ्क्षीष्ट । अराङ्क्षीत् । अरङ्क्त ॥ ६ ॥ शप आक्रोशे । आक्रोशो विरुद्धानुध्यानम् । शशाप । शेपे । अशाप्सीत् । अशप्त ॥७॥ त्विष दीप्तौ । त्वेषति । त्वेषते । तित्विषे । त्वेष्टा । त्वेक्ष्यति । त्वेक्ष्यते । त्विष्यात् । त्विक्षीष्ट । अत्विक्षत् । अत्विक्षत । अत्विक्षाताम् । अत्विक्षन्त ॥ ८ ॥ यज देवपूजासङ्गतिकरणदानेषु । यजति । यजते ॥

२४०७–दृश् धातुके उत्तर च्लिके स्थानमें क्स आदेश नहीं हो । अद्राक्षीत् ॥ दंश धातु काटनेमें हैयहां (दंशनमें) पृषोदरादित्वके कारण अनुनासिक (नकार)का लोप हुआ, इसी निपातनके कारण लोप हुआ, यह कोई २ कहतेहैं, उनका भी इसीमें तात्पर्य्य है कारण कि, अर्थका निर्देश आधुनिक है । "दंशसञ्ज०२३९६" इस सूत्रसे नकारका लोप हुआ–दशति । ददंशिथ, ददंष्ठ । दंष्टा । दङ्क्ष्यति । दश्यात् । अदाङ्क्षीत् ॥ कृष धातु विलेखन अर्थात् आकर्षणमें है । क्रष्टा, कर्ष्टा । क्रक्ष्यति, कर्क्ष्यति ॥

स्पृश, मृश, कृष, तृप और दृप धातुके उत्तर च्लिके स्थानमें विकल्प करके सिच् हो * अक्राक्षीत् । अक्राष्टाम् । अकार्क्षीत् । अकार्ष्टाम् । अकार्क्षुः । विकल्प पक्षमें क्स होकर–अकृक्षत् । अकृक्षाताम् । अकृक्षन् ॥

दह धातु जलानेमें है । देहिथ, ददग्ध । दग्धा । धक्ष्यति । अधाक्षीत् । अदाग्धाम् । अधाक्षुः ॥ मिह धातु सेचनमें है । मिमेह । मिमेहिथ । मेढा । मेक्ष्यति । अमिक्षत् ॥ कित् धातु निवास और रोगापनयनमें है । चिकित्सति । संशयार्थमें कित् धातु प्रायः विपूर्वक होताहै, क्योंकि अमरकोषमें " विचिकित्सा तु संशयः " ऐसा कहाहै, इस कित् धातुके अनुदात्तेत्त्व आश्रय करके ' चिकित्सते ' इत्यादि कोई २ उदाहरण देते हैं, परन्तु निवासार्थमें ' केतयति ' ऐसा होगा ॥ दान धातु खण्डनमें है ॥ शान धातु तेजनमें है ॥

यहांसे लेकर वह धातु पर्यन्त स्वरितेत् हैं ॥

दीदांसति । दीदांसते । शीशांसति । शीशांसते । अर्थविशेषमें ही सन् होताहै अन्यत्र नहीं, जैसे–दानयति । शानयति ॥ डुपचष् धातु पाकमें है । पचति । पचते । पेचिथ, पपक्थ । पेचे । पक्ता । पक्षीष्ट ॥ षच धातु समवायमें है । सचति । सचते ॥ भज धातु सेवामें है । बभाज । भेजतुः । भेजुः । भेजिथ, बभक्थ । भक्ता । भक्ष्यति । भक्ष्यते । अभाक्षीत् । अभक्त ॥ रञ्ज धातु रंगनेमें है । इस धातुके नकारका लोप होगा–रजति । रजते । रज्यात् । रङ्क्षीष्ट । अराङ्क्षीत् । अरङ्क्त ॥ शप धातु आक्रोश अर्थात् विरुद्ध चिन्तामें जानना । शशाप । शेपे । अशाप्सीत् । अशप्त ॥ त्विष धातु दीप्तिमें है । त्वेषति । त्वेषते । तित्विषे । त्वेष्टा । त्वेक्ष्यति । त्वेक्ष्यते । त्विष्यात् । त्विक्षीष्ट । अत्विक्षत् । अत्विक्षत । अत्विक्षाताम् ॥ अत्विक्षन्त यज धातु देवपूजा, संगतिकरण और दानमें है । यजति । यजते ॥

२४०८ लिट्यभ्यासस्योभयेषाम् । ६ । १ । १७ ॥

वच्यादीनां ग्रह्यादीनां चाभ्यासस्य सम्प्रसारणं स्याल्लिटि ॥ इयाज ॥

२४०८–लिट् परे रहते वच्यादि और ग्रह्यादि धातुओंके अभ्यासको संप्रसारण हो–इयाज ॥

२४०९ वचिस्वपियजादीनां किति । ६ । १ । १५ ॥

वचिस्वप्योर्यजादीनां च सम्प्रसारणं स्यात्किति । पुनःप्रसङ्गविज्ञानाद्द्वित्वम् । ईजतुः । ईजुः । इयजिथ–इयष्ठ । ईजे । यष्टा । यक्ष्यति । यक्ष्यते । इज्यात् । यक्षीष्ट । अयाक्षीत् । अयष्ट ॥ ९ ॥ डुवप् बीजसन्ताने । बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं च । अयं छेदनेपि । केशान्वपति । उवाप । ऊपे । वप्ता । उप्यात् । वप्सीष्ट । प्रण्यवाप्सीत् । अवप्त ॥ १० ॥ वह प्रापणे । उवाह । उवहिथ ॥ सहिवहोरोदवर्णस्य ॥ उवोढ । ऊहे । वोढा । वक्ष्य-

ति । वक्ष्यते । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवोढ्म् ॥ ११ ॥ वस निवासे परस्मैपदी । वसति । उवास ॥

२४०९–कित् प्रत्यय परे रहते वच और स्वप और यजादि धातुओंको संप्रसारण हो । पुनर्वार प्रसङ्ग विज्ञानके कारण द्वित्व होगा–ईजतुः । ईजुः । इयजिथ, इयष्ठ । ईजे । यष्टा । यक्ष्यति।यक्ष्यते। इज्यात् । यक्षीष्ट । अयाक्षीत् । अयष्ट॥ डुवप् धातु क्षेत्रमें बीज बोना और गर्भाधानमें है । यह डुवप धातु छेदनार्थमें भी है । केशान्–वपति । उवाप । ऊपे । वप्ता । उप्यात् । वप्सीष्ट । प्रण्यवाप्सीत् । अवप्त ॥ वह धातु प्राप्ति करनेमें है । उवाह । उवहिथ । "सहिव हो रोदवर्णस्य २३५७" इस सूत्रसे अवर्णके स्थानमें ओकार हुआ । वोढा । वक्ष्यति।वक्ष्यते। अवाक्षीत्। अवोढाम् । अवाक्षुः। अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवोढ्म् ॥ वस धातु निवासमें है, यह धातु परस्मैपदी है । वसति । उवास ॥

२४१० शासिवसिघसीनां च । ८ । ३ । ६० ॥

इण्कुभ्यां परस्यैषां सस्य षः स्यात् । ऊषतुः । ऊषुः । उवसिथ–उवस्थ । वस्ता ॥ (सः स्यार्धधातुके २३४२) वत्स्यति । उष्यात् । अवात्सीत् । अवात्ताम् ॥ १२ ॥ वेञ् तन्तुसन्ताने । वयति । वयते ॥

२४१०–इण् और कवर्गके उत्तर शास्, वस् और घस् धातुके सकारको षत्व हो । ऊषतुः । ऊषुः । उवसिथ, उवस्थ । वस्ता । आर्धधातुक परे सकारके स्थानमें तकार हो (२३४२) वत्स्यति । उष्यात् । अवात्सीत् । अवात्ताम् । वेञ् धातु तंतुविस्तार अर्थात् वस्त्रादि बुननेमें है । वयति. । वयते ॥

२४११ वेञो वयिः । २ । ४ । ४१ ॥

वा स्याल्लिटि । इकार उच्चारणार्थः । उवाय ॥

२४११–लिट् परे रहते वेञ् धातुके स्थानमें विकल्प करके वयि आदेश हो । वयिका इकार उच्चारणार्थ है । उवाय ॥

२४१२ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । ६ । १ । १६ ॥

एषां किति ङिति च सम्प्रसारणं स्यात् । यकारस्य प्राप्ते ॥

२४१२–कित्, और ङित् प्रत्यय परे रहते ग्रह, ज्या, वय, व्यध, वश, विच्, वृश्च, प्रच्छ और भ्रस्ज धातुको संप्रसारण हो । इससे यकारके स्थानमें संप्रसारण प्राप्त होनेपर आगे कहतेहैं ॥

२४१३ लिटि वयो यः । ६ । १ । ३८ ॥

वयो यस्य सम्प्रसारणं न स्याल्लिटि । ऊयतुः । ऊयुः ॥

२४१३–लिट् परे रहते वय धातुके यकारको संप्रसारण न हो । ऊयतुः । ऊयुः ॥

२४१४ वश्चास्यान्यतरस्यां किति । ६ । १ । ३९ ॥

वयो यस्य वो वा स्यात्किति लिटि । ऊवतुः । ऊवुः । वयस्तासावभावात्थलि नित्यमिट् । उवयिथ । स्थानिवद्भावेन ञित्वात्तङ् । ऊये । ऊवे । वयादेशाभावे ॥

२४१४–कित् लिट् परे रहते वय धातुके यकारके स्थानमें विकल्प करके व हो । ऊवतुः। ऊवुः॥वय धातुके उत्तर तासि प्रत्ययके अभावके कारण उसके उत्तर थल्को नित्य इट् होगा–उवयिथ । स्थानिवद्भावके कारण ञित्व होनेसे तङ् हुआ–ऊये । ऊवे । वयादेशके अभावमें कैसा होगा सो अगले सूत्रमें कहतेहैं–॥

२४१५ वेञः । ६ । १ । ४० ॥

वेञो न सम्प्रसारणं स्याल्लिटि । ववौ। ववतुः । ववुः । वविथ–ववाथ । ववे । वाता । ऊयात्– वासीष्ट । अवासीत् ॥ १३ ॥ व्येञ् संवरणे । व्ययति । व्ययते ॥

२४१५–लिट् परे रहते वेञ् धातुको संप्रसारण न हो । ववौ । ववतुः । ववुः । वविथ,ववाथ । ववे । वाता । ऊयात्, वासीष्ट। अवासीत्॥ व्येञ् धातु संवरणमें है । व्ययति। व्ययते॥

२४१६ न व्यो लिटि । ६ । १ । ४६ ॥

व्येञ आत्वं न स्याल्लिटि । वृद्धिः । परमपि हलादिःशेषं बाधित्वा यस्य सम्प्रसारणम् । उभयेषां ग्रहणसामर्थ्यात् । अन्यथा वच्यादीनां ग्रहादीनां चानुवृत्त्यैव सिद्धे किं तेन । विव्याय । विव्यतुः । विव्युः । इडत्त्यर्तीति नित्यमिट् । विव्ययिथ । विव्याय–विव्यय । विव्ये । व्याता । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त ॥ १४ ॥ ह्वेञ् स्पर्धायां शब्दे च ॥

२४१६–लिट् परे रहते व्येञ् धातुके एकारके स्थानमें आकार न हो । वृद्धि हुई । "हलादिः शेषः" इस सूत्रके परवर्त्ती होनेपर भी इसको बाध करके "लिट्यभ्यासस्योभयेषाम् २४०८" इस सूत्रसे दोनोंके ग्रहणके कारण यकारको संप्रसारण होगा, अन्यथा वच्यादि और ग्रहादि धातुकी अनुवृत्तिद्वारा ही संप्रसारण सिद्ध होजाता तो 'उभयेषाम्' पद के ग्रहणका क्या प्रयोजन होता अर्थात् व्यर्थ होजाता । विव्याय । विव्यतुः। विव्युः । "इडत्त्यर्ति० २३८४" इस सूत्रसे नित्य इट् हुआ। विव्ययिथ । विव्याय, विव्यय । विव्ये । व्याता । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त ॥ ह्वेञ् धातु स्पर्द्धा और शब्दमें है ॥

२४१७ अभ्यस्तस्य च । ६ । १ । ३३ ॥

अभ्यस्तीभविष्यतो ह्वञः संप्रसारणं स्यात् । ततो द्वित्वम् । जुहाव । जुहुवतुः । जुहुवुः । जुहविथ-जुहोथ।जुहुवे। ह्वाता। हूयात्। ह्वासीष्ट॥

२४१७-जिसकी अभ्यस्त संज्ञा होगी ऐसा जो ह्वञ् धातु उसको संप्रसारण हो । पश्चात् द्वित्व होगा । जुहाव । जुहुवतुः । जुहुवुः । जुहविथ, जुहोथ । जुहुवे । ह्वाता । हूयात् । ह्वासीष्ट॥

२४१८ लिपिसिचिह्वश्च । ३ । १ । ५३ ॥

एभ्यश्च्लेरङ् स्यात् ॥

२४१८-लिप्, सिच् और ह्वञ् धातुके उत्तर च्लिके स्थानमें अङ् हो ॥

२४१९ आत्मनेपदेष्वन्यतरस्याम् । ३ । १ । ५४ ॥

आतो लोपः । अह्वत । अह्वताम् । अह्वन्। अह्वत । अह्वास्त ॥ १९ ॥

अथ द्वौ परस्मैपदिनौ ॥ वद व्यक्तायां वाचि । अच्छं वदति । उवाद । ऊदतुः । उवदिथ । वदिता । उद्यात् । वदव्रजेति वृद्धिः । अवादीत ॥१॥ टुओश्वि गतिवृद्ध्योः । श्वयति ॥

२४१९-आत्मनेपदमें उक्त धातुओंके उत्तर च्लिके स्थानमें विकल्प करके अङ् हो । अङ् परे रहते आकारका लोप हुआ (२३७२) अह्वत । अह्वताम् । अह्वन् । अह्वत। अह्वास्त ॥

अब दो परस्मैपदी धातु कहे जातेहैं ।

वद धातु स्पष्ट कथनमें है । अच्छं वदति । उवाद । ऊदतुः । ऊदुः । उवदिथ । वदिता । उद्यात् । "वदव्रज० २२६७" इस सूत्रसे वृद्धि हुई-अवादीत् ॥ टुओश्वि धातु गति और वृद्धिमें है । श्वयति ॥

२४२० विभाषा श्वेः । ६ । १ । ३० ॥

श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च। शुशाव । शुशुवतुः॥ श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः । तेन लिट्यभ्यासस्येति संप्रसारणं न । शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात् । जॄस्तम्भ्वित्यङ् वा ॥

२४२०-लिट् और यङ् प्रत्यय परे रहते श्वि धातुको विकल्प करके संप्रसारण हो । शुशाव । शुशुवतुः ।

लिट् परे रहते श्वि धातुको अभ्यास लक्षण कार्य्यका प्रतिषेध हो इससे "लिट्यभ्यासस्य० २४०८" इस सूत्रसे लिट् परे रहते अभ्यासको संप्रसारण नहीं होगा-शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात् । "जॄस्तम्भु० २२९१" इस सूत्रसे विकल्प करके अङ् हुआ ॥

२४२१ श्वयतेरः । ७ । ४ । १८ ॥

श्वयतेरिकारस्य अकारः स्यादङि । पररूपम् । अश्वत् । अश्वताम् । अश्वन् । विभाषा धेट्श्व्योरिति चङ् । इयङ् । अशिश्वियत् । ह्म्यन्तेति न वृद्धिः । अश्वयीत् ॥ २ ॥ वृत् ॥ यजादयो वृत्ताः । भ्वादिस्त्वाकृतिगणः । तेन चुलुम्पतीत्यादिसंग्रहः ॥

॥ इति भ्वादयः ॥

२४२१-अङ् परे रहते श्वि धातुके इकारके स्थानमें अकार हो । अकार होनेपर पररूप होगा-अश्वत् । अश्वताम् । अश्वन् । "विभाषा धेट्श्व्योः २३७५"इस सूत्रसे चङ् होगा, पश्चात् इयङ् होगा-अशिश्वियत् । "ह्म्यन्त० २२९९" इस सूत्रसे निषेधके कारण वृद्धि न होगी-अश्वयीत् ॥

यजादि धातु समाप्त हुई ॥

भ्वादि धातु आकृतिगणीय हैं, इस कारण 'चुलुम्पति' इत्यादि पद सिद्ध होंगे ॥

॥ इति तिङन्ते भ्वादयः ॥

२४२२ ऋतेरीयङ् । ३ । १ । २९ ॥

ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे । जुगुप्सायामयं धातुरिति बहवः । कृपायां चेत्येके । सनाद्यन्ता इति धातुत्वम्। ऋतीयते । ऋतीयांचक्रे । आर्धधातुकविवक्षायां तु आयादय आर्धधातुके वेतीयङभावे शेषात्कर्तरीति परस्मैपदम् । आनर्त । अर्तिष्यति।आर्तीत्॥१॥

॥ इति भ्वादिप्रकरणम् ॥

२४२२-'ऋति' यह सूत्रपठित धातु है, उसके उत्तर स्वार्थमें इयङ् प्रत्यय हो, अनेकोंके मतसे यह धातु जुगुप्सा वाचक है । कृपामें है, ऐसा एकका मत है । "सनाद्यन्ता० २३०४" इस सूत्रसे धातुत्व होकर ऋतीयते । ऋतीयाञ्चक्रे । आर्धधातुकविवक्षामें तो "आयादय आर्धधातुके वा २३०५" इस सूत्रसे इयङ्का अभाव होनेपर "शेषात्कर्तरि० २१५९" इस सूत्रसे परस्मैपद होगा । आनर्त । अर्तिष्यति । आर्तीत् ॥

॥ इति तिङन्तेभ्वादिप्रकरणम् ॥

अथादादयः २.

अद भक्षणे । द्वौ परस्मै पदिनौ ॥

अद धातु भक्षणमें है, यह दोनों धातु परस्मैपदी हैं ॥

२४२३अदिप्रभृतिभ्यः शपः।२।४।७२॥

लुक् स्यात् । अत्ति । अत्तः । अदन्ति ॥

२४२३-अदादिगणीय धातुओंके उत्तर शप्का लुक् हो, अत्ति । अत्तः । अदन्ति ॥

२४२४ लिट्यन्यतरस्याम् ।२।४।४०॥

अदो घस्लृ वा स्याल्लिटि । जघास । गमहनेत्युपधालोपः। तस्य चर्विधिं प्रति स्थानिवद्भावनिषेधाद्धस्य चर्त्वम् । शासिवसीति षत्वम् ।

जक्षतुः । जक्षुः । घसेस्तासावभावात्थलि नित्यमिट् । जघसिथ । आद । आदतुः । इडत्त्यर्तीति नित्यमिट् । आदिथ । अत्ता । अत्स्यति ॥

२४२४–लिट् परे रहते अद धातुके स्थानमें विकल्प करके घसॢ आदेश हो । जघास । "गमहन० २३६३" इस सूत्रसे उपधाका लोप हुआ, उसको चर्त्व विधिमें स्थानिवद्भावके निषेधके कारण घको चर्त्व हुआ।"शासिवसि० २४१०" इस सूत्रसे षत्व हुआ । जक्षतुः । जक्षुः । घसॢको तासि प्रत्यय परे अभावके कारण थल्में नित्य इट् होकर–जघसिथ । आद। आदतुः । "इडत्त्यर्ति० २३४४"इस सूत्रसे नित्य इट् होकर–आदिथ । अत्ता । अत्स्यति ॥

२४२५ हुझल्भ्यो हेर्धिः । ६ । ४ । १०१ ॥

होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि–अत्तात् । अदानि ॥

२४२५–हु धातु और झलन्त धातुके उत्तर हिके स्थानमें धि आदेश हो, अद्धि । अत्तात् । अदानि ॥

२४२६ अदः सर्वेषाम् । ७ । ३ । १०० ॥

अदः परस्यापृक्तसार्वधातुकस्याडागमः स्यात्सर्वमतेन । आदत् । आत्ताम्।आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् । अद्युः। अद्यात्।अद्यास्ताम् । अद्यासुः ॥

२४२६–सब वैयाकरणोंके मतसे अद धातुके उत्तर अपृक्त सार्वधातुकको अडागम हो । आदत् । आत्ताम् । आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् । अद्युः । अद्यात् । अद्यास्ताम् । अद्यासुः ॥

२४२७ लुङ्सनोर्घसॢ । २ । ४ । ३७ ॥

अदो घसॢ स्यात् लुङि सनि च । लृदित्वादङ् । अघसत्॥२॥हन हिंसागत्योः॥प्रणिहन्ति ॥

२४२७–लुङ् और सन् परे रहते अद् धातुके स्थानमें घसॢ आदेश हो, लृकार इत् होनेके कारण च्लिके स्थानमें अङ् होकर–अघसत् । हन धातु हिंसा और गतिमें है । प्रणिहन्ति ॥

२४२८ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति । ६ । ४ । ३७ ॥

अनुनासिकेति लुप्तषष्ठीकं वनतीतरेषां विशेषणम् । अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। यमि–रमि–नमि–गमि–हनि–मन्यतयोनुदात्तोपदेशाः । तनु–क्षणु–क्षिणु–ऋणु–तृणु–घृणु–वनु–मनु–तनोत्यादयः। हतः । घ्नन्ति ॥

२४२८–झलादि कित् ङित् प्रत्यय परे रहते अनुनासिकान्त तनु आदि धातुओंके और वन धातुके अन्तका लोप हो, इस सूत्रमें अनुनासिक, यह पद लुप्तषष्ठीक है, वन धातुसे भिन्न धातुका अर्थात् अनुदात्तोपदेश और तनोत्यादिका विशेषण है । यम्, रम्, नम्, गम्, हन् और मन् इतने धातु अनुदात्तोपदेश हैं । तनु, क्षणु, क्षिणु, ऋणु, तृणु, घृणु, वनु और मनु इतने तनोत्यादि धातु हैं । हतः । घ्नन्ति ॥

२४२९ वमोर्वा । ८ । ४ । २३ ॥

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः । प्रहण्मि–प्रहन्मि। प्रहण्वः–प्रहन्वः । होहन्तेरिति कुत्वम् । जघान । जघ्नतुः । जघ्नुः ॥

२४२९–व और म परे रहते उपसर्गस्थनिमित्तके उत्तर हन धातुके नकारको विकल्प करके णत्व हो । प्रहण्मि,प्रहन्मि। प्रहण्वः, प्रहन्वः । "हो हन्तेः० ३५८" इस सूत्रसे हन् धातुके हकारको कुत्व, अर्थात् घ होकर–जघान । जघ्नतुः । जघ्नुः ॥

२४३० अभ्यासाच्च । ७ । ३ । ५५ ॥

अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ–जघन्थ । हन्ता । ऋद्धनोरितीट् । हनिष्यति । हन्तु । हतात् । घ्नन्तु ॥

२४३०–अभ्यासके परे स्थित हन् धातुके हके स्थानमें घ हो । जघनिथ, जघन्थ । हन्ता । "ऋद्धनोः० २३६६" इस सूत्रसे इट् होकर–हनिष्यति । हन्तु । हतात् । घ्नन्तु ॥

२४३१ हन्तेर्जः । ६ । ४ । ३६ ॥

हौ परे । आभीयतया जस्यासिद्धत्वाद्धेर्न लुक् । जहि । हनानि । हनाव । हनाम । अहन्। अहताम् । अघ्नन् । अहनम् ॥

२४३१–हि विभक्ति परे रहते हन् धातुके स्थानमें ज आदेश हो । "असिद्धवदत्राभात्" इससे समानाश्रय आभीय कार्य्य (हिका लुक्) कर्त्तव्य रहते समानाश्रय आभीय कार्य्य (जादेश) को असिद्धत्वके कारण हिका लुक् न होकर–जहि । हनानि । हनाव । हनाम । अहन् । अहताम् । अघ्नन् । अहनम् ॥

२४३२ आर्धधातुके । २ । ४ । ३५ ॥

इत्यधिकृत्य ॥

२४३२–आर्धधातुके इसका अधिकार करके–॥

२४३३ हनो वध लिङि । २ । ४ । ४२ ॥

२४३३–लिङ् परे रहते हन् धातुके स्थानमें वध आदेश हो–॥

२४३४ लुङि च । २ । ४ । ४३ ॥

वधादेशोऽदन्तः । आर्धधातुक इति विषयसप्तमी । तेनार्धधातुकोपदेशे अकारान्तत्वादतो–

लोपः । वध्यात् । वध्यास्ताम् । आर्धधातुके किम् । विध्यादौ हन्यात् । हन्तेरिति णत्वम् । प्रहण्यात् । अल्लोपस्य स्थानिवत्त्वादतो हलादेरिति न वृद्धिः । अवधीत् ॥ ३ ॥ अथ चत्वारः स्वरितेतः । द्विष अप्रीतौ । द्वेष्टि । द्विष्टे । द्वेष्टा । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु । द्विष्टात् । द्विड्ढि । द्वेषाणि । द्वेषै । द्वेषावहै । अद्वेट् ॥

२४३४–लुङ् परे रहते भी हन् धातुके स्थानमें वध आदेश हो । वधादेश अकारान्त है 'आर्धधातुके' यह विषय सप्तमी है । (२३०७) इसलिये आर्धधातुक उपदेशकालमें अकारान्तत्वके कारण अकारका लोप होकर–(२३०८) वध्यात् । वध्यास्ताम् । आर्धधातुक न होनेपर विध्यादिमें 'हन्यात्' ऐसा होगा "हन्तेः ३५९" इस सूत्रसे णत्व होकर प्रहण्यात् । "अतो लोपः" इस सूत्रसे जो अकारका लोप हुआहै उसके स्थानिवद्भाव होनेसे "अतो हलादेः" इस सूत्रसे वैकल्पिक वृद्धि न होगी–अवधीत् ॥

अब चार उभयपदी धातु कहतेहैं ।

द्विष धातु अप्रीतिमें है । द्वेष्टि । द्विष्टे । द्वेष्टा । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु । द्विष्टात् । द्विड्ढि । द्वेषाणि । द्वेषै । द्वेषावहै । द्वेषामहै । अद्वेट् ॥

२४३५ द्विषश्च । ३ । ४ । ११२ ॥

लङो झेर्जुस्वा स्यात् । अद्विषुः–अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विक्षीष्ट । अद्विक्षत् ॥ १ ॥ दुह प्रपूरणे । दोग्धि । दुग्धः । धोक्षि । दुग्धे । धुक्षे । धुग्ध्वे । दोग्धु । दुग्धि । दोहानि । धुक्ष्व । धुग्ध्वम् । दोहै । अधोक् । अदोहम् । अदुग्ध । अधुग्ध्वम् । अधुक्षत् । अधुक्षत । लुग्वा दुहेतिलुक्पक्षे तथास्ध्वम्वहिषु लङ्वदपि ॥ २ ॥ दिह उपचये । प्रणिदेग्धि ॥ ३ ॥ लिह आस्वादने । लेढि । लीढः । लिहन्ति । लेक्षि । लीढे । लिक्षे । लीढ्वे । लेढु । लीढि । लेहानि । अलेट् । अलीढ । अलिक्षत् । अलिक्षताम् । अलिक्षत । अलीढ । अलिक्षावहि । अलिह्वहि ॥ ४ ॥ चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेपि । इकारोऽनुदात्तो युजर्थः । विचक्षणः प्रथयन । नुम् तु न । अन्तेदित इति व्याख्यानात् । ङकारस्तु अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः । तेन स्फायन्निर्मोकसन्धीत्यादि सिध्यति । चष्टे । चक्षाते ॥ आर्धधातुके इत्यधिकृत्य ॥

२४३५–द्विष धातुके उत्तर लङ्लकार सम्बन्धी झिके स्थानमें विकल्प करके जुस् हो, अद्विषुः, अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विक्षीष्ट । अद्विक्षत् ॥ दुह धातु प्रपूरणमें है । दोग्धि । दुग्धः । धोक्षि । दुग्धे । धुक्षे, इत्यादि । "लुग्वा दुह २३६५" इस सूत्रसे लुक् पक्षमें तथास्, ध्वम् और वहि प्रत्यय परे लङ्की समानमी रूप होंगे । दिह धातु उपचयमें है । उपचय, अर्थात् वृद्धि । प्रणिदेग्धि ॥ लिह धातु आस्वादनमें है । लेढि, इत्यादि ॥ चक्षिङ् धातु व्यक्त वचनमें है । यह धातु दर्शनार्थमें भी है । इकार अनुदात्त युजर्थ है, जैसे–'विचक्षणः प्रथयन्' इकार इत् होनेसे नुम् तो नहीं कहसकतेहो, कारण कि, अन्त्य इकार इत् है जिसमें ऐसे धातुको नुम् हो, ऐसा व्याख्यान है ।

अनुदात्तेत चक्षिङ् धातु होनेसे आत्मनेपद सिद्ध होनेपर भी ङकार अनुबन्ध क्यों किया ? इसपर कहतेहैं कि, अनुदात्तेत्त्वलक्षण आत्मनेपदके अनित्यत्वज्ञापनार्थ चक्षिङ् धातुमें ङकार अनुबन्ध है, अत एव 'स्फायन्निर्मोकसंधि', इत्यादि पद सिद्ध हुए ॥ चष्टे । चक्षाते । "आर्धधातुके २३७७" इसका अधिकार करके कहते हैं कि–॥

२४३६ चक्षिङः ख्याञ् । २ । ४ । ५४ ॥

२४३६–आर्धधातुकविषयमें चक्ष धातुके स्थानमें ख्याञ् आदेश हो–॥

२४३७ वा लिटि । २ । ४ । ५५ ॥

अत्र भाष्ये ख्शादिरयमादेशः । असिद्धकाण्डे शस्य यो वेति स्थितम् । ञित्वात्पदद्वयम् । चख्यौ–चख्ये । चख्शौ–चख्शे । चयो द्वितीया इति तु न चर्त्वस्यासिद्धत्वात् । चचक्षे । ख्याता–क्शाता । ख्यास्यति । ख्यास्यते । क्शास्यति । क्शास्यते । अचष्ट । चक्षीत । ख्यायात्–ख्येयात् । क्शायात्–क्शेयात् ॥

२४३७–लिट् परे रहते चक्ष धातुके स्थानमें विकल्प करके ख्याञ् आदेश हो, इस स्थलमें भाष्यमें यह आदेश ख्शादि है । असिद्धकाण्डमें स्थित "शस्य यो वा" इस वार्त्तिकसे विकल्प करके शकारके स्थानमें यकार होगा । ञ् इत् होनेके कारण उभयपद होकर–चख्यौ, चख्ये । चख्शौ, चख्शे । यहां "चयो द्वितीयाः" इस वार्तिकसे चय, अर्थात् ककारके स्थानमें चर्त्वके असिद्धत्वके कारण द्वितीय वर्ग (खकार) नहीं हुआ । चचक्षे, इत्यादि ॥

२४३८ अस्यतिवक्तिख्यातिभ्योऽङ् । ३ । १ । ५२ ॥

एभ्यश्च्लेरङ् । अख्यत् । अख्यत । अक्शासीत् । अक्शास्त ॥ वर्जने ख्शाञ् नेष्टः ॥ * ॥ समचक्षिष्टेत्यादि ॥ ५ ॥

अथ पृच्यन्ता अनुदात्तेतः ॥ ईर गतौ कम्पने च । ईर्ते । ईरांचक्रे । ईर्ताम् । ईर्ष्व । ईर्ध्वम् । ऐरिष्ट ॥ १ ॥ ईड स्तुतौ । ईट्टे ।

२४३८–अस्यति (अस्) धातु वच् धातु और ख्या धातुके उत्तर च्लिके स्थानमें अङ् आदेश हो । अख्यत् । अख्यत इत्यादि ।

वर्जन अर्थमें ख्शाञ् आदेश इष्ट नहीं हो, जैसे–समचक्षिष्ट, इत्यादि ।

अब पच धातुपर्यन्त अनुदात्तेत् धातु कहतेहैं ॥

ईर् धातु गमन और कम्पनार्थमें है। ईर्ते। ईराञ्चक्रे। ईरिता। ईरिष्यते । ईर्त्ताम्। ईर्ष्व। ईर्ध्वम्। ऐरिष्ट॥ ईड धातु स्तुतिमें है। ईट्टे॥

२४३९ ईशः से । ७ । २ । ७७ ॥

२४४० ईडजनोर्ध्वे च । ७ ।२।७८॥

ईशीड्जनां सेध्वेशब्दयोः सार्वधातुकयोरिट् स्यात्। योगविभागो वैचित्र्यार्थः । ईडिषे। ईडिध्वे। एकदेशविकृतस्यानन्यत्वात्। ईडिष्व। ईडिध्वम् । विकृतिग्रहणेन प्रकृतेरग्रहणात् । ऐड्ढ्वम् ॥ २ ॥ ईश ऐश्वर्ये । ईष्टे । ईशिषे। ईशिध्वे ॥ ३ ॥ आस उपवेशने । आस्ते ॥ दयायासश्च ॥ आसांचक्रे । आस्स्व । आध्वम्। आसिष्ट ॥ ४ ॥ आङः शासु इच्छायाम्। आशास्ते। आशासाते। आङ्पूर्वत्वं प्रायिकम्। तेन नमोवाकं प्रशास्महे इति सिद्धम् ॥ ५॥ वस आच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता ॥ ६ ॥ कसि गतिशासनयोः । कंस्ते। कंसाते। कंसते । अयमनिदिदित्येके। कस्ते। तालव्यान्तोप्यनिदित्। कष्टे। कशाते । कक्षे। कड्ढ्वे ॥ ७ ॥ णिसि चुम्बने। निंस्ते। दन्त्यान्तोयम् । आभरणकारस्तु तालव्यान्त इति बभ्राम ॥ ८ ॥ णिजि शुद्धौ । निंक्ते । निंक्षे। निञ्जिता॥९॥शिजि अव्यक्ते शब्दे। शिंक्ते॥१०॥ पिजि वर्णे। सम्पर्चने इत्येके । उभयत्रेत्यन्ये। अवयवे इत्यपरे । अव्यक्ते शब्दे इतीतरे। पिंक्ते ॥ ११ ॥ पृजीत्येके । पृंक्ते ॥ १२॥ वृजी वर्जने। दन्त्योष्ठ्यादिः । ईदित् । वृक्ते। वृजाते। वृक्षे । इदिदित्यन्ये। वृंक्ते ॥ १३ ॥ पृची सम्पर्चने। पृक्ते ॥ १४ ॥ षूङ् प्राणिगर्भविमोचने। सूते । सुषुवे । सविता-सोता । भूसुवोरिति गुणनिषेधः । सुवै । सविषीष्ट-सोषीष्ट। असविष्ट-असोष्ट ॥१५॥ शीङ् स्वप्ने॥

२४३९-२४४०-ईश,ईड और जन धातुके उत्तर सार्वधातुक से और ध्वे प्रत्ययको इट् हो। योगविभाग,अर्थात् भिन्न सूत्रकरण वैचित्र्यार्थ,अर्थात् उत्तर सूत्रमें पूर्व सूत्रसे से शब्दकी अनुवृत्ति और पूर्व सूत्रमें उत्तर सूत्रसे ध्वे शब्दके अपकर्षणरूप वैचित्र्य बोधनार्थ है। ईडिषे। ईडिध्वे। "एकदेशविकृतमनन्यवत्" इस परिभाषासे स्व और ध्वम् प्रत्ययको भी इट् होकर-ईडिष्व। ईडिध्वम्। प्रकृतिके ग्रहणसे विकृतिका ग्रहण होताहै परन्तु विकृतिके ग्रहणसे प्रकृतिका ग्रहण न होनेसे ऐड्ढ्वम् इस स्थानमें इट् नहीं हुआ ॥ ईश धातु ऐश्वर्यमें है। ईष्टे। ईशिषे। ईशिध्वे ॥ आस धातु उपवेशनमें हैं। "दयायासश्च २३२४" इस सूत्रसे आस् धातुके उत्तर आम् होकर-आसाञ्चक्रे। आस्स्व। आध्वम्। आसिष्ट॥ आङ्पूर्वक शासु धातु इच्छामें है। आशास्ते। आशासाते । यह धातु प्रायः आङ्पूर्वक देखा जाताहै, किन्तु सर्वत्र आङ्पूर्वक नहीं है,अत एव 'नमोवाकं प्रशास्महे' ऐसा प्रयोग हुआ है॥ वस धातु आच्छादनमें है। वस्ते। वस्से। वध्वे। ववसे। वसिता ॥ कसि धातु गति और शासनमें है। कंस्ते। कंसाते। कंसते। कोई २ कहतेहैं कि, यह अनिदित् है, उनके मतसे-कस्ते। कस् धातु तालव्यान्त और अनिदित् भी है जैसे-कष्टे। कशाते। कक्षे। कड्ढ्वे ॥ णिसि धातु चुम्बनमें है। निंस्ते। यह धातु दन्त्य सकारान्त है। आभरणकार तो इसको तालव्यान्त कहतेहैं परन्तु यह भ्रम है ॥ णिजि धातु शोधनमें है। निङ्क्ते। निङ्क्षे। निञ्जिता ॥ शिजि धातु अव्यक्त शब्दमें है। शिङ्क्ते ॥ पिजि धातु वर्णमें है। किसी २ के मतसे सम्पर्चनमें है। किसीके मतसे पूर्वोक्त दोनों अर्थमें है। किसीके मतसे अवयवार्थमें है और किसी २ के मतसे अव्यक्त शब्दार्थमें है। पिङ्क्ते। कोई २ पृजि धातु कहतेहैं। पृङ्क्ते॥ वृजी धातु वर्जनमें है, यह दन्त्योष्ठ्यादि और ईदित् है। वृक्ते। वृजाते। वृक्षे। कोई २ कहतेहैं,यह इदित् है। वृङ्क्ते॥ पृची धातु सम्पर्चनमें है। पृक्ते॥ षूङ् धातु प्रसव करनेमें है। सूते। सुषुवे। सविता, सोता। "भूसुवोः० २२२४" इस सूत्रसे गुणनिषेध होकर-सुवै। सविसीष्ट, सोषीष्ट। असविष्ट, असोष्ट॥ शीङ् धातु स्वप्नमें है॥

२४४१ शीङः सार्वधातुके गुणः । ७ । ४ । २१ ॥

क्ङिति चेत्यस्यापवादः। शेते। शयाते॥

२४४१-सार्वधातुक प्रत्यय परे रहते शीङ् धातुके इकारको गुण हो। "क्ङिति च२२१३" इस सूत्रका विशेषक है। शेते। शयाते॥

२४४२ शीङो रुट् । ७ । १ । ६ ॥

शीङः परस्य झादेशस्यातो रुडागमः स्यात्। शेरते। शेषे। शेध्वे। शये। शेवहे । शिश्ये। शयिता। अशयिष्ट ॥ १६ ॥

अथ स्तौत्यन्ताः परस्मैदिनः। ऊर्णुस्तूभयपदी ॥ यु मिश्रणेऽमिश्रणे च ॥

२४४२-शीङ् धातुके परे स्थित झ के स्थानमें आदिष्ट अत् को रुट्का आगम हो, शेरते। शेषे। शेध्वे। शये। शेवहे। शेमहे। शिश्ये। शयिता। अशयिष्ट॥

अब स्तु धातु पर्यन्त परस्मैपदी धातु कहते हैं।

यु धातु मिश्रण और अमिश्रण (मिलाने और अलग करने) में है।

२४४३ उतो वृद्धिर्लुकि हलि।७।३।८९॥

लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। युयाव। यविता। युयात्। इह उतो वृद्धिर्न। भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति न्या-

ख्यानात् । विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात् । यूयात् । अयावीत् ॥ १ ॥ रु शब्दे ॥

२४४३-पित् हलादि सार्वधातुक विभक्ति परे रहते लुग्विषयमें उकारान्त धातुको वृद्धि हो, अभ्यस्तसंज्ञक धातुको न हो, यौति । युतः । युवन्ति । युयाव । यविता । युयात् । यहां तिप्के आगम यासुट्के "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" अर्थात् जो जिसका आगम होताहै, उसका उसके ग्रहणसे ग्रहण होताहै, इस परिभाषासे तिप्ग्रहणसे ग्रहण होने पर पित् हलादि सार्वधातुक यास् परे उकारको वृद्धिकी प्राप्ति हुई, परन्तु पिच्च ङिन्न ङिच्च पिन्न (पित् ङित् न हो और ङित् पित् न हो) ऐसे भाष्यमें व्याख्यानके कारण नहीं हुई, यदि कहो कि, पित्त्वप्रयुक्तही कार्य्य हो सो नहीं कहसकते हो, कारण कि, विशेषविहित ङित्त्वसे पित्त्वका बाध होजाताहै-यूयात् । अयावीत् ॥ रु धातु शब्द करनेमें है ॥

२४४४ तुरुस्तुशम्यमः सार्वधातुके । ७ । ३ । ९५ ॥

एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात् । नाभ्यस्तस्येत्यतोऽनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणमपिदर्थम् । रवीति-रौति । रुवीतः-रुतः । हलादेः किम् । रुवन्ति । तिङः किम् । शाम्यति । सार्वधातुके किम् । आशिषि रुयात् । विध्यादौ तु रुवीयात्-रुयात् । अरावीत् । अरविष्यत् ॥ २ ॥ तु इति सौत्रो धातुर्गतिवृद्धिहिंसासु । अयं च लुग्विकरण इति स्मरन्ति । तवीति-तौति । तुवीतः-तुतः । तोता । तोष्यति ॥ ३ ॥ णु स्तुतौ । नौति । नविता ॥ ४ ॥ टुक्षु शब्दे । क्षौति । क्षविता ॥ ५ ॥ क्ष्णु तेजने । क्ष्णौति । क्ष्णविता ॥ ६ ॥ ष्णु प्रस्रवणे । स्नौति । सुष्णाव । स्नविता । स्नूयात् ॥ ७ ॥ ऊर्णुञ् आच्छादने ॥

२४४४-तु, रु, स्तु, शम्, यम् इन धातुओंके परे सार्वधातुक हलादि तिङ्को विकल्प करके ईट् हो । "नाभ्यस्तस्य० २५०३" इस सूत्रसे सार्वधातुक पदकी अनुवृत्ति सम्भव होने पर भी फिर जो सार्वधातुकका ग्रहण है, वह केवल अपिदर्थ, अर्थात् 'पिति' इसकी अनुवृत्ति न हो इसके निमित्त है, रवीति, रौति । रुवीतः, रुतः । हलादि न होनेपर, रुवन्ति । तिङ् भिन्न होनेपर-शाम्यति । सार्वधातुक न होनेपर, आशिषमें-रुयात् । विधि आदिमें तो रुवीयात्, रुयात् । अरावीत् । अरविष्यत् ॥ तु यह सौत्र धातु गति, वृद्धि और हिंसार्थमें है, यह लुक्विकरण, अर्थात् इसके उत्तर शप्का लुक् हो, यह पूर्वाचार्य्योंका मत है । तवीति, तौति । तुवीतः, तुतः । तोता । तोष्यति ॥ णु धातु स्तुतिमें है । नौति । नविता ॥ टुक्षु धातु शब्दमें है । क्षौति । क्षविता ॥ क्ष्णु धातु तेजनमें है । क्ष्णौति । क्ष्णविता ॥ ष्णु धातु प्रस्रवणमें है । स्नौति । सुष्णाव । स्नविता । स्नूयात् ॥ ऊर्णुञ् धातु आच्छादनमें है ॥

२४४५ ऊर्णोतेर्विभाषा । ७ । ३ । ९० ॥

वा वृद्धिः स्याद्धलादौ पिति सार्वधातुके । ऊर्णौति-ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते ॥ ऊर्णोतेराम् नेति वाच्यम् ॥ * ॥

२४४५-हलादि पित् सार्वधातुक परे रहते ऊर्णु धातुको विकल्प करके वृद्धि हो, ऊर्णौति, ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते ।

ऊर्णु धातुके उत्तर आम् न हो ऐसा कहना चाहिये * ॥

२४४६ नन्द्राः संयोगादयः । ६ । १ । ३ ॥

अचः पराः संयोगादयो नदरा द्विर्न भवन्ति । नुशब्दस्य द्वित्वम्, णत्वस्यासिद्धत्वात् । पूर्वत्रासिद्धीयमद्विर्वचन इति त्वनित्यम्, उभौ साभ्यासस्येति लिङ्गात् । ऊर्णुनाव । ऊर्णुनुवतुः । ऊर्णुनुवुः ॥

२४४६-अच्के परे संयोगकी आदिमें स्थित न द और र को द्वित्व न हो । "पूर्वत्रासिद्धम्" इससे णत्वके असिद्धत्वके कारण नु शब्दको द्वित्व होगा "पूर्वत्रासिद्धीयमद्विर्वचने" (द्वित्वभिन्न कार्य्य कर्त्तव्यमें "पूर्वत्रासिद्धम्" इसकी प्रवृत्ति हो) यह तो "उभौ साभ्यासस्य २६०८" इस सूत्रारम्भसामर्थ्यसे अनित्य है, नहीं तो 'प्राणिणत्' यहां भी "अनितेः" इससे द्वित्वके पहले णत्वको उक्त परिभाषाके बलसे असिद्धता न होनेसे द्वित्वोत्तर खण्डद्वयमें णकारका श्रवण हो ही जाता फिर यह सूत्र व्यर्थ ही हो जाता ।

ऊर्णुनाव । ऊर्णुनुवतुः । ऊर्णुनुवुः ॥

२४४७ विभाषोर्णोः । १ । २ । ३ ॥

इडादिप्रत्ययो वा ङित् स्यात् । ऊर्णुनुविथ-ऊर्णुनविथ । ऊर्णुविता-ऊर्णविता । ऊर्णौतु-ऊर्णोतु । ऊर्णवानि । ऊर्णवै ॥

२४४७-ऊर्णु धातुके परे स्थित इडादि प्रत्यय विकल्प करके ङित् हो, ऊर्णुनुविथ, ऊर्णुनविथ । ऊर्णुविता, ऊर्णविता । ऊर्णौतु, ऊर्णोतु । ऊर्णवानि । ऊर्णवै ॥

२४४८ गुणोऽपृक्ते । ७ । ३ । ९१ ॥

ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके । वृद्ध्यपवादः । और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः । इह वृद्धिर्न । ङिच्च पिन्नेति भाष्यात् । ऊर्णूयात् । ऊर्णुविषीष्ट-ऊर्णविषीष्ट । और्णुवीत् । और्णुविष्टाम् ॥

२४४८-अपृक्त हलादि पित् सार्वधातुक प्रत्यय परे रहते ऊर्णु धातुको गुण हो, यह सूत्र वृद्धि सूत्रका अपवाद है, और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः इस स्थलमें "ङिच्च

पित्'' इस भाष्यके कारण वृद्धि न होगी। ऊर्णूयात्। ऊर्णु-विषीष्ट, ऊर्णविषीष्ट। और्णुवीत्। और्णुविष्टाम्॥

२४४९ ऊर्णोतेर्विभाषा। ७।२।६॥

इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात्। पक्षे गुणः। और्णावीत्। और्णाविष्टाम्। और्णाविषुः। और्णवीत्॥ ८॥ द्यु अभिगमने। द्यौति। द्योता॥ ९॥ षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सोता। असौषीत्॥ १०॥ कु शब्दे। कोता॥ ११॥ ष्टुञ् स्तुतौ। स्तवीति-स्तौति। स्तुवीतः-स्तुतः। स्तुवीते-स्तुते। स्तुसुधूञ्भ्य इतीट्। अस्तावीत्। प्राक्सितादिति षत्वम्। अभ्यष्टौत्। सिवादीनां वा। पर्यष्टौत्। पर्यस्तौत्॥ १२॥ ब्रूञ् व्यक्तायां वाचि॥

२४४९-परस्मपद परक इडादि सिच् परे रहते ऊर्णु धातुके उकारको विकल्प करके वृद्धि हो, विकल्प पक्षमें गुण होगा। और्णावीत्। और्णाविष्टाम्। और्णाविषुः। और्णवीत्॥ द्यु धातु अभिगमनमें है। द्यौति। द्योता॥ षु धातु प्रसव और ऐश्वर्यमें है। प्रसव शब्दसे अभ्यनुज्ञान जानना। सोता। असौषीत्॥ कु धातु शब्दमें है। कोता॥ ष्टुञ् धातु स्तुतिमें है। स्तवीति, स्तौति। स्तुवीतः, स्तुतः। स्तुवीते, स्तुते। "स्तुसुधूञ्भ्यः० २३८५" इस सूत्रसे इट् होकर-अस्तावीत्। "प्राक् सितात्० २२७६" इस सूत्रसे पत्व होकर-अभ्यष्टौत्। "सिवादीनां वा" इससे विकल्प करके पत्व करके-पर्य्यष्टौत्, पर्य्यस्तौत्॥ ब्रञ् धातु व्यक्तवचनमें है॥

२४५० ब्रुवः पञ्चानामादित आहो ब्रुवः। ३।४।८४॥

ब्रुवो लटः परस्मैपदानामादितः पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः। अकार उच्चारणार्थः। आह। आहतुः। आहुः॥

२४५०-ब्र धातुके उत्तर लट् सम्बन्धी परस्मैपद आदिसे पांच अर्थात् तिप्, तस्, झि, सिप्, थस् के स्थानमें विकल्प करके णल् आदि पांच, अर्थात् णल्, अतुस्, उस्, थल्, अथुस् आदेश हों और ब्र धातुके स्थानमें आह आदेश हो। आह आदेशमें अकार उच्चारणार्थ है, आह। आहतुः। आहुः॥

२४५१ आहस्थः। ८।२।३५॥

झलि परे। चर्त्वम्। आत्थ। आहथुः॥

२४५१-झलादि प्रत्यय परे रहते आह आदेशके हके स्थानमें थ हो। चर्त्व होकर-आत्थ। आहथुः॥

२४५२ ब्रुव ईट्। ७।३।९३॥

ब्रुवः परस्य हलादेः पित ईट् स्यात्। आत्थेत्यत्र स्थानिवद्भावात्प्राप्तोयं झलीति थत्वविधानान्न भवति। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। आर्धधातुकाधिकारे॥

२४५२-ब्रू धातुके उत्तर हलादि पित् प्रत्ययको ईट् हो-आत्थ, इस स्थलमें स्थानिवद्भावके कारण ईट् प्राप्त हुआ, परन्तु "आहस्थः" इस सूत्रसे झल् परे थत्व विधानके कारण नहीं हुआ। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। आर्धधातुकाधिकारमें किस प्रकार होगा, सो कहतेहैं॥

२४५३ ब्रुवो वचिः। २।४।५३॥

उवाच। ऊचतुः। ऊचुः। उवचिथ-उवक्थ। ऊचे। वक्ता। ब्रवीतु। ब्रूतात्। ङिच्च पिन्नेत्यपित्त्वादीण्न। ब्रवाणि। ब्रवै। ब्रूयात्। उच्यात्। अस्यतिवक्तीत्यङ्॥

२४५३-आर्धधातुकविषयमें ब्रू धातुके स्थानमें वचि आदेश हो, उवाच। ऊचतुः। ऊचुः। उवचिथ, उवक्थ। ऊचे। वक्ता। ब्रवीतु। ब्रूतात्, यहां 'ङिच्च पित्'' इस भाष्यसे अपित्वके कारण ईट् नहीं हुआ। ब्रवाणि। ब्रवै। ब्रूयात्। उच्यात्। "अस्यतिवक्तिख्याति० २४३८" इस सूत्रसे ब्रू धातुके उत्तर च्लिके स्थानमें अङ् होकर-॥

२४५४ वच उम्। ७।४।२०॥

अङि परे। अवोचत्। अवोचत॥ १३॥ अथ शास्यन्ताः परस्मैपदिनः। इङ्त्वात्मनेपदी। इण् गतौ। एति। इतः॥

२४५४-अङ् परे रहते वच् धातुको उम्का आगम हो, अवोचत्। अवोचत।

अब शासि धातु पर्य्यन्त परस्मैपदी धातु कहतेहैं, परन्तु उसमें इङ् धातु आत्मनेपदी है। इण् धातु गतिमें है। एति। इतः॥

२४५५ इणो यण्। ६।४।८१॥

अजादौ प्रत्यये परे। इयङोऽपवादः। यन्ति। इयाय॥

२४५५-अजादि प्रत्यय परे रहते इण् धातुके स्थानमें यण् आदेश हो, यह इयङ्का अपवाद है, यन्ति। इयाय॥

२४५६ दीर्घ इणः किति। ७।४।६९॥

इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि। ईयतुः। ईयुः। इययिथ-इयेथ। एता। इतात्। इहि। अयानि। ऐत्। ऐताम्। आयन्। इयात्। ईयात्॥

२४५६-कित् लिट् परे रहते इण् धातुके अभ्यासको दीर्घ हो। ईयतुः। ईयुः। इययिथ, इयेथ। ऐत्। ऐताम्। आयन्। इयात्। ईयात्॥

२४५७ एतेर्लिङि। ७।४।२४॥

उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्धधातुके किति लिङि। निरियात्। उभयत आश्रयणे नान्तादिवत्। अभीयात्। अणः किम्। समेयात्। समीयादिति प्रयोगस्तु औपादिकस्य॥

२४५७-आर्धधातुक कित् लिङ् परे रहते उपसर्गसे परे स्थित इण् धातुसंबंधी अण्को ह्रस्व हो, निरियात् । उभयतः आश्रयणमें अन्तादिवद्भाव नहीं होनेसे अभीयात् । अण्भिन्न होनेपर-समेयात् । 'समीयात्' ऐसा प्रयोग तो भ्वादिगणीयधातुका होगा ॥

२४५८ इणो गा लुङि । २ । ४ । ४५ ॥

गातिस्थेति सिचो लुक् । अगात् । अगाताम् । अगुः ॥ १ ॥ इङ् अध्ययने । नित्यमधिपूर्वः । अधीते । अधीयाते । अधीयते ॥

२४५८-लुङ् परे रहते इण् धातुके स्थानमें गा आदेश हो। "गातिस्था० २२२३" इस सूत्रसे सिच्का लुक् होकर-अगात्। अगाताम् । अगुः॥ इङ् धातु अध्ययनमें है । यह धातु नित्य अधिपूर्वक है । अधीते । अधीयाते । अधीयते ॥

२४५९ गाङ् लिटि । २ । ४ । ४९ ॥

इङो गाङ् स्याल्लिटि लावस्थायां विवक्षिते वा । अधिजगे । अधिजगाते । अधिजगिरे । अध्येता । अध्येष्यते । अध्ययै । गुणायादेशयोः कृतयोरुपसर्गस्य यण् । पूर्वं धातुरुपसर्गेणेति दर्शनेन्तरङ्गत्वाद् गुणात्पूर्वं सवर्णदीर्घः प्राप्तः । णेरध्ययने वृत्तमिति निर्देशान्न भवति । अध्यैत । परत्वादियङ् । तत आट् । वृद्धिः । अध्यैयाताम् । अध्यैयि । अध्यैवहि । अधीयीत । अधीयीयाताम् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट ॥

२४५९-लिट् परे रहते अथवा लकारावस्था विवक्षित होनेपर इङ् धातुके स्थानमें गाङ् आदेश हो, अधिजगे । अधिजगाते । अधिजगिरे । अध्येता । अध्येष्यते । अध्ययै । यहां गुण और आय आदेश करनेपर उपसर्गको यण् हुआ, यद्यपि "पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन" इस मतसे पूर्वोपस्थितनिमित्तकत्वरूप अन्तरङ्गत्वके कारण गुणके पूर्वमें ही सवर्ण दीर्घ प्राप्त हुआ परन्तु "णेरध्ययने वृत्तम् ३०३६" इस सूत्रनिर्देशसे नहीं हुआ । अध्यैत । परत्वके कारण इयङ् पश्चात् आट् और वृद्धि होकर-अध्यैयाताम् । अध्यैयि । अध्यैवहि । अधीयीत । अधीयीयाताम् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट ॥

२४६० विभाषा लुङ्लृङोः । २ । ४ । ५० ॥

इङो गाङ् वा स्यात् ॥

२४६०-लुङ् और लृङ् परे रहते इङ् धातुके स्थानमें विकल्प करके गाङ् आदेश हो ॥

२४६१ गाङ्कुटादिभ्योऽञ्णिन्ङित् । १ । २ । १ ॥

गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः ॥

२४६१-गाङ् आदेश और कुटादि धातुके उत्तर ञित् और णित्से भिन्न प्रत्यय ङित् हो ॥

२४६२ घुमास्थागापाजहातिसां हलि । ६ । ४ । ६६ ॥

एषामात ईत्स्यात् हलादौ क्ङित्यार्धधातुके । अध्यगीष्ट-अध्यैष्ट । अध्यगीष्यत-अध्यैष्यत ॥ २ ॥ इक् स्मरणे । अयमप्यधिपूर्वः । अधीगर्थदयेशामिति लिङ्गात् अन्यथा हीगर्थेत्येव ब्रूयात् ॥ इण्वदिक इति वक्तव्यम् ॥ *॥ अधियन्ति । अध्यगात् । केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः । तन्मते यण् । तथाच भट्टिः।ससीतयोराघवयोरधीयन्निति ॥ ३॥ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । प्रजनं गर्भग्रहणम् । असनं क्षेपणम् । वेति । वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् । अवीताम् । अवियन् । अडागमे सत्यनेकाच्त्वाद्यणितिकेचित् । अव्यन् ॥ ४॥ अत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते । एति । ईतः । इयन्ति। ईयात् । ऐषीत् ॥ ५ ॥ या प्रापणे । प्रापणमिह गतिः । प्रणियाति । यातः । यान्ति ॥

२४६२-हलादि कित् ङित् आर्धधातुक परे रहते घु, मा, स्था, गा, पा, हा और सा (षो) धातुके आकारके स्थानमें ईकार हो, अध्यगीष्ट, अध्यैष्ट । अध्यगीष्यत, अध्यैष्यत ॥ इक् धातु स्मरणमें है । " अधीगर्थदयेशाम् ६१३ " इस निर्देशके अनुसार यह धातु भी अधिपूर्वक है, नहीं तो 'ईगर्थ' ऐसा ही कहते ।

इण् धातुकी समान इक् धातुके रूप हों ऐसा कहना चाहिये * अधियन्ति । अध्यगात् । कोई २ तो आर्धधातुकाधिकारमें कहे हुए कार्य्यका ही अतिदेश होगा ऐसा कहतेहैं, उनके मतसे यण् न होगा, इसलिये भट्टिमें ' ससीतयो राघवयोरधीयन् ' ऐसे प्रयोग कियेहैं ॥ वी धातु गति, व्याप्ति, प्रजन, कान्ति, असन और खादनमें है । प्रजन शब्दसे गर्भग्रहण है । असन शब्दसे क्षेपण जानना । वेति । वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् । अवीताम् । अवियन्। यहां कोई २ कहतेहैं कि, अडागम होनेपर अनेकाच् होनेसे यण् होकर-'अव्यन् ' ऐसा प्रयोग होगा । इस स्थलमें ईकार भी धात्वन्तर प्रश्लिष्ट है, एति। ईतः । इयन्ति। ईयात् । ऐषीत्॥या धातु प्रापणमें है । प्रापणशब्दसे यहां गति जानना । प्रणियाति । यातः । यान्ति ॥

२४६३ लङः शाकटायनस्यैव । ३ । ४ । १११ ॥

आदन्तात्परस्य लङो झेर्जुस् वा स्यात् । अयुः । अयान् । यायात् । यायाताम् । यायास्ताम् ॥ ६ ॥ वा गतिगन्धनयोः । गन्धनं सूचनम् ॥ ७ ॥ भा दीप्तौ ॥ ८ ॥ ष्णा शौचे ॥९॥

श्रा पाके ॥ १० ॥ द्रा कुत्सायां गतौ ॥ ११ ॥ प्सा भक्षणे ॥ १२ ॥ पा रक्षणे । पायास्ताम् । अपासीत् ॥ १३ ॥ रा दाने ॥ १४ ॥ ला आदाने । द्वावपि दाने इति चन्द्रः ॥ १५ ॥ दाप् लवने । प्रणिदाति–प्रनिदाति । दायास्ताम् । अदासीत् ॥ १६ ॥ ख्या प्रकथने । अयं सार्वधातुकमात्रविषयः । सस्थानत्वं नमः ख्यात्रे इति वार्तिकं तद्भाष्यं चेह लिङ्गम् । सस्थानो जिह्वामूलीयः स नेतिख्याञादेशस्य ख्शादित्वे प्रयोजनमित्यर्थः । सम्पूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः ॥ १७ ॥ प्रा पूरणे ॥ १८ ॥ मा माने । अकर्मकः । तनौ ममुस्तत्र न कैटभद्विष इति माघः। उपसर्गवशेनार्थान्तरे सकर्मकः। उदरं परिमाति मुष्टिना । नेर्गदेत्यत्र नास्य ग्रहणम् । प्रणिमाति–प्रनिमाति ॥ १९ ॥ वच परिभाषणे । वक्ति । वक्तः । अयमन्तिपरो न प्रयुज्यते । बहुवचनपर इत्यन्ये। झि पर इत्यपरे। वग्धि। वच्यात्। उच्यात्। अवोचत् ॥ २० ॥ विद ज्ञाने ॥

२४६३–आकारान्त धातुके उत्तर लङ्सम्बन्धी झिके स्थानमें विकल्प करके जुस् हो, अयुः, अयान् । यायात् । यायाताम् । यायास्ताम् ॥ वा धातु गति और गन्धन, अर्थात् सूचनार्थमें है ॥ भा धातु दीप्तिमें है ॥ ष्णा धातु शौचमें है ॥ श्रा धातु पाकमें है ॥ द्रा धातु कुत्सित गतिमें है ॥ प्सा धातु भक्षणमें है ॥ पा धातु रक्षा करनेमें है । पायास्ताम् । अपासीत् ॥ रा धातु दानमें है ॥ ला धातु आदानमें है॥ चन्द्रके मतसे रा और ला यह दोनों धातु दानार्थक हैं ॥ दाप् धातु लवन (काटने) में है । प्रणिदाति, प्रनिदाति । दायास्ताम् । अदासीत् ॥

ख्या धातु प्रकथनमें है इसका सार्वधातुकमात्र विषय है, इसमें " सस्थानत्वं नमः ख्यात्रे " यह वार्त्तिक और इसका भाष्य प्रमाण है । सस्थान जिह्वामूलीयको कहतेहैं, वह य ' नमःख्यात्रे ' यहां नहीं हुआ, यह ख्याआदेशको ख्शादित्वमें प्रयोजन भाष्यमें कहाहै, वहां असिद्धकाण्डस्थित ' शस्य यो वा ' इससे यत्वको असिद्ध होनेके कारण " कुप्वोः ≍क≍पौ च " इससे जिह्वामूलीयको बाधकर. " शर्परे विसर्जनीयः " इससे विसर्ग ही होताहै, सो कहो, यदि ख्या धातुके आर्धधातुकविषयमें भी प्रयोग हों तो इसी धातुसे तृच् प्रत्यय करके 'ख्यात्रे' बनेगा, उसको आगे रहते 'नमःख्यात्रे' यहां 'शर्परे वि०' इसकी प्राप्ति ही नहीं थी,फिर वार्त्तिक और उसका भाष्य सब विरुद्ध होजाता, इसलिये इस धातुका सार्वधातुकमात्र विषय है ॥ संपूर्वक ख्या धातुका प्रयोग नहीं होताहै, यह न्यासकारने कहाहै ॥ प्रा धातु पूरणमें है ॥ मा धातु मानमें है, यह अकर्मक है, अत एव " तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः"यह माघमें कहाहै। उपसर्गवशसे अर्थभिन्न होनेपर सकर्मक है, जैसे–' उदरं परिमाति मुष्टिना ' । " नेर्गद० २२८५ " इस सूत्रमें इस धातुका ग्रहण नहीं है, इससे ' प्रणिमाति, प्रनिमाति ' यहां विकल्पसे णत्व हुआ ॥ वच धातु परिभाषणमें है । वक्ति । वक्तः । इस धातुको अन्तिविभक्त्यन्त पदका प्रयोग नहीं होताहै । कोई २ कहतेहैं कि, बहुवचन परे नहीं होताहै । कोई कहतेहैं कि, झि प्रत्यय परे प्रयोग नहीं होताहै । वग्धि । वच्यात् । उच्यात् । अवोचत् ॥ विद धातु ज्ञानमें है ॥

२४६४ विदो लटो वा । ३ । ४ । ८३ ॥

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे । वेत्ति । वित्तः । इत्यादि । विवेद । विविदतुः । उषविदेत्याम्पक्षे विदत्यकारान्तनिपातनान्न लघूपधगुणः । विदांचकार । वेदिता ॥

२४६४–विद् धातुके उत्तर लट्सम्बन्धी परस्मैपदको णलादि आदेश हों, वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षमें वेत्ति । वित्तः । विदन्ति, इत्यादि । विवेद । विविदतुः । " उषविद० २३४९ " इस सूत्रसे आम्पक्षमें ' विद ' ऐसे अकारान्त निपातनके कारण लघूपधाको गुण नहीं होगा, विदाञ्चकार । वेदिता ॥

२४६५ विदांकुर्वन्त्वित्यन्यतरस्याम् । ३ । १ । ४१ ॥

वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोतीत्यनुप्रयोगश्च वा निपात्यते। पुरुषवचने न विवक्षिते इति शब्दात् ॥

२४६५–लोट् परे रहते विद् धातुके उत्तर आम् हो, और गुणाभाव, लोट्का लुक् और लोडन्त कृ धातुका अनुप्रयोग विकल्प करके निपातनसे हो । इति शब्दसे पुरुष और वचन विवक्षित नहीं हैं ॥

२४६६ तनादिकृञ्भ्य उः ।३।१।७९॥

तनादेः कृञश्च उप्रत्ययः स्यात्।शपोपवादः । तनादित्वादेव सिद्धे कृञ्ग्रहणं गणकार्यस्याऽनित्यत्वे लिङ्गं तेन न विश्वसेदविश्वस्तमित्यादि सिद्धम्। विदांकरोतु ॥

२४६६–तनादि धातु और कृञ् धातुके उत्तर उ प्रत्यय हो, यह शप्का अपवाद है । तनादित्वके कारण सिद्ध होनेपर भी कृञ्का ग्रहण केवल गणकार्यके अनित्यत्वमें प्रमाण है, इसी कारण ' न विश्वसेदविश्वस्तम् ' इत्यादि सिद्ध हुए । विदांकरोतु ॥

२४६७ अत उत्सार्वधातुके।६।४।११०॥

उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति।उदिति तपरकरणसामर्थ्यान्न गुणः।

विदांकुरुतात् । विदांकुरुताम् । उतश्चेति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्त्वम् । विदांकुरु । विदांकरवाणि । अवेत् । अवित्ताम् । सिजभ्यस्तेति झेर्जुस् । अविदुः ॥

२४६७–उ प्रत्ययान्त कृञ् धातुके अकारके स्थानमें उकार हो, कित् ङित् सार्वधातुक परे रहते । 'उत्' ऐसे तपरकरणके कारण गुण नहीं होगा । विदांकुरुतात् । विदांकुरुताम् । " उतश्च " इस सूत्रसे हिका लुक्, उसका आभीयत्वके कारण असिद्धत्व होनेसे उत्त्व होकर–विदांकुरु । विदांकरवाणि । अवेत् । अवित्ताम् । "सिजभ्यस्त० २२२६" इस सूत्रसे झिके स्थानमें जुस् होकर–अविदुः ॥

२४६८ दश्च । ८ । २ । ७५ ॥

धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा । अवेः–अवेत् ॥ २१ ॥ अस भुवि । अस्ति ॥

२४६८–सिप् परे रहते धातुसम्बन्धी पदान्तस्थित दकारके स्थानमें विकल्प करके रुत्व हो, अवेः, अवेत् ॥ अस् धातु सत्तामें है । अस्ति ॥

२४६९ श्नसोरल्लोपः । ६ । ४ । १११ ॥

श्नस्याऽस्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति । स्तः । सन्ति । तासस्त्योरिति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः ॥

आर्धधातुके इत्यधिकृत्य ॥

२४६९–श्नम् प्रत्ययके और अस् धातुके अकारका लोप हो, कित्, ङित् सार्वधातुक परे रहते–स्तः । सन्ति । " तासस्त्योः० २१९१ " इस सूत्रसे सकारका लोप होकर–असि । स्थः।स्थ।अस्मि । स्वः । स्मः । आर्धधातुकका अधिकार करके–॥

२४७० अस्तेर्भूः । २ । ४ । ५२ ॥

बभूव । भविता । अस्तु । स्तात् । स्ताम् । सन्तु ॥

२४७०–आर्धधातुकविषयमें अस् धातुके स्थानमें भू आदेश हो, बभूव । भविता । अस्तु । स्तात् । स्ताम् । सन्तु ॥

२४७१ घ्वसोरेद्धावभ्यासलोपश्च । ६ । ४ । ११९ ॥

घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च । आभीयत्वेन एत्वस्यासिद्धत्वाद्धेर्धिः । श्नसोरित्यल्लोपः । एधि । तातङ्पक्षे एत्वं न । परेण तातङा बाधात् सकृद्गताविति न्यायात् । स्तात् । स्तम् । स्त । असानि । असाव । असाम । अस्तिसिच इतीट् । आसीत् । श्नसोरित्यल्लोपस्याभीयत्वेनासिद्धत्वादाट् । आस्ताम् । आसन् । स्यात् । भूयात् । अभूत् । सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादीण्न ॥

२४७१–घुसंज्ञक धातु और अस् धातुको हि परे रहते एकार हो और अभ्यासका लोप हो । आभीयत्व प्रयुक्त एत्वके असिद्ध होनेसे हिके स्थानमें धि और " श्नसोः० २४६९ " इस सूत्रसे अकारका लोप होकर–एधि ।

परवर्ती तातङ्से एत्वका बाध होनेसे तातङ् पक्षमें एत्व नहीं होगा, तातङ् होनेपर भी ' सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ' (एकवार दो शास्त्रकी प्राप्ति होनेपर जो बाधा जाताहै, वह बाधित ही रहताहै, फिर वह नहीं लगताहै) इस परिभाषासे नहीं होगा–स्तात् । स्तम् । स्त । असानि । असाव । असाम । " अस्तिसिचः० २२२५ " इस सूत्रसे ईट् होकर–आसीत् । "श्नसोः०२४६९ " इस सूत्रसे अकार लोपके आभीयत्वके कारण असिद्ध हो, इसे आट् होगा–आस्ताम् । आसन् । स्यात् । भूयात् । अभूत्, यहां " अस्तिसिचोऽपृक्ते " इस सूत्रमें सिच् अस्के विद्यमान विशेषणके कारण विद्यमान सिच्के परे स्थित अपृक्तसंज्ञक हल् न होनेसे ईट् नहीं हुआ ॥

२४७२ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८ । ३ । ८७ ॥

उपसर्गेभ्यः प्रादुसश्च परस्यास्तेः सस्य षः स्याद् यकारेऽचि च परे । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । यच्परः किम् । अभिस्तः ॥ २२ ॥ मृजू शुद्धौ ॥

२४७२–यकार और अच् परे रहते उपसर्ग और प्रादुस् शब्दके परवर्ती अस् धातुके सकारको षत्व हो, निष्यात्, प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । यकार और अच् परे रहते अभिस्तः ॥ मृजू धातु शुद्धिमें है ॥

२४७३ मृजेर्वृद्धिः । ७ । २ । ११४ ॥

मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे ॥ क्ङित्यजादौ वेष्यते ॥ * ॥ व्रश्चेति षः । मार्ष्टि । मृष्टः । मृजन्ति–मार्जन्ति । ममार्ज । ममार्जतुः–ममृजतुः । ममार्जिथ–ममार्ष्ठ । मार्जिता–मार्ष्टा । मृड्ढि । अमार्ट् । अमार्जम् । अमार्जीत् । अमार्क्षीत् ॥ २३ ॥ रुदिर् अश्रुविमोचने ॥

२४७३–धातुसंबन्धी प्रत्यय परे रहते मृज् धातुके इक्को अर्थात् ऋकारको वृद्धि हो ।

अजादि प्रत्यय परे रहते उक्त कार्य विकल्प करके हो * " व्रश्च० २९४ " इस सूत्रसे ज्के स्थानमें ष होकर–मार्ष्टि । मृष्टः । मृजन्ति, मार्जन्ति । ममार्ज । ममार्जतुः, ममृजतुः । ममार्जिथ, ममार्ष्ठ । मार्जिता, मार्ष्टा । मृड्ढि । अमार्ट् । अमार्जम् । अमार्जीत्, अमार्क्षीत् ॥ रुदिर् धातु रोदन करनेमें है ॥

२४७४ रुदादिभ्यः सार्वधातुके । ७ । २ । ७६ ॥

रुद्, स्वप्, श्वस्, अन्, जक्ष्, एभ्यो वलादेः सार्वधातुकस्येट् स्यात् । रोदिति । रुदितः । हौ परत्वादिटि धित्वं न । रुदिहि ॥

२४७४-रुदादि, अर्थात् रुद्, स्वप्, श्वस्, अन् और जक्ष् धातुके उत्तर वलादि सार्वधातुकको इट् हो, रोदिति। रुदितः। हिमें परत्वके कारण इट् होनेसे हिके स्थानमें धि नहीं होकर-रुदिहि॥

२४७५ रुदश्च पञ्चभ्यः ।७।३।९८॥

हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्॥

२४७६-रुदादि पांच धातुओंके उत्तर अपृक्त हलादि पित् सार्वधातुकको ईट्का आगम हो॥

२४७६ अड्गार्ग्यगालवयोः ।७।३।९९॥

अरोदत्-अरोदीत्। अरुदिताम्। अरुदन्। अरोदः-अरोदीः। प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट्। रुद्यात्। अरुदत्-अरोदीत्॥ १॥ ञिष्वप् शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः सुष्वपिथ-सुष्वप्थ॥

२४७६-गार्ग्य और गालव मुनिके मतसे रुदादि धातुके उत्तर अपृक्त हलादि पित् सार्वधातुकके अट् आगम हो, अरोदत्, अरोदीत्। अरुदिताम्। अरुदन्। अरोदः, अरोदीः। प्रकृति और प्रत्यय विशेषकी अपेक्षासे अट्, ईट् यह बहिरङ्ग हैं, और या ट् इनकी अपेक्षा अन्तरङ्ग है, इस कारण यासुट् ही होगा, रुद्यात्। अरुदत्, अरोदीत्॥ ञिस्वप् धातु शयन करनेमें है। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वपिथ, सुष्वप्थ॥

२४७७ सुविनिर्दुर्भ्यः सुपिसूतिसमाः। ८।३।८८॥

एभ्यः सुप्यादेः सस्य षः स्यात्। पूर्वं धातुरुपसर्गेण युज्यते। किति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वम्। पूर्वत्रासिद्धीयमद्विर्वचने॥ सुषुषुपतुः। सुषुषुपुः। अकिति तु द्वित्वेऽभ्यासस्य सम्प्रसारणम्। षत्वस्यासिद्धत्वात्ततः पूर्वं हलादिःशेषः। नित्यत्वाच्च। ततः सुपिरूपाभावान्न षः। सुसुष्वाप। सुस्वप्ता। अस्वपीत्-अस्वपत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्॥ २॥ श्वस प्राणने। श्वसिति। श्वसिता। अश्वसीत्-अश्वसत्। श्वस्यातम्। श्वस्यास्ताम्। ह्म्यन्तक्षणेति न वृद्धिः। अश्वसीत्॥ ३॥ अन च। अनिति। आन्। अनिता। आनत्-आनीत्॥

२४७७-सु, वि, निर्, और दुर् इन उपसर्गोंके परे स्थित सुपि, सु और सम धातुके सकारको षत्व हो। पहले धातु उपसर्गके साथ युक्त होताहै पश्चात् साधनसे, इस मतसे "पूर्वत्रासिद्धीयमद्विर्वचने" इस परिभाषाके अनुसार कित् लिट् परे रहते परत्वके कारण सम्प्रसारण और षत्व करनेपर द्वित्व होगा, जैसे-सुषुषुपतुः। सुषुषुपुः। कित्भिन्न लिट् परे रहते तो द्वित्व होनेपर अभ्यासको सम्प्रसारण होगा, तब षत्वके असिद्धत्व और नित्यत्वके कारण उसके पूर्वमें "हलादिः शेषः २१७९" इससे लोप, पश्चात् सुप् रूपके अभावके कारण षत्व नहीं होगा, जैसे-सुसुष्वाप। सुस्वप्ता। अस्वपत्, अस्वपीत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्॥ श्वस धातु प्राणनार्थमें है। श्वसिति। श्वसिता। अश्वसीत्, अश्वसत्। श्वस्यानाम्। श्वस्यास्ताम्"ह्म्यन्तक्षण०२२९९" इस सूत्रसे वृद्धि नहीं होकर-अश्वसीत्॥अन धातु प्राणनार्थक है। अनिति। आन। अनिता। आनत्, आनीत्॥

२४७८ अनितेः। ८। ४। १९॥

उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति॥ ४॥ जक्ष भक्षहसनयोः। जक्षिति। जक्षितः॥

२४७८-उपसर्गस्थ निमित्तके परे अन् धातुके नकारको णत्व हो, प्राणिति॥ जक्ष धातु भक्षण और हसनमें है। जक्षिति। जक्षितः॥

२४७९ अदभ्यस्तात्। ७। १। ४॥

झस्य अत्स्यादन्तापवादः। जक्षति। सिजभ्यस्तेति जुस्। अजक्षुः। अयमन्तःस्थादिरित्युज्ज्वलदत्तो बभ्राम॥ ५॥ रुदादयः पञ्च गताः॥

जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। उषविदेत्याम् वा। जागरांचकार-जजागार॥

२४७९-अभ्यस्तसंज्ञक धातुके परे झके स्थानमें अत् हो, यह अन्तादेशका अपवाद है, जक्षति। "सिजभ्यस्त० -२२२६" इस सूत्रसे झिके स्थानमें जुस् होकर-अजक्षुः। यह धातु अन्तस्थवर्णादि है, यह उज्ज्वलदत्तने कहाहै, परन्तु यह उसका भ्रम है। रुदादि पांच धातु कहे गए॥ जागृ धातु निद्राक्षय, अर्थात् जागरणमें है। जागर्ति। जागृतः। जाग्रति। "उषविद० २३४१" इस सूत्रसे जागृ धातुके उत्तर विकल्प करके आम् होकर-जागराञ्चकार, जजागार॥

२४८० जाग्रोऽविचिण्णल्ङित्सु। ७। ३। ८५॥

जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च। जजागरतुः। अजागः। अजागृताम्। अभ्यस्तत्वाज्जुस्॥

२४८०-विच्, चिण्, णल्, और ङित्भिन्न वृद्धिविषयमें और प्रतिषेधविषयमें जागृ धातुके ऋकारको गुण हो, जजागरतुः। अजागः। अजागृताम्। अभ्यस्तत्वके कारण जुस् होनेपर-॥

२४८१ जुसि च । ७ । ३ । ८३ ॥

अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् । अजागरुः । अजादौ किम् । जागृयुः । आशिषि तु । जागर्यात् । जागर्यास्ताम् । जागर्यासुः । लुङि । अजागरीत्,जागृ इस् इत्यत्र यण् प्राप्तः,तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः,तां जागर्तिगुणः । तत्र कृते हलन्तलक्षणा प्राप्ता नेटीति निषिद्धा ततोऽतोहलादेरिति बाधित्वाऽतो ल्रान्तस्येति प्राप्ता ह्यन्तेति निषिध्यते ॥ तदाहुः ॥

गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ॥
पुनर्वृद्धिर्निषेधोतो यण्पूर्वाः प्राप्तयो नवेति १

दरिद्रा दुर्गतौ । दरिद्राति ॥

२४८१–अजादि जुस् परे रहते इगन्त अङ्गको गुण हो, अजागरुः । अजादि जुस् न होनेपर जागृयुः । आशिर्लिङ्में तो जागर्य्यात्।जागर्य्यास्ताम् । जागर्य्यासुः । लुङ्में अजागरीत्, यहां "जागृ इस्" इस अवस्थामें यण् प्राप्त हुआ, वह सार्वधातुक गुणसे बाधित हुआ, उसको फिर सिचि वृद्धिने बाधा दी, उसको बाधकर "जाग्रोऽवि०" इससे जागृको गुण हुआ, तब हलन्तलक्षण वृद्धि प्राप्त हुई, उसको "नेटि २२६८" इस सूत्रसे निषेध हुआ, पश्चात् "अतो हलादे०२२८४" इस सूत्रको बाधकर "अतो ल्रान्तस्य" इस सूत्रकी प्राप्ति हुई, उसका "ह्मयन्त० २२९९" इस सूत्रसे निषेध हुआ । वही कारिकामें प्रकाश करतेहैं कि, पहिले यण्की प्राप्ति तब गुणकी प्राप्ति हुई, उसको बाध करके वृद्धि प्राप्त हुई, उसको गुणने बाध किया, तब फिर वृद्धि प्राप्त हुई, उसका भी निषेध हुआ, फिर विकल्प करके प्राप्ति हुई, उसको बाधकर नित्य वृद्धि प्राप्त हुई उसका भी निषेध हुआ,इस प्रकार नौकी प्राप्ति हुई॥ दरिद्रा धातु दुर्गतिमें है । दरिद्राति ॥

२४८२ इद्दरिद्रस्य । ६ । ४ । ११४ ॥

दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके । दरिद्रितः ॥

२४८२–दरिद्रा धातुके आकारके स्थानमें इकार हो हलादि सार्वधातुक कित् ङित् प्रत्यय परे रहते, दरिद्रितः ॥

२४८३ श्नाभ्यस्तयोरातः ।६।४।११२॥

अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम् । दरिद्रांचकार । आत औ णल इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम् । अत एव ज्ञापकादाम्नेत्येके । ददरिद्रौ । ददरिद्रतुरित्यादि । यत्तु णलि ददरिद्रेति तन्निर्मूलमेव ॥ दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः* ॥ लुङि वा सनि ण्वुलि ल्युटि च न ॥ * ॥ दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात् । दरिद्र्यात् । अदरिद्रीत् । इट्सकौ । अदरिद्रासीत् ॥ २ ॥ चकासृ दीप्तौ । झस्य अत् । चकासति । चकासांचकार । धि चेति सलोपः । सिच एवेत्येके । चकाद्धि । चकाधीत्येव भाष्यम् ॥

२४८३–कित् ङित् सार्वधातुक परे रहते श्ना और अभ्यस्तसंज्ञक धातुके आकारका लोप हो । दरिद्रति । अनेकाच् होनेसे आम् होकर–दरिद्राञ्चकार । "आत औणलः २३७१" इस सूत्रमें ओ ऐसा ही कहनेसे सिद्ध होनेपर औकार विधानकी आवश्यकता क्या है ? तो दरिद्रा धातुके आकारका लोप करनेपर भी औकारका श्रवण होनेके निमित्त है, इसी ज्ञापकके कारण आम् नहीं होगा, यह कोई २ कहतेहैं, उनके मतसे ददरिद्रौ । ददरिद्रतुः–इत्यादि । जो णल् परे 'ददरिद्र' ऐसा रूप कहतेहैं वह निर्मूल है ॥

आर्धधातुक विवक्षित होनेपर दरिद्रा धातुके आकारका लोप हो * ॥

लुङ् परे विकल्प करके आकारका लोप हो * और सन् ण्वुल् और ल्युट् परे रहते आकारका लोप नहीं हो * दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात् । दरिद्र्यात् । ('दारिद्रियात्' यह विधि लिङ्में । 'दरिद्र्यात्' यह आशिष्में) । अदरिद्रीत् । इट् और सक् होकर–अदरिद्रासीत् ॥ चकासृ धातु दीप्तिमें है । झके स्थानमें अत् होकर चकासति । चकासाञ्चकार । "धि च २२४९" इस सूत्रसे सिच्के ही सकारका लोप होताहै, यह कोई २ कहतेहैं, उनके मतसे 'चकाद्धि' ऐसा होगा, परन्तु 'चकाधि' ऐसाही भाष्य है ॥

२४८४ तिप्यनस्तेः । ८ । २ । ७३ ॥

पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः । अचकात्–अचकाद् । अचकासुः ॥

२४८४–तिप् परे रहते पदान्तमें स्थित सकारके स्थानमें दकार हो और अस् धातुको न हो, अचकात्, अचकाद् । अचकासुः ॥

२४८५ सिपि धातोरुर्वा । ८ ।२।७४॥

पदान्तस्य धातोः सस्य रुः स्याद्वा । पक्षे दः । अचकाः । अचकात् ॥ ३ ॥ शासु अनुशिष्टौ । शास्ति ॥

२४८५–सिप् परे रहते धातुसंबंधी पदान्तमें स्थित सकारके स्थानमें विकल्प करके रु हो, पक्षमें द होगा–अचकाः, अचकात् ॥ शासु धातु अनुशिष्टि, अर्थात् शासनमें है । शास्ति ॥

२४८६ शास इदङ्हलोः । ६ । ४ ।३४॥

शास उपधाया इत्स्यादङि हलादौ क्ङिति च । शासिवसीति षः । शिष्टः । शासति । शशास । शशासतुः । शास्तु–शिष्टात् । शिष्टाम्,शासतु ॥

२४८६-अङ् और हलादि कित्, ङित् प्रत्यय परे रहते शास् धातुकी उपधाके स्थानमें इकार हो, "शासिवसि० २४१०" इस सूत्रसे षत्व होकर-शिष्टः। शासति। शशास। शशासतुः। शास्तु, शिष्टात्। शिष्टाम्। शासतु॥

२४८७ शा हौ। ६। ४। ३५॥

शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। अशिष्टाम्। अशासुः। अशात्-अशाः। शिष्यात्। सर्तिशास्तीत्यङ्। अशिषत्। अशाशिष्यत्॥४॥ दीधीङ् दीप्तिदेवनयोः। एतदादयः पञ्च धातवश्छान्दसाः। दीधीते। एरनेकाच इति यण्। दीध्याते॥

२४८७-हि परे रहते शास् धातुके स्थानमें शा आदेश हो। आभीयत्वके कारण वह असिद्ध होनेसे हिके स्थानमें धि आदेश होकर-शाधि। अशात्। अशिष्टाम्। अशासुः। अशात्, अशाः। शिष्यात्। "सर्तिशास्ति०२३८२"इस सूत्रसे अङ् होकर-अशिषत्। अशाशिष्यत्॥ दीधीङ् धातु दीप्ति और देवनार्थमें है। इस धातुसे लेकर पांच धातु छान्दस हैं॥ दीधीते। "एरनेकाचः२७२"इस सूत्रसे यण् होकर-दीध्याते॥

२४८८ यीवर्णयोर्दीधीवेव्योः।७।४।५३॥

एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे इति लोपं बाधित्वा नित्यत्वाद्वेरेत्वम्। दीध्ये। दीधीवेवीटामिति गुणनिषेधः। दीध्यांचक्रे। दीधिता। दीधिष्यते॥ १॥ वेवीङ् वेतिना तुल्ये। वीगतीत्यनेन तुल्येर्थे वर्तते इत्यर्थः॥२॥ अथ त्रयः परस्मैपदिनः॥ षस सस्ति स्वप्ने। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि। पूर्वत्रासिद्धमिति सलोपस्यासिद्धत्वादतोहेरिति न लुक्। असत्। असस्ताम्। असः-असत्। सस्यात्। असासीत्-अससीत्॥ १॥ सन्ति। सन्तः। संस्तन्ति॥ २॥ बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य स्कोरिति लोपाभावात्। संस्ति। संस्तः। संस्तन्ति इत्येके। वश कान्तौ। कान्तिरिच्छा। वष्टि। उष्टः। उशन्ति। वक्षि। उष्ठः। उवाश। ऊशतुः। वशिता। वष्टु। उष्टात्। उड्ढि। अवट्। औष्टाम्। औशन्। अवशम्। उश्यातम्। उश्यास्ताम्॥३॥ चर्करीतं च॥ यङ्लुगन्तमदादौ बोध्यम्॥ ह्रुङ् अपनयने। ह्रुते। जुह्रुवे। ह्रुवीत। ह्रोषीष्ट। अह्रोष्ट॥ ४॥

॥ इत्यदादयः॥

२४८८-यकार और इवर्ण परे रहते दीधी और वेवी धातुके अन्त्य भागका लोप हो, इस सूत्रसे प्राप्त लोपको बाधकर नित्यत्वके कारण टिको एकार होगा-दीध्ये। "दीधीवेवीटाम्२१९०" इस सूत्रसे गुणका निषेध हुआ। दीध्यांचक्रे। दीधिता। दीधिष्यते॥ वेवीङ् धातु वी धातुके तुल्य अर्थमें है।

अब तीन परस्मैपदी धातु कहतेहैं।

षस और सस्ति धातु स्वप्नमें है। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि, यहां "पूर्वत्रासिद्धम्१२" इस सूत्रसे सकार लोपके असिद्धत्वके कारण "अतो हेः२२०२" इस सूत्रसे हिका लुक् नहीं हुआ। असत्। असस्ताम्। असः, असत्। सस्यात्। असासीत्, अससीत्। सन्ति। सन्तः। संस्तन्ति। यहां इदित्त्वके कारण नुम् और "स्कोः० ३८०" इस सूत्रसे सकारका लोप और "झरो झरि सवर्णे ७१" इस सूत्रसे तकारका विकल्प करके लोप हुआ। बहुतका समवाय होनेपर दोकी संयोगसंज्ञा न हो इसका आश्रयण करके "स्कोः० ३८०" इस सूत्रसे लोपका अभाव होनेसे संस्ति। संस्तः। संस्तन्ति, ऐसा कोई २ कहतेहैं॥ वश धातु कान्तिमें है, कान्ति शब्दसे इच्छा जाननी। वष्टि। उष्टः। उशन्ति। वक्षि। उष्ठः। उवाश। ऊशतुः। वशिता। वष्टु। उष्टात्। उड्ढि। अवट्। औष्टाम्। औशन्। अवशम्। उश्यातम्। उश्यास्ताम्॥

"चर्करीतञ्च" यङ्लुगन्त अदादिमध्यमें जानना चाहिये। ह्रुङ् धातु अपनयनमें है। ह्रुते। जुह्रुवे। ह्रुवीत। ह्रोषीष्ट। अह्रोष्ट॥

॥ इति तिङन्ते अदादिप्रकरणम्॥

अथ जुहोत्यादयः ३.

हु दानादनयोः॥ आदाने चेत्येके। प्रीणनेपीति भाष्यम्। दानं चेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते। इतश्चत्वारः परस्मैपदिनः॥

हु धातु दान और आदानमें है। किसी २ के मतसे यह केवल आदानार्थक है। भाष्यकारके मतसे यह प्रीणनार्थमें भी है। इस स्थानमें दान शब्दसे प्रक्षेप जानना, वह वैध आधारमें हविका यह स्वभावसे लब्ध होताहै। अब चार परस्मैपदी धातु कहतेहैं॥

२४८९ जुहोत्यादिभ्यः श्लुः।२।४।७५॥

शपः श्लुः स्यात्॥

२४८९-जुहोत्यादिगणीय धातुओंके उत्तर शप्के स्थानमें श्लु आदेश हो॥

२४९० श्लौ। ६। १। १०॥

धातोर्द्वे स्तः। जुहोति। जुहुतः। अदभ्यस्तादित्यत्। हुश्नुवोरिति यण्। जुह्वति॥

२४९०-श्लु परे होते धातुको द्वित्व हो। जुहोति। जुहुतः। "अदभ्यस्तात् २४७९" इससे झिके स्थानमें अत् आदेश,

"हुश्नुवोः० २३८७" इस सूत्रसे यण् आदेश हुआ । जुह्वति ॥

२४९१ भीह्रीभृहुवां श्लुवच्च ।३।१।३९॥

एभ्यो लिट्याम्वा स्यादामि श्लाविव कार्यं च। जुहवांचकार–जुहाव।होता।होष्यति।जुहोतु।जुहुतात्। हेर्धिः जुहुधि। आटि परत्वाद् गुणः। जुहवानि। परत्वाज्जुसि चेति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत् ॥१॥ ञिभी भये। बिभेति ॥

२४९१–भी, ह्री, भृ और हु धातुके उत्तर लिट् परे रहते विकल्प करके आम् हो और आम् परे होनेपर श्लु परे रहते जो कार्य होताहै वही कार्य्य हो । जुहवाञ्चकार, जुहाव । होता । होष्यति । जुहोतु । जुहुतात् । हु धातुके उत्तर हिके स्थानमें धि हो–जुहुधि । आट् परे रहते परत्वके कारण हु धातुके उकारको गुण होगा–जुहवानि । परत्वके कारण जुस् परे भी गुण होगा–अजुहवुः । जुहुयात् । हूयात् । अहौषीत्॥ ञिभी धातु भयमें है । बिभेति ॥

२४९२ भियोन्यतरस्याम् ।६।४।११५॥

इकारः स्याद्धलादौ क्ङिति सार्वधातुके। बिभितः–बिभीतः। बिभ्यति। बिभयांचकार। बिभाय। भेता ॥ २ ॥ ह्री लज्जायाम् ।जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयांचकार। जिह्राय ॥ ३ ॥ पॄ पालनपूरणयोः ॥

२४९२–कित्, ङित् हलादि सार्वधातुक परे रहते भी धातुके ईकारके स्थानमें विकल्प करके ह्रस्व इकार हो । बिभितः, बिभीतः । बिभ्यति । बिभयाञ्चकार । बिभाय । भेता ॥ ह्री धातु लज्जामें है । जिह्रेति । जिह्रीतः । जिह्रियति। जिह्रयाञ्चकार । जिह्राय ॥ पॄ धातु पालन और पूरणार्थमें है ॥

२४९३ अर्तिपिपर्त्योश्च ।७।४।७७॥

अभ्यासस्य इकारोन्तादेशः स्यात् श्लौ ॥

२४९३–श्लु प्रत्यय परे रहते ऋ धातु और पॄ धातुके अभ्यासके अन्तको इकार आदेश हो ॥

२४९४ उदोष्ठ्यपूर्वस्य।७।१।१०२॥

अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उत्स्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्त्वम्। रपरत्वम्। हलि चेति दीर्घः। पिपूर्तः। पिपुरति। पपार। किति लिटि ऋच्छत्यॄतामिति गुणे प्राप्ते ॥

२४९४–अङ्गावयव ओष्ठ्यवर्णपूर्वक जो ॠकार तदन्ताङ्गसम्बन्धी ॠकारके स्थानमें उत् हो । गुण और वृद्धि परत्वके कारण इसको बाधा देतेहैं । पिपर्त्ति । उत्त्व और रपरत्व होगा–"हलि च ३५४" इस सूत्रसे दीर्घ होगा । पिपूर्तः । पिपुरति । पपार । कित् लिट् परे "ऋच्छत्यॄताम् २३८३" इस सूत्रसे गुणकी प्राप्ति होनेसे– ॥

२४९५ शॄदॄप्रां ह्रस्वो वा।७।४।१२॥

एषां किति लिटि ह्रस्वो वा स्यात्। पक्षे गुणः। पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता–परीता। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अपारिष्टाम्। ह्रस्वान्तोयमिति केचित्। पिपर्ति। पिपृतः। पिप्रति। पिपृयात्। आशिषि। प्रियात्। अपार्षीत्। पाणिनीयमते तु, तं रोदसी पिपृतमित्यादौ छान्दसत्वं शरणम् ॥४ ॥ डुभृञ् धारणपोषणयोः ॥

२४९५–शॄ, दॄ और पॄ धातुके ॠकारको विकल्प करके ह्रस्व हो, कित् लिट् परे रहते। विकल्प पक्षमें गुण होगा–पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता, परीता। अपिपः। अपिपूर्त्ताम्। अपिपरुः। पिपूर्य्यात्। पूर्य्यात् अपारीत्। अपारिष्टाम्। यह ह्रस्वान्त है, ऐसा कोई २ कहतेहैं। पिपर्त्ति पिपृतः। पिप्रति। पिपृयात् । आशीर्वाद अर्थमें प्रियात्। अपार्षीत्। किन्तु पाणिनीय मतमें "तं रोदसी पिपृतम्" इत्यादि स्थलमें वैदिकत्व ही शरण अर्थात् आश्रय करने योग्य है ॥ डुभृञ् धातु धारण और पोषणार्थमें है ॥

२४९६ भृञामित् । ७ । ४ । ७६ ॥

भृञ् माङ् ओहाङ्, एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ। बिभर्ति। बिभृतः। बिभ्रति। बिभृध्वे। श्लुवद्भावाद्द्वित्वेत्त्वे। बिभरामास–बभार। बभर्थ। बभूव। बिभृहि। बिभराणि। अबिभः। अबिभृताम्। अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत ॥५॥ माङ् माने शब्दे च ॥

२४९६–श्लु परे होते भृञ्, माङ्, ओहाङ् इन तीन धातुओंके अभ्यासके स्थानमें इकार आदेश हो। बिभर्ति। बिभृतः। बिभ्रति। बिभृध्वे। श्लुवद्भावके कारण द्वित्व और इत्व हुआ–बिभरामास, बभार। बभर्थ। बभूव। बिभृहि। बिभराणि। अबिभः। अबिभृताम्। अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत॥ माङ् धातु मान और शब्दमें है ॥

२४९७ ई हल्यघोः । ६ । ४ । ११३॥

श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि न तु घुसंज्ञकस्य। मिमीते। श्नाभ्यस्तयोरित्यालोपः। मिमाते। मिमते। प्रण्यमास्त ॥ ६ ॥ ओहाङ् गतौ ॥ जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते ॥ ७ ॥ ओहाक् त्यागे ॥ परस्मैपदी। जहाति ॥

२४९७–सार्वधातुक हलादि कित् अथवा ङित् प्रत्यय परे रहते श्ना प्रत्ययके आकारके और अभ्यस्तसंज्ञक धातुके आकारके स्थानमें ईकार हो, घुसंज्ञक धातुको न हो। मिमीते।

"श्नाभ्यस्तयोः० २४८३" इससे आकारका लोप हुआ- मिमाते । मिमते । प्रण्यमास्त ॥ ओहाङ् धातु गतिमें है। जिहीते । जिहाते । जिहते । जहे । हाता । हास्यते ॥ ओहाक् धातु त्यागमें है, यह धातु परस्मैपदी है । जहाति ॥

२४९८ जहातेश्च । ६ । ४ । ११६ ॥

इत्स्याद्वा हलादौ क्ङिति सार्वधातुके । पक्षे ईत्त्वम् । जहितः-जहीतः । जहति ॥

२४९८-हलादि कित्, ङित् सार्वधातुक परे रहते हा धातुके आकारके स्थानमें इकार हो विकल्प करके । पक्षमें ईत्व होगा-जहितः, जहीतः । जहति ॥

२४९९ आ च हौ । ६ । ४ । ११७ ॥

जहातेर्हौ परे आ स्यात् चादिदीतौ । जहाहि-जहिहि-जहीहि । अजहात् । अजहुः ॥

२४९९-हि परे रहते हा धातुके स्थानमें आकार हो, चकार निर्देशके कारण इत्व और ईत्व हो-जहाहि, जहिहि, जहीहि । अजहात् । अजहुः ॥

२५०० लोपो यि । ६ । ४ । ११८ ॥

जहातेरालोपः स्याद्यादौ सार्वधातुके । जह्यात् । एर्लिङि । हेयात् । अहासीत् ॥ ८ ॥ डुदाञ् दाने ॥ प्रणिददाति । दत्तः । ददति । दत्ते । ददौ । घ्वसोरिति एत्वाभ्यासलोपौ । देहि । अददात् । अदत्ताम् । अददुः । दद्यात् । देयात् । अदात् । अदाताम् । अदुः । अदित ॥ ९ ॥ डुधाञ् धारणपोषणयोः । दानेप्येके । प्रणिदधाति ॥

२५००-यकारादि सार्वधातुक परे रहते हा धातुके आकारका लोप हो । जह्यात् "एर्लिङि २३७४" इस सूत्रसे लिङ् परे एत्व होगा-हेयात् । अहासीत् ॥ डुदाञ् धातु दानमें है । प्रणिददाति । दत्तः । ददति । दत्ते । ददौ । "घ्वसोः० २४७१" इस सूत्रसे एत्व और अभ्यासका लोप होगा । देहि । अददात् । अदत्ताम् । अददुः । दद्यात् । देयात् । अदात् । अदाताम् । अदुः । अदित ॥ डुधाञ् धातु धारण और पोषणार्थमें है । किसी २ के मतमें दानार्थमें भी है । प्रणिदधाति ॥

२५०१ दधस्तथोश्च । ८ । २ । ३८ ॥

द्विरुक्तस्य झषन्तस्य धाञो बशो भष् स्यात्तथयोः स्ध्वोश्च परतः । वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमाधवौ । वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत् । धत्तः । दधति । धत्थः । धत्थ । दध्वः । दध्मः । धत्ते । धत्से । धध्वे । धेहि । अधित ॥ १० ॥

अथ त्रयः स्वरितेतः ॥ णिजिर् शौचपोषणयोः ॥

२५०१-जिसको द्वित्व किया गया हो ऐसा झषन्त जो धाञ् धातु उसके अवयवीभूत बश्के स्थानमें भष् हो, त् और थ, स् तथा ध्व परे रहते वामन और माधवके मतमें वचनसामर्थ्यके कारण आकारका लोप स्थानिवत् नहीं होगा, पर यथार्थमें तो "पूर्वत्रासिद्धे न स्थानिवत्" इस परिभाषासे स्थानिवत् नहीं होगा- धत्तः । दधाति । धत्थः । धत्थ । दध्वः । दध्मः । धत्ते । धत्से । धध्वे । धेहि । अधित ॥

अब तीन स्वरितेत् अर्थात् उभयपदी धातु कहे जाते हैं । णिजिर् धातु शौच और पोषणार्थमें है ॥

२५०२ णिजां त्रयाणां गुणः श्लौ । ७ । ४ । ७५ ॥

निज्-विज्-विषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । नेनिक्तः । नेनिजति । नेक्ता । नेक्ष्यति । नेनेक्तु । नेनिग्धि ॥

२५०२-श्लु प्रत्यय परे रहते निज्, विज्, विष् इन तीन धातुओंके अभ्यासको गुण हो । नेनेक्ति । नेनिक्तः । नेनिजति । नेक्ता । नेक्ष्यति । नेनेक्तु । नेनिग्धि ॥

२५०३ नाभ्यस्तस्याऽचि पिति सार्वधातुके । ७ । ३ । ८७ ॥

लघूपधगुणो न स्यात् । नेनिजानि । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । नेनिज्यात् । निज्यात् । अनिजत्-अनैक्षीत् । अनिक्त ॥ १ ॥ विजिर् पृथग्भावे । वेवेक्ति । वेविक्ते । विवेजिथ । अत्र विज इडिति ङित्त्वं न । ओविजी इत्यस्यैव तत्र ग्रहणात् । णिजिविजी रुधादावपि ॥२॥ विष्लृ व्याप्तौ । वेवेष्टि । वेविष्टे । लदित्त्वादङ् । अविषत् । तङि क्सः । अजादौ क्सस्याचीति अल्लोपः । अविक्षत । अविक्षाताम् । अविक्षन्त ॥ ३ ॥

अथ आगणान्तात्परस्मैपदिनश्छान्दसाश्च ॥ घृ क्षरणदीप्त्योः । जिघर्म्यग्निं हविषा घृतेन ॥ भृञामित् । बहुलं छन्दसीति इत्त्वम् ॥ १ ॥ हृ प्रसह्यकरणे । अयं स्रुवो अभिजिहर्ति होमान ॥ ॥ २ ॥ ऋ सृ गतौ । बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेतीत्त्वविधानादयं भाषायामपि । अभ्यासस्यासवर्ण इतीयङ् । इयर्ति । इयृतः । इयति । आर । आरतुः । इडत्त्यर्तीति नित्यमिट् । आरिथ । अर्ता । अरिष्यति । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । ईर्यात् । अर्यात् । आरत् । ससर्ति ॥४॥ भस भर्त्सनदीप्त्योः । बभस्ति । घसिभसोर्हलीत्युपधालोपः । झलोझलीति सलोपः । बब्धः । बप्सति ॥५॥ कि ज्ञाने । चिकेति

॥ ६ ॥ तुर त्वरणे ॥ तुतोर्ति । तुतूर्तः । तुतुरति ॥७॥ धिष शब्दे । दिधेष्टि । दिधिष्टः ॥८॥ धन धान्ये । दधन्ति । दधन्तः । दधनति ॥ ९॥ जन जनने। जजन्ति ॥

२५०३-अजादि पित् सार्वधातुक परे रहते अभ्यस्तसंज्ञक धातुके लघु पदको गुण न हो । नेनिजानि । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । नेनिज्यात् । निज्यात् । अनिजत्, अनैक्षीत् । अनिक्त ॥ विजिर् धातु पृथक्भावमें है । वेवेक्ति । वेविक्ते । विवेजिथ । इस स्थलमें " विज इट् २५३६ " इस सूत्रसे ङित्त्व न होगा कारण कि, वहां ओविजी धातुका ही ग्रहण है ॥ निजि और विजि धातु रुधादिमें भी पठित होंगे ॥ विष्लृ धातु व्याप्तिमें है । वेवेष्टि । वेविष्टे । लृदित्त्वके कारण अङ् होगा । अविषत् । तङ् परे क्स होगा- । "क्सस्याऽचि २३३७" इस सूत्रसे अजादि प्रत्यय परे रहते अकारका लोप होगा-अविक्षत । अविक्षाताम् । अविक्षन्त ॥

इसके पश्चात् गणसमाप्ति पर्य्यन्त परस्मैपदी तथा छान्दस धातु हैं ।

घृ धातु क्षरण और दीप्तिमें है, जैसे-"जिघर्म्यग्निं हविषा घृतेन" । " भृञामित् २४९६ " इससे 'इत्' की अनुवृत्ति होनेपर "बहुलं छन्दसि ३५९८" इस सूत्रसे इत्त्व हुआ॥ हृ धातु बलपूर्वक हरणमें है, यथा-"अयं स्रुवो अभिजिहर्त्ति होमान्" ऋ और सृ धातु गतिमें हैं । इस स्थलमें "बहुलं छन्दसि ३५९८" इस सूत्रसे इत्व सिद्ध होनेपर भी " अर्त्तिपिपर्त्योश्च २४९३" इस सूत्रसे इत्वविधानके कारण भाषामें भी इस धातुका व्यवहार प्रयोग होगा । " अभ्यासस्यासवर्णे २२९०" इस सूत्रसे इयङ् होगा-इयर्त्ति । इयृतः । इय्रति । आर । आरतुः । "इडत्त्यर्ति० २३८४" इस सूत्रसे नित्य इट् हुआ-आरिथ । अर्त्ता । अरिष्यति । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । इयृयात् । अर्यात् । आरत् । ससर्त्ति ॥ भस धातु भर्त्सन और दीप्तिमें है । बभस्ति । "घसिभसोर्हलि २५५०" इस सूत्रसे उपधाका लोप हुआ " झलो झलि २२८१" इस सूत्रसे सकारका लोप हुआ-बब्धः । यहां तस्के तकारको "झषस्तथो० २२८० " से धत्व हुआ । बप्सति ॥ कि धातु ज्ञानमें है । चिकेति ॥ तुर धातु त्वरणमें है । तुतोर्त्ति । तुतूर्त्तः । तुतुरति ॥ धिष धातु शब्द करनेमें है । दिधेष्टि । दिधिष्टः ॥ धन धातु धान्यमें है । दधन्ति । दधन्तः । दधनति॥ जन धातु जननमें है। जजन्ति॥

२५०४ जनसनखनां सञ्झलोः । ६ । ४ । ४२ ॥

एषामाकारोन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च । जजातः । जज्ञति । जजंसि । जजान । जजायात्-जजन्यात् । जायात् । जन्यात्॥१०॥ गा स्तुतौ । देवाञ्जिगाति सुम्नयुः । जिगीतः । जिगति ॥ ११ ॥ * ॥

॥ इति जुहोत्यादयः ॥

२५०४-झलादि सन् और झलादि कित्, ङित् परे रहते जन, सन और खन् धातुको आकार अन्तादेश हो । जजातः । जज्ञति । जजंसि । जजान । जजायात्, जजन्यात् । जायात्, जन्यात्॥ गा धातु स्तुतिमें है,यथा-"देवाञ्जिगाति सुम्नयुः" जिगीतः । जिगति ॥

॥ इति तिङन्ते जुहोत्यादिप्रकरणम् ॥

अथ दिवादयः ४.

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । ञूषन्ताः परस्मैपदिनः॥

दिवु धातु अर्थात् दिव् धातु क्रीडा, विजिगीषा, व्यवहार, द्युति, स्तुति, मोद, मद, स्वप्न, कान्ति और गतिमें है । यहांसे ञूष धातु तक परस्मैपदी धातु कहे जातेहैं ।

२५०५ दिवादिभ्यः श्यन् । ३।१।६९॥

शपोपवादः। हलि चेति दीर्घः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत्।दीव्यात् । अदेवीत् । अदेविष्यत् ॥१॥ षिवु तन्तुसन्ताने । परिषीव्यति । परिषिषेव । न्यषेवीत्-न्यसेवीत् ॥२॥ स्रिवु गतिशोषणयोः॥३॥ष्ठिवु निरसने । केचिदिहेमं न पठन्ति ॥४॥ष्णुसु अदने आदान इत्येके।अदर्शन इत्यपरे। स्नुस्यति । सुष्णोस ॥ ५ ॥ ष्णसु निरसने । स्नस्यति । सस्नास ॥ ६ ॥ क्नसु ह्वरणदीप्त्योः । ह्वरणं कौटिल्यम् । चक्नास ॥ ७ ॥ व्युष दाहे। वुव्योष ॥ ८ ॥ प्लुष च ॥ ९ ॥ नृती गात्रविक्षेपे । नृत्यति ॥ ननर्त ॥

२५०५-दिवादिगणीयधातुओंके उत्तर श्यन् प्रत्यय हो, श्यन् प्रत्यय शप् प्रत्ययका विशेषक है । "हलि च ३५४" इस सूत्रसे दीर्घ होगा । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् ॥ षिवु धातु तन्तुविस्तार अर्थात् सिलाई करनेमें है । परिषीव्यति । परिषिषेव । न्यषेवीत्, न्यसेवीत् ॥ स्रिवु धातु गति और शोषणमें है॥ ष्ठिवु धातु निरसनमें है । कोई२ इस धातुका दिवादिगणके मध्यमें पाठ नहीं करतेहैं ॥ ष्णुसु धातु अदनमें है, किसी २ के मतमें आदान और किसी २ के मतमें अदर्शनमें है । स्नुस्यति। सुष्णोस॥ ष्णसु धातु निरसनमें है । स्नस्यति । सस्नास ॥क्नसु धातु ह्वरण अर्थात् कौटिल्य और दीप्तिमें है । चक्नास ॥ व्युष धातु दाहमें है । वुव्योष ॥ प्लुष धातु दाहमें है ॥ नृती धातु गात्रविक्षेपमें है । नृत्यति । ननर्त ॥

२५०६ सेऽसिचि कृतचृतच्छृदतृदनृतः । ७ । २ । ५७ ॥

एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्य

इड्वा स्यात् । नर्तिष्यति-नर्त्स्यति । नृत्येत् । नृत्यात् । अनर्तीत् ॥ १० ॥ त्रसी । उद्वेगे । वा भ्राशेति श्यन्वा । त्रस्यति-त्रसति । त्रेसतुः-तत्रसतुः ॥ ११ ॥ कुथ पूतीभावे । पूतीभावो दौर्गन्ध्यम् ॥ १२ ॥ पुथ हिंसायाम् ॥ १३ ॥ गुध परिवेष्टने ॥ १४ ॥ क्षिप प्रेरणे । क्षिप्यति । क्षेप्ता ॥ १५ ॥ पुष्प विकसने । पुष्प्यति । पुपुष्प ॥ १६ ॥ तिम ष्टिम ष्टीम आर्द्रीभावे । तिम्यति । स्तिम्यति । स्तीम्यति ॥ १९ ॥ व्रीड चोदने लज्जायां च । व्रीडयति ॥ २० ॥ इष गतौ । इष्यति ॥ २१॥ षह षुह चक्यर्थे । चक्यर्थस्तृप्तिः । सह्यति । सुह्यति ॥ २३ ॥ जॄष् झॄष् वयोहानौ। जीर्यति । जजरतुः-जेरतुः । जरीता-जरिता । जीर्येत् । जीर्यात्-जॄस्तम्भ्वित्यङ्वा । ऋदृशोऽङि गुणः । अजरत्-अजारीत् । अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् ॥ २५ ॥ षूङ् प्राणिप्रसवे । सूयते । सुषुवे । स्वरतिसूतीति विकल्पं बाधित्वा श्र्युकः कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । सुषुविषे । सुषुविवहे । सोता-सविता ॥ २६ ॥ दूङ् परितापे दूयते ॥ २७ ॥ दीङ् क्षये । दीयते ॥

२५०६-कृत, चृत, छृद, तृद और नृत धातुके परे स्थित सिज्भिन्न सकारादि आर्धधातुक प्रत्ययको विकल्प करके इट्-का आगम हो । नर्तिष्यति, नर्त्स्यति । नृत्येत् । नृत्यात् । अनर्तीत् ॥ त्रसी धातु उद्वेगमें है "वा भ्राश० २३२१" इस सूत्रसे विकल्प करके इसके उत्तर श्यन् होगा-त्रस्यति, त्रसति । त्रेसतुः, तत्रसतुः ॥ कुथ धातु पूतीभावमें है । पूती-भाव शब्दसे दौर्गन्ध्य जानना॥पुथ धातु हिंसामें है॥ गुध धातु परिवेष्टनमें है ॥ क्षिप धातु प्रेरणमें है । क्षिप्यति । क्षेप्ता ॥ पुष्प धातु विकसनमें है । पुष्प्यति । पुपुष्प ॥ तिम, ष्टिम और ष्टीम धातु आर्द्रीभावमें हैं । तिम्यति । स्तिम्यति । स्तीम्यति ॥ व्रीड़ धातु प्रेरण और लज्जामें है । व्रीड्यति ॥ इष धातु गतिमें है । इष्यति ॥ षह और षुह धातु चक्यर्थ अर्थात् तृप्तिमें हैं । सह्यति । सुह्यति ॥ जॄष् और झॄष् धातु वयोहानिमें हैं । जजरतुः, जेरतुः । जरीता, जरिता । जीर्येत् । जीर्यात् । "जॄस्तम्भु० २२९१" इस सूत्रसे विकल्प करके अङ् होगा, "ऋदृशोऽङि गुणः २४०६" इस सूत्रसे गुण होगा-अजरत्, अजारीत् । अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् ॥

षूङ् धातु प्राणिप्रसवमें है । सूयते । सुषुवे । "स्वरतिसूति० २२७९" इस सूत्रसे विकल्पको बाध करके "श्र्युकः किति २३८१" इस सूत्रसे निषेध प्राप्ति होनेपर क्रयादिनियमानुसार नित्य इट् होगा । सुषुविषे । सुषुविवहे । सोता, सविता । दूङ् धातु परितापमें है । दूयते ॥ दीङ् धातु क्षयमें है । दीयते ॥

२५०७ दीङो युडचि क्ङिति । ६।४।६३ ॥

दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्॥वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ ॥ *॥ दिदीये ॥

२५०७-दीङ् धातुके उत्तर अजादि कित् ङित् आर्धधातुकको युट्का आगम हो ।

वुक् और युट्, उवङ् और यण् कर्त्तव्य रहते सिद्ध हो यह कहना चाहिये * दिदीये ॥

२५०८ मीनातिमिनोतिदीङां ल्यपि च । ६ । १ । ५० ॥

एषामात्त्वं स्यात् ल्यपि चकारादशित्येज्निमित्ते । दाता । दास्यते । अदास्त । अदास्थाः ॥ २८ ॥ डीङ् विहायसा गतौ । डीयते । डिड्ये ॥ २९ ॥ धीङ् आधारे । धीयते । दिध्ये । धेता ॥ ३० ॥ मीङ् हिंसायाम् । हिंसात्र प्राणवियोगः । मीयते ॥ ३१ ॥ रीङ् श्रवणे । रीयते ॥ ३२ ॥ लीङ् श्लेषणे ।

२५०८-ल्यप् प्रत्यय परे रहते क्र्यादिगणीय मी धातु-स्वादिगणीय मि धातु और दीङ् धातुके ईकार तथा इकारके स्थानमें आकार आदेश हो और सूत्रमें चकारके कारण शित्-भिन्न एच् निमित्त प्रत्यय परे रहते भी हो । दाता । दास्यते । अदास्त । अदास्थाः ॥ डीङ् धातु आकाशगमनमें है । डीयते ॥ धीङ् धातु आधारमें है । धीयते । दिध्ये । धेता ॥ मीङ् धातु हिंसामें है । इस स्थलमें हिंसा शब्द प्राणवियोगमें है । मीयते ॥ रीङ् धातु श्रवणमें है । रीयते ॥ लीङ् धातु श्लेषणमें है ॥

२५०९ विभाषा लीयतेः । ६।१।५१ ॥

लीयतेरिति यका निर्देशो न तु श्यना । लीलीङोरात्त्वं वा स्यादेज्विषये ल्यपि च । लेता-लाता । लेष्यते-लास्यते । एज्विषये किम् । लीयते । लिल्ये ॥ ३३ ॥ व्रीङ् वृणोत्यर्थे । व्रीयते । विव्रिये ॥ स्वादय ओदितः॥ तत्फलं तु निष्ठानत्वम् ॥ ३४ ॥ पीङ् पाने । पीयते ॥३५॥ माङ् माने । मायते । ममे॥३६॥ ईङ् गतौ । ईयते । अयांचक्रे ॥ ३७ ॥ प्रीङ् प्रीतौ सकर्मकः । प्रीयते । पिप्रिये ॥ ३८ ॥

अथ परस्मैपदिनश्चत्वारः ॥ शो तनूकरणे ॥

२५०९-लीयते पद यकसे सिद्ध हुआहै, श्यन्से नहीं, एच्विषयमें और ल्यप् परे रहते ली और लीङ् धातुके ईकार-स्थानमें विकल्प करके आकार हो । लेता, लाता । लेष्यते, लास्यते । एच्विषय न होनेपर लीयते । लिल्ये ॥

व्रीङ् धातु वरणमें है । व्रीयते । विव्रिये । स्वादिगणीय धातु ओकारइत् हैं, उसका फल निष्ठानत्व है ॥ पीङ् धातु

पानमें है । पीयते ॥ माङ् धातु मानमें है । मायते । ममे । ईङ् धातु गतिमें है । ईयते । अयाञ्चक्रे ॥ प्रीङ् धातु प्रीतिमें है । यह सकर्मक है । प्रीयते । पिप्रिये ॥

अब चार परस्मैपदी धातु कहतेहैं ।

शो धातु क्षीण करनेमें है ॥

२५१० ओतः श्यनि । ७ । ३ । ७१ ॥

लोपः स्यात् श्यनि । श्यति । श्यतः।श्यन्ति। शशौ । शशतुः । शाता । शास्यति । विभाषा घ्राधेडिति सिचो वा लुक् । लुगभावे यमरमतीट्सकौ । अशात् । अशाताम् । अशुः । अशासीत् । अशासिष्टाम् ॥ १ ॥ छो छेदने । छयति ॥ २ ॥ षोन्तकर्मणि । स्यति । ससौ । अभिष्यति । अभ्यष्यत् । अभिससौ ॥ ३ ॥ दो अवखण्डने । द्यति । ददौ । प्रणिदाता । देयात् । अदात् ॥ ४ ॥

अथात्मनेपदिनः पञ्चदश । जनी प्रादुर्भावे ॥

२५१०–श्यन् प्रत्यय परे रहते ओकारका लोप हो । श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति। "विभाषा घ्राधेट्० २३७६" इस सूत्रसे विकल्प करके सिच्का लुक् होगा, लुक्के अभाव पक्षमें "यमरम० २३७७" इस सूत्रसे इट् और सक् होगा । अशात् । अशाताम् । अशुः । अशासीत् । अशासिष्टाम् ॥ छो धातु छेदनमें है । छयति ॥ षो धातु विनाशमें है । स्यति । ससौ । अभिष्यति । अभ्यष्यत् । अभिससौ ॥ दो धातु अवखंडनमें है । द्यति । ददौ । प्रणिदाता । देयात् । अदात् ॥

अब पञ्चदश १५ आत्मनेपदी धातु कहतेहैं ।

जनी धातु प्रादुर्भावमें है ॥

२५११ ज्ञाजनोर्जा । ७ । ३ । ७९ ॥

अनयोर्जादेशः स्याच्छिति । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । दीपजनेति वा चिण् ॥

२५११–शित् प्रत्यय परे रहते ज्ञा और जन् धातुके स्थानमें 'जा' आदेश हो । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । "दीपजन० २३२८ इस सूत्रसे विकल्प करके चिण् होगा ॥

२५१२ जनिवध्योश्च ।७।३।३५॥

अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अजनि–अजनिष्ट ॥१॥ दीपी दीप्तौ । दीप्यते । दिदीपे । अदीपि–अदीपिष्ट ॥२॥ पूरी आप्यायने । पूर्यते । अपूरि–अपूरिष्ट ॥ ३ ॥ तूरी गतित्वरणहिंसनयोः । तूर्यते । तुतूरे ॥४॥ धूरी गूरी हिंसागत्योः । धूर्यते । दुधूरे । गूर्यते । जुगूरे ॥ ६ ॥ घूरी जूरी हिंसावयोहान्योः॥८॥ शूरी हिंसास्तम्भनयोः ॥ ९॥ चूरी दाहे ॥१०॥ तप ऐश्वर्ये वा । अयं धातुरैश्वर्ये वा तङ्श्यनौ लभते । अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः। केचित्तु वाग्रहणं वृतुधातोराद्यवयवमिच्छन्ति । तप्यते । तप्ता । तप्स्यते । पतेति व्यत्यासेन पाठान्तरम् । द्युतद्यामानियुतः पत्यमानः ॥११॥ वृतु वरणे । वृत्यते । पक्षान्तरे वावृत्यते । ततो वावृत्यमाना सा रामशालां न्यविक्षतेति भट्टिः ॥ १२ ॥ क्लिश उपतापे । क्लिश्यते । क्लेशिता ॥ १३ ॥ काशृ दीप्तौ । काश्यते ॥ १४ ॥ वाशृ शब्दे । वाश्यते । ववाशे ॥ १५ ॥

अथ पञ्च स्वरितेतः । मृष तितिक्षायाम् । मृष्यति । मृष्यते । ममर्ष । ममृषे ॥ १ ॥ शुचिर् पूतीभावे । पूतीभावः क्लेदः । शुच्यति । शुच्यते । शुशोच । शुशुचे । अशुचत्–अशोचीत् । अशोचिष्ट ॥२॥ णह बन्धने । नह्यति । नह्यते । ननाह । नेहिथ–ननद्ध । नेहे । नद्धा । नत्स्यति । अनात्सीत् ॥३॥ रञ्ज रागे । रज्यति । रज्यते॥४॥शप आक्रोशे। शप्यति। शप्यते॥५॥

अथैकादशानुदात्तेतः । पद गतौ । पद्यते । पेदे । पत्ता । पद्येत । पत्सीष्ट ॥

२५१२–चिण् और ञित्, णित्, कृत् प्रत्यय परे रहते जन और वध धातुकी उपधाको वृद्धि न हो । अजनि, अजनिष्ट। दीपी धातु दीप्तिमें है । दीप्यते । दिदीपे । अदीपि, अदीपिष्ट। पूरी धातु आप्यायनमें । पूर्यते । अपूरि, अपूरिष्ट ॥ तूरी धातु सत्वर गमन और हिंसामें है । तूर्यते । तुतूरे ॥ धूरी और गूरी धातु हिंसा और गतिमें है । धूर्यते । दुधूरे । गूर्यते । जुगूरे ॥ घूरी और जूरी धातु हिंसा और वयोहानिमें हैं ॥ शूरी धातु हिंसा और स्तम्भनार्थमें है ॥ चूरी धातु दाहमें है ॥

तप धातु ऐश्वर्य्यमें है । इस धातुके उत्तर ऐश्वर्य्यार्थमें तङ् और श्यन् विकल्प करके होताहै । किन्तु अन्यत्र शप् विकरण अर्थात् परस्मैपदी है । कोई २ वाशब्दको वृतु धातुका आद्यावयव इच्छा करतेहैं । तप्यते । तप्ता । तप्स्यते । 'पत ' ऐसा व्यत्याससे पाठान्तर भी है, इसीसे " द्युतद्यामानियुतः पत्यमानः " यह भी सङ्गत हुआ । वृतु धातु वरणमें है । वृत्यते । पक्षान्तरमें वावृत्यते । " ततो वावृत्यमाना सा रामशालां न्यविक्षत " ऐसा भट्टिमें प्रयोग है ॥

क्लिश धातु उपतापमें है । क्लिश्यते । क्लेशिता ॥ काशृ धातु दीप्तिमें है । काश्यते ॥ वाशृ धातु शब्दमें है । वाश्यते । ववाशे ॥

अब पांच उभयपदी धातु कहतेहैं ।

मृष धातु तितिक्षामें है । मृष्यति । मृष्यते । ममर्ष । ममृषे ॥ शुचिर् धातु पूतीभावमें है, पूतीभाव शब्दसे क्लेद जानना । शुच्यति । शुच्यते । शुशोच । शुशुचे । अशुचत्,

अशोचीत् । अशोचिष्ट ॥ णह धातु बन्धनमें है । नह्यति । नह्यते । ननाह । नेहिथ, ननद्ध, । नेहे । नद्धा । नत्स्यति । अनात्सीत् ॥ रञ्ज धातु रागमें है । रज्यति । रज्यते ॥ शप धातु आक्रोशमें है । शप्यति । शप्यते ॥

अब ११ आत्मनेपदी धातु कहतेहैं ।

पद धातु गतिमें है । पद्यते । पेदे । पत्ता । पद्येत । पत्सीष्ट ॥

२५१३ चिण् ते पदः । ३ । १ । ६० ॥

पदश्चिण् स्यात्तशब्दे परे । प्रण्यपादि । अपत्सातामू । अपत्सत ॥ १ ॥ खिद दैन्ये । खिद्यते । चिखिदे । खेत्ता । अखित्त ॥ २ ॥ विद सत्तायाम् । विद्यते । वेत्ता ॥ ३ ॥ बुध अवगमने । बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि-अबुद्ध । अभुत्साताम् ॥ ४ ॥ युध सम्प्रहारे । युध्यते । युयुधे । योद्धा । अयुद्ध । कथं युध्यतीति युधमिच्छतीति क्यच् । अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति वा ॥ ५ ॥ अनोरुध कामे । अनुरुध्यते ॥ ६ ॥ अण प्राणने । अण्यते । आणे । अणिता ॥ ७ ॥ अनेति दन्त्यान्तोयमित्येके ॥ ८ ॥ मन ज्ञाने । मन्यते । मेने । मन्ता ॥ ९ ॥ युज समाधौ । समाधिश्चित्तवृत्तिनिरोधः । अकर्मकः युज्यते । योक्ता ॥ १० ॥ सृज विसर्गे । अकर्मकः । संसृज्यते सरसिजैररुणांशुभिन्नैः । ससृजिषे । स्रष्टा । स्रक्ष्यते । लिङ्सिचाविति किन्त्वान्न गुणो नाप्यम् । सृक्षीष्ट । असृष्ट । असृक्षाताम् ॥ ११ ॥ लिश अल्पीभावे । लिश्यते । लेष्टा । लेक्ष्यसे । लिक्षीष्ट । अलिक्षत । अलिक्षाताम् ॥ १२ ॥ अथागणान्तात्परस्मैपदिनः । राधोऽकर्मकाद्वृद्धावेव । एवकारो भिन्नक्रमः । राधोऽकर्मकादेव श्यन् । उदाहरणमाह वृद्धाविति । यन्मह्यमपराध्यति । द्रुह्यतीत्यर्थः । विराध्यन्तं क्षमेत कः । द्रुह्यन्तमित्यर्थः । राध्यत्योदनः । सिध्यतीत्यर्थः । कृष्णाय राध्यति । दैवं पर्यालोचयतीत्यर्थः । दैवस्य धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम् । रराध । रराधतुः । रराधिथ । राधो हिंसायामित्येत्त्वाभ्यासलोपाविह न हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात् । राद्धा । रात्स्यति । अयं स्वादिश्चुरादिश्च ॥ १ ॥ व्यध ताडने । ग्रहिज्येति संप्रसारणम् । विध्यति । विव्याध । विविधतुः । विव्यधिथ-विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् ॥ २ ॥ पुष पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । पुषादीत्यङ् । अपुषत् ॥ ३ ॥ शुष शोषणे । अशुषत् ॥ ४ ॥ तुष प्रीतौ ॥ ५ ॥ दुष वैकृत्ये ॥ ६ ॥ श्लिष आलिङ्गने । श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति ॥

२५१३—त शब्द परे रहते पद धातुके उत्तर स्थित च्लिके स्थानमें चिण् हो । प्रण्यपादि । अपत्साताम् । अपत्सत ॥ खिद धातु दैन्यमे है । खिद्यते । चिखिदे । खेत्ता । अखित्त ॥ विद धातु सत्तामें है । विद्यते । वेत्ता ॥ बुध धातु ज्ञाननेमें है । बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि, अबुद्ध । अभुत्साताम् ॥ युध धातु संप्रहारमें है । युध्यते । युयुधे । योद्धा । अयुद्ध ।

'युध्यति' पद किस प्रकारसे सिद्ध हुआ ? कारण कि, युध धातु आत्मनेपदी है, इस कारण इसके उत्तर परस्मैपदसंज्ञक प्रत्यय नहीं हो सकता, तो कहतेहैं कि, युधमिच्छति इस विग्रहमें युध धातुके उत्तर क्यच् प्रत्यय होकर उक्त रूप सिद्ध हुआहै, किन्तु श्यन् करके नहीं हुआहै, 'अनुदात्तेत्व लक्षण आत्मनेपद अनित्य है' इस परिभाषासे विकल्प करके आत्मनेपद होनेके कारण उक्त रूप सिद्ध हुआ, ऐसा भी कह सकतेहैं ॥

अनुपूर्वक रुध धातु कामार्थमें है । अनुरुध्यते ॥ अण धातु प्राणनमें है । अण्यते । आणे । अणिता । कोई २ कहतेहैं, यह धातु दन्त्यान्त (नकारान्त) है ॥ मन धातु ज्ञानमें है । मन्यते । मेने । मन्ता ॥ युज धातु समाधिमें अर्थात् चित्तवृत्तिनिरोधमें है, यह अकर्मक है । युज्यते । योक्ता ॥ सृज धातु विसर्गमें है, यह अकर्मक है । "संसृज्यते सरसिजैररुणांशुभिन्नैः" ससृजिषे । स्रष्टा । स्रक्ष्यते । "लिङ्सिचौ० २३००" इस सूत्रके अनुसार कित्त्वके कारण गुण और अम् नहीं होगा—सृक्षीष्ट । असृष्ट । असृक्षाताम् ॥ लिश धातु अल्पीभावमें है । लिश्यते । लेष्टा । लेक्ष्यसे । लिक्षीष्ट । अलिक्षत । अलिक्षाताम् ॥

अब दिवादि गणकी समाप्तिपर्यन्त परस्मैपदी धातु चलेंगे ।

राध धातु अकर्मक वृद्धि अर्थमें है, एव शब्द भिन्नक्रम जानना, अर्थात् अकर्मक राध धातुके उत्तर ही श्यन् हो, जैसे—वृद्धिमें 'यन्मह्यमपराध्यति' अर्थात् द्रोह करताहै, 'विराध्यन्तं क्षमेत कः' अर्थात् द्रोह करतेहुए, इन प्रयोगोंमें यह उदाहरण जानना । 'राध्यति ओदनः' अर्थात् सिद्ध होताहै, 'कृष्णाय राध्यति' अर्थात् दैवपर्य्यालोचना करताहै । दैव शब्दके धात्वर्थमें अन्तर्भाव होनेके कारण 'जीवति' इत्यादिके समान अकर्मक है । रराध । रराधतुः । रराधिथ । "राधो हिंसायाम्" इस सूत्रसे एत्व और अभ्यासका लोप नहीं होगा कारण कि, हिंसार्थमें सकर्मक होनेके कारण दिवादि गणके अयोग्य है । राद्धा । रात्स्यति । यह धातु स्वादि और चुरादि दोनों गणीय है ॥

व्यध धातु ताडनमें है । "ग्रहिज्या० २४१२" इससे संप्रसारण होगा—विध्यति । विव्याध । विविधतुः । विव्यधिथ, विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् ॥ पुष धातु पुष्टिमें है । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । "पुषादि० २३४३" इस सूत्रसे अङ् आदेश

हुआ-अपुषत् ॥ शुष धातु शोषणमें है । अशुषत् ॥ तुष धातु प्रीतिमें है ॥ दुष धातु वैकृत्यमें है ॥ श्लिष धातु आलिङ्गनमें है । श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति ॥

२५१४ श्लिषः-३ । १ । ४६ ॥

अस्मात्परस्यानिटश्च्लेः क्सः स्यात् । पुषाद्यङोपवादो न तु चिणः । पुरस्तादपवादन्यायात् ॥

२५१४ आलिङ्गने । ३ । १ ।४६॥

श्लिषश्च्लेरालिङ्गन एव क्सो नान्यत्र । योगविभागसामर्थ्याच्छल इगुपधादित्यस्याप्ययं नियमः । अश्लिक्षत्कन्यां देवदत्तः । आलिङ्गन एवेति किम् । समश्लिषज्जतु काष्ठम् । अङ् । प्रत्यासत्ताविह श्लिषिः । कर्मणि अनालिङ्गने सिजेव न तु क्सः । एकवचने चिण् । अश्लेषि । अश्लिक्षाताम् । अश्लिक्षन्त । अश्लिष्ठाः । अश्लिड्ढ्वम् ॥७॥ शक विभाषितोऽमर्षणे । विभाषित इत्युभयपदीत्यर्थः । शक्यति-शक्यते हरिं द्रष्टुं भक्तः । शशाक । शेकिथ-शशक्थ । शेके । शक्ता । शक्ष्यति । शक्ष्यते । अशकत् । अशक्त । सेट्कोऽयमित्येके । तन्मतेनानिट्कारिकासु लृदित्पठितः । शकिता । शकिष्यति ॥ ८ ॥ ष्विदा गात्रप्रक्षरणे । घर्मस्रुतावित्यर्थः । अयं ञीदिति न्यासकारादयः । नेति हरदत्तादयः । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् ॥९॥ क्रुध क्रोधे । क्रोद्धा । क्रोत्स्यति ॥ १० ॥ क्षुध बुभुक्षायाम् । क्षोद्धा । कथं क्षुधित इति । सम्पदादिक्विबन्तात्तारकादित्वादितच् इति माधवः वस्तुतस्तु वसतिक्षुधोरितीट् ॥ ११ ॥ शुध शौचे । शुध्यति । शुशोध । शोद्धा ॥ १२ ॥ षिधु संराद्धौ । ऊदित्पाठः प्रामादिकः । सिध्यति । सेद्धा । सेत्स्यति । असिधत् ॥ १३ ॥ रध हिंसासंराध्योः । संराद्धिर्निष्पत्तिः । रध्यति । रधिजभोरचीति नुम् । ररन्ध । ररन्धतुः ॥

२५१४-श्लिष धातुके उत्तर स्थित अनिट् च्लिके स्थानमें क्स हो । यह सूत्र " पुरस्तादपवादा अनन्तरान् विधीन्बाधन्ते नोत्तरान् " अर्थात् पूर्वदेशस्थित अपवाद शास्त्र समीप विधिको बाधा देताहै, उत्तर विधिको नहीं, इस परिभाषाके बलसे " पुषादि० " सूत्रसे विहित अङ्का अपवादक है, चिण्का नहीं ॥

श्लिष धातुके उत्तर आलिङ्गनार्थमें ही च्लिके स्थानमें क्स हो अन्यार्थमें नहीं हो । योगविभाग सामर्थ्यके कारण "शल इगुपधात्० २३३६" इस सूत्रसे च्लिके स्थानमें विहित क्स आदेशका भी वर्त्तमान नियम जानना चाहिये । "अश्लिक्षत् कन्यां देवदत्तः " ।

आलिङ्गनार्थमें न होनेपर 'समश्लिषत् जतु काष्ठम्' इस स्थानमें अङ् हुआ, इस स्थलमें श्लिष धातुका अर्थ प्रत्यासत्ति जानना चाहिये ।

कर्म वाच्यमें अनालिङ्गनार्थमें सिच्ही हो, क्स न हो, एकवचनमें चिण् होगा-अश्लेषि । अश्लिक्षाताम् । अश्लिक्षन्त । अश्लिष्ठाः । अश्लिड्ढ्वम् ॥

शक् धातु अमर्षणार्थमें उभयपदी हो । शक्यति, शक्यते हरिं द्रष्टुं भक्तः । शशाक । शेकिथ, शशक्थ । शेके । शक्ता । शक्ष्यति । शक्ष्यते । अशकत् । अशक्त । कोई २ कहतेहैं यह धातु सेट् है, क्योंकि उनके मतके अनुसार अनिट् कारिकामें ऌकारइत् शक् धातु पठित है । शकिता । शकिष्यति ॥ ष्विदा धातु गात्रप्रक्षरण अर्थात् पसीना निकलनेमें है, न्यासकारादिके मतमें यह धातु ञीत् है, किन्तु हरदत्तादिके मतमें ऐसा नहीं है । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् ॥

क्रुध धातु क्रोधमें है । क्रोद्धा । क्रोत्स्यति ॥ क्षुध धातु बुभुक्षामें है । क्षोद्धा । किन्तु क्षुधित पद कैसे सिद्ध हुआ ? कारण कि, यह धातु अनिट्कारिकामें पठित होनेसे अनिट् है ? इस विषयमें माधवने कहाहै कि, सम्पदादि क्विबन्तके उत्तर तारकादित्वके कारण इतच् प्रत्यय होकर सिद्ध हुआहै, वास्तवमें तो " वसति क्षुधोः० ३०४६ " इस सूत्रसे इट् हुआ ॥ शुध धातु शोधनमें है । शुध्यति । शुशोध । शोद्धा ॥ षिधु धातु संराद्धिमें है । इस स्थलमें ऊदित् पाठ प्रामादिक है । सिद्ध्यति । सेद्धा । सेत्स्यति । असिधत् ॥ रध धातु हिंसा और संराद्धिमें है, संराद्धि शब्दसे निष्पत्ति जाननी । रध्यति । " रधिजभोरचि २३०२ " इस सूत्रसे नुम् हुआ-ररन्ध । ररन्धतुः ॥

२५१५ रधादिभ्यश्च । ७ । २ । ४५ ॥

रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह्, एभ्यो वलाद्यार्द्धधातुकस्य वेट् स्यात् । ररन्धिथ-ररद्ध । ररन्धिव-रेध्व ॥

२५१५-रधादि अर्थात् रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह् और ष्णिह् धातुके उत्तर वलादि आर्धधातुकको विकल्प करके इट्का आगम हो । ररन्धिथ, ररद्ध । ररन्धिव, रेध्व ॥

२५१६ नेटचलिटि रधेः । ७।१। ६२॥

लिड्वर्जे इटि रधेर्नुम्न स्यात् । रधिता-रद्धा । रधिष्यति-रत्स्यति । अङि नुम् । अनिदितामिति नलोपः । अरधत् ॥ १४॥ णश अदर्शने । नश्यति । ननाश । नेशतुः । नेशिथ ॥

२५१६-लिट्को छोडकर इट् परे रहते रध् धातुको नुम् न हो । रधिता, रद्धा । रधिष्यति, रत्स्यति । अङ् परे नुम् हुआ, "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप हुआ-अरधत् ॥

णश धातु अदर्शनमें। नश्यति। ननाश। नेशतुः। नेशिथ॥

२५१७ मस्जिनशोर्झलि।७।१।६०॥

नुम् स्यात्। ननंष्ठ। नेशिव-नेश्व। नेशिम-नेश्म। नशिता-नंष्टा। नशिष्यति-नङ्क्ष्यति-नश्येत्। नश्यात्। अनशत्। प्रणश्यति॥

२५१७-झल् परे रहते मस्ज और नश धातुको नुम् हो। ननंष्ठ। नेशिव, नेश्व। नेशिम, नेश्म। नशिता, नंष्टा। नशिष्यति, नङ्क्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति॥

२५१८ नशेः षान्तस्य।८।४।३६॥

णत्वं न स्यात्। प्रनंष्टा। अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम्। प्रनङ्क्ष्यति। नशिष्यति॥१५॥ तृप प्रीणने। प्रीणनं तृप्तिस्तर्पणं च। नाग्निस्तृप्यति काष्ठानाम्। पितॄनतार्प्सीदिति भट्टिः। इत्युभयत्र दर्शनात्। ततर्पिथ-तत्रप्थ-ततर्प्थ। तर्पिता-तर्प्ता-त्रप्ता। कृशमृशस्पृशेति सिज्वा। अतर्पीत्-अत्राप्सीत्-अतार्प्सीत्-अतृपत्॥१६॥ दृप हर्षमोहनयोः। मोहनं गर्वः। दृप्यतीत्यादि। रधादित्वादिमौ वेट्कावमर्थमनुदात्तता॥१७॥ द्रुह जिघांसायाम्। वा द्रुहमुहेति वा घः। पक्षे ढः। दुद्रोग्ध-दुद्रोढ-दुद्रोहिथ। द्रोहिता-द्रोग्धा-द्रोढा। द्रोहिष्यति-ध्रोक्ष्यति। ढत्वघत्वयोस्तुल्यं रूपम्। अद्रुहत्॥१८॥ मुह वैचित्ये वैचित्यमविवेकः। मुह्यति। मुमोहिथ-मुमोग्ध-मुमोढ। मोग्धा-मोढा-मोहिता। मोहिष्यति-मोक्ष्यति। अमुहत्॥१९॥ ष्णुह उद्गिरणे। स्नुह्यति। सुष्णोह। सुष्णोहिथ-सुष्णोग्ध-सुष्णोढ। सुष्णुहिव-सुष्णुह्व। स्नोहिता-स्नोग्धा-स्नोढा। स्नोहिष्यति-स्नोक्ष्यति। अस्नुहत्॥२०॥ ष्णिह प्रीतौ। स्निह्यति। सिष्णेह॥ वृत्॥ रधादयः समाप्ताः। पुषादयस्तु आगणान्तादिति सिद्धान्तः॥२१॥ शमु उपशमे॥

२५१८-षान्त नश धातुके नकारको णत्व न हो। प्रनंष्टा। अन्त शब्दका ग्रहण करनेसे भूतपूर्वकी प्रतिपत्ति जनाता है, अर्थात् पूर्वमें षकारान्त था, अब नहीं इस प्रकार जो नश धातु इसको भी णत्व न हो। प्रनङ्क्ष्यति। नशिष्यति॥

तृप धातु प्रीणनमें है। "नाग्निस्तृप्यति काष्ठानाम्" "पितॄनतार्प्सीत्" इन दोनों स्थलोंमें तृप धातुका प्रीणन अर्थ दिखाया है। ततर्पिथ, तत्रप्थ, ततर्प्थ। तर्पिता, तर्प्ता, त्रप्ता। "कृशमृशस्पृश०" इस सूत्रसे विकल्प करके सिच् हुआ-अतर्पीत्, अत्राप्सीत्, अतार्प्सीत्, अतृपत्। दृप धातु हर्ष और मोहन: अर्थात् गर्वमें है। दृप्यति-इत्यादि। रधादित्वके कारण यह दो धातु विकल्प करके इट् युक्त होतेहैं। अम् आदेशके निमित्त अनुदात्तता हो॥

द्रुह धातु जिघांसामें है। "वा द्रुहमुह० ३२७" इस सूत्रसे विकल्प करके घ हुआ, विकल्प पक्षमें ढ हुआ-दुद्रोग्ध, दुद्रोढ, दुद्रोहिथ। द्रोहिता, द्रोग्धा, द्रोढा। द्रोहिष्यति, ध्रोक्ष्यति। ढत्व और घत्वका रूप तुल्य ही है। अद्रुहत्॥ मुह धातु वैचित्य अर्थात् अविवेकमें है। मुह्यति। मुमोहिथ, मुमोग्ध, मुमोढ। मोग्धा, मोढा, मोहिता। मोहिष्यति, मोक्ष्यति। अमुहत्॥ ष्णुह धातु उद्गिरणमें है। स्नुह्यति। सुष्णोह। सुष्णोहिथ, सुष्णोग्ध, सुष्णोढ। सुष्णुहिव, सुष्णुह्व। स्नोहिता, स्नोग्धा, स्नोढा। स्नोहिष्यति, स्नोक्ष्यति। अस्नुहत्॥ ष्णिह धातु प्रीतिमें है। स्निह्यति। सिष्णेह॥

रधादि धातु समाप्त हुए॥

पुषादि धातु गणसमाप्ति पर्यन्त चलैंगे यह सिद्धान्त मत है।

शमु धातु उपशममें है॥

२५१९ शमामष्टानां दीर्घः श्यनि।७।३।७४॥

शमादीनामित्यर्थः। प्रणिशाम्यति। शेमतुः। शेमिथ। शमिता। अशमत्॥१॥ तमु काङ्क्षायाम्। ताम्यति। तमिता। अतमत्॥२॥ दमु उपशमे। उपशमे इति ण्यन्तस्य। तेन सकर्मकोयम्। न तु शमिवदकर्मकः। अदमत्॥३॥ श्रमु तपसि खेदे च श्राम्यति। अश्रमत्॥४॥ भ्रमु अनवस्थाने। वा भ्राशेति श्यन्वा। तत्र कृते शमामष्टानामिति दीर्घः। भ्राम्यति। लुङ्यङ्। अभ्रमत्। शेषं भ्वादिवत्॥५॥ क्षमू सहने। क्षाम्यति। चक्षमिथ-चक्षन्थ। चक्षमिव-चक्षण्व। चक्षमिम-चक्षण्म। क्षमिता-क्षन्ता। अयमषित्। भ्वादिस्तु षित्। अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा॥६॥ क्लमु ग्लानौ। क्लाम्यति-क्लामति। शपीव श्यन्यपि ष्ठिवुक्लम्वित्येव दीर्घे सिद्धे शमादिपाठो घिनुणर्थः। अङ्। अक्लमत्॥७॥ मदी हर्षे। माद्यति। अमदत्। शमादयोऽष्टौ गताः॥८॥ असु क्षेपणे। अस्यति। आस। असिता॥

२५१९-श्यन् परे रहते शमादि आठ धातुओंको दीर्घ हो। प्रणिशाम्यति। शेमतुः। शेमिथ। शमिता। अशमत्॥ तमु धातु आकांक्षामें है, ताम्यति। तमिता। अतमत्॥ दमु धातु उपशममें है, उपशम शब्द णिजन्तका निर्दिष्ट हुआ है, इस कारण यह धातु सकर्मक है, किन्तु शम धातुके समान अकर्मक नहीं है। अदमत्॥ श्रमु धातु तपस्या और खेदमें है। श्राम्यति। अश्रमत्॥ भ्रमु धातु अनवस्थितिमें है। "वा भ्राश० २३२१" इस सूत्रसे विकल्प करके इस धातुके उत्तर श्यन् होगा, श्यन् होनेपर "शमामष्टानाम्० २५१९"

इस सूत्रसे दीर्घ होगा—भ्राम्यति । लुङ् परे धातुके उत्तर स्थित च्लिके स्थानमें अङ् हुआ—अभ्रमत् । शेष रूप भ्वादिके समान हैं ॥

क्षमू धातु सहनमें है । क्षाम्यति । चक्षमिष, चक्षन्थ । चक्षमिव, चक्षण्व । चक्षमिम, चक्षण्म । क्षमिता, क्षन्ता । यह धातु ऊदित् है, भ्वादिमें षित् जानना, ऊदित् क्षम धातुका क्षान्ति और षकार इत् अर्थात् क्षमूष् धातुका क्षमा ऐसा रूप कृदंतमें होगा ॥ क्लमु धातु ग्लानिमें है । क्लाम्यति, क्लामति । शप् परे रहते जैसा दीर्घ होताहै, वैसेही श्यन् परे भी "ष्ठिवुक्लमु० २३२०" इस सूत्रसेही दीर्घ सिद्ध होता तो भी शमादिपाठ घिनुणर्थ है । अङ् परे अक्लमत् ॥ मदी धातु हर्षमें है । माद्यति । अमदत् ॥

शमादि आठ धातु समाप्त हुए ॥

असु धातु क्षेपणमें है । अस्यति । आस । असिता ॥

२५२० अस्यतेस्थुक् । ७ । ४ । १७॥

अङि परे । आस्थत् । अस्य पुषादित्वादङि सिद्धे अस्यतिवक्तीति वचनं तङर्थम् । तङ् तूपसर्गादस्यत्यूह्योरिति वक्ष्यते । पर्यास्थत ॥ १ ॥ यसु प्रयत्ने ॥

२५२०—अङ् परे रहते असु धातुको थुक्का आगम हो। आस्थत् । इस धातुके उत्तर पुषादित्वके कारण अङ् सिद्ध होनेपर भी "अस्यतिवक्ति० २४३८" इस सूत्रसे अङ्का विधान तङर्थ है, किन्तु तङ् प्रत्यय "उपसर्गादस्यत्यूह्योः० २७०१" (सूत्रपरर्शिक) इस आगे आनेवाले सूत्रमें कथित होगा । पर्यास्थत ॥ यसु धातु प्रयत्नमें है ॥

२५२१ यसोऽनुपसर्गात् । ३ । १।७१॥

२५२१—उपसर्ग पूर्वमें न रहते यसु धातुके उत्तर विकल्प करके श्यन् हो ॥

२५२२ संयसश्च । ३ । १ । ७२ ॥

श्यन्वा स्यात् । यस्यति—यसति । संयस्यति—संयसति । अनुपसर्गात्किम् । प्रयस्यति ॥ २ ॥ जसु मोक्षणे । जस्यति ॥ ३ ॥ तसु उपक्षये॥ दसु च । तस्यति । अतसत् । दस्यति । अदसत् ॥ ५ ॥ वसु स्तम्भे । वस्यति । ववास। ववसतुः । न शसददेति निषेधः । बशादिरयमिति मते तु । बेसतुः । बेसुः ॥ ६ ॥ व्युष विभागे । अयं दाहे पठितः । अर्थभेदेन त्वङर्थं पुनः पठ्यते । अव्युषत् । ओष्ठ्यादिर्दन्त्यान्त्योऽयम् । व्युसतीत्यन्ये । अयकारं बुस इत्यपरे ॥ ॥ ७ ॥ प्लुष दाहे । अप्लुषत् । पूर्वत्र पाठः सिजर्थ इत्याहुः । तद्भ्वादिपाठेन गतार्थमिति सुवचम् ॥ ८ ॥ विस प्रेरणे । विस्यति । अविसत्॥ ॥ ९ ॥ कुस संश्लेषणे । अकुसत् ॥ १० ॥ बुस उत्सर्गे ॥ ११ ॥ मुस खण्डने ॥ १२ ॥ मसी परिणामे । परिणामो विकारः । समी इत्येके ॥ ॥ १३ ॥ लुठ विलोडने ॥ १४ ॥ उच समवाये । उच्यति । उवोच । ऊचतुः । मा भवानुचत् ॥ १५ ॥ भृशु भ्रंशु अधःपतने । बभर्श । अभृशत् । अनिदितामिति नलोपः । भ्रश्यति । अभ्रशत् ॥ १७ ॥ वृश वरणे । वृश्यति । अवृशत् ॥ १८ ॥ कृश तनूकरणे । कृश्यति ॥१९॥ ञितृषा पिपासायाम् ॥ २० ॥ हृष तुष्टौ । श्यन्नङौ भौवादिकाद्विशेषः ॥ २१ ॥ रुष रिष हिंसायाम् । तीषसहेति वेट् । रोषिता—रोष्टा । रेषिता—रेष्टा ॥ २३ ॥ डिप क्षेपे ॥ २४ ॥ कुप क्रोधे ॥ २५ ॥ गुप व्याकुलत्वे ॥ २६ ॥ युपु रुपु लुपु विमोहने । युप्यति । रुप्यति । लुप्यति । लोपिता । लुप्यतिः सेट्कः । अनिङ्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात् ॥ ॥ २९ ॥ लुभ गार्ध्ये । गार्ध्यमाकाङ्क्षा । तीषसहेति वेट् । लोभिता—लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादेरवृत्करणत्वाल्लोभतीत्यपीत्याहुः ॥ ३० ॥ क्षुभ सञ्चलने । क्षुभ्यति ॥ ३१ ॥ णभ तुभ हिंसायाम् । क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते तेषां द्युतादित्वादङ् सिद्धः । क्र्यादित्वात्पक्षे सिज्भवत्येव । इह पाठस्तु श्यनर्थः ॥ ३३ ॥ क्लिदू आर्द्रीभावे । क्लिद्यति । चिक्लेदिथ—चिक्लेत्थ । चिक्लिदिव—चिक्लिद्व । चिक्लिदिम—चिक्लिद्म । क्लेदिता—क्लेत्ता ॥ ३४ ॥ ञिमिदा स्नेहने । मिदेर्गुणः । मेद्यति । अमिदत् । द्युतादिपाठादेवामिदत्, अमेदिष्टेति सिद्धे इह पाठोऽमेदीदिति मा भूदिति । द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः ॥ ३५ ॥ ञिक्ष्विदा स्नेहनमोचनयोः ॥ ३६ ॥ ऋधु वृद्धौ । आनर्ध । आर्धत् ॥ ३७ ॥ गृधु अभिकाङ्क्षायाम् । अगृधत् ॥ ३८ ॥ वृत् ॥ पुषादयो दिवादयश्च वृत्ताः । केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम् । दिवादिस्तु भ्वादिवदाकृतिगणः । तेन क्षीयते मृग्यतीत्यादि सिद्धिरित्याहुः ॥

॥ इति दिवादयः ॥

२५२२—सम्पूर्वक यस् धातुके उत्तर भी विकल्प करके श्यन् हो—यस्यति, यसति । संयस्यति, संयसति । उपसर्गरहित क्यों कहा, तो उपसर्गपूर्वक होनेपर नित्य श्यन् होगा—प्रयस्यति ॥ जसु धातु मोक्षणमें है । जस्यति ॥ तसु और दसु धातु उपक्षयमें है । तस्यति । अत-

सत् । दस्यति । अदसत् ॥ वसु धातु स्तम्भनार्थमें है । वस्यति । ववास । ववसतुः । " नशसदद० २२६३ " इस सूत्रसे एत्त्व तथा अभ्यासलोपका निषेध हुआ । यह धातु बशादि है, इस मतमें–सेबतुः, बेसुः, ऐसा होगा ॥ व्युष धातु विभागमें है, यह धातु दाहार्थक भी है । अर्थभेदसे इसके उत्तर तङ्विधान करनेके निमित्त पुनर्वार पठित हुआ । अव्युषत् । कोई २ कहतेहैं इस धातुके आदिमें ओष्ठ्य वर्ण है और अन्तमें दन्त्य वर्ण है, जैसे–व्युसति । अन्य मतमें बुस धातु यकारहीन है ॥ प्लुष धातु दाहमें है । अप्लुषत् । सिच् विधानके निमित्त पूर्वमें पठित हुआहै । वह भ्वादि गणके पाठके कारण निरर्थक होताहै । विस धातु प्रेरणमें है । विस्यति । अविसत् ॥ कुस धातु संश्लेषणमें है । अकुसत् ॥ बुस धातु उत्सर्ग और मुस धातु खण्डनमें है ॥ मसी धातु परिणाम अर्थात् विकारमें है ॥ कोई २ कहतेहैं, वह समी धातु है ॥ लुठ धातु विलोडनमें है ॥ उच धातु समवायमें है । उच्यति । उवोच । ऊचतुः । ऊचुः । मा भवानुचत् ॥ भृशु और भ्रंशु धातु अधःपतनमें हैं । बभर्श । अभृशत् । " अनिदिताम्० ४१५ " इस सूत्रसे नकारका लोप हुआ–भ्रश्यति । अभ्रशत् । वृश धातु वरणमें है । वृश्यति । अवृशत् ॥ कृश धातु तनूकरणमें है । कृश्यति ॥ ञि तृषः धातु पिपासामें है ॥ हृष धातु तुष्टिमें भ्वादिगणीय हृष धातुके उत्तर श्यन् और अङ् हो, यही विशेष है ॥ रुष और रिष धातु हिंसामें हैं । "तीषसह० २३४०" इस सूत्रसे विकल्प करके इट् हो । रोषिता, रोष्टा । रेषिता, रेष्टा ॥ डिप धातु क्षेपमें है ॥ कुप धातु क्रोधमें है ॥ गुप धातु व्याकुलत्वमें है ॥ युपु, रुपु और लुपु धातु विमोहनमें हैं । युप्यति । रुप्यति । लुप्यति । लोपिता । लुप धातु सेट् है । अनिट्कारिकामें लिप धातुके साहचर्य्यके कारण तुदादिगणीयधातुका ही ग्रहण होगा ॥ लुभ धातु गार्द्ध्य अर्थात् आकांक्षामें है । "तीषसह० २३४०" इस सूत्रसे विकल्प करके इट् हुआ–लोभिता, लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादिके आकृतिगणत्वके कारण 'लोभति' ऐसा पद भी होगा, यह कोई २ कहतेहैं ॥ क्षुभ धातु संचलनमें है ॥ णभ और तुभ धातु हिंसामें हैं । क्षुभि, नभि, और तुभि धातु द्युतादि और क्र्यादि गणमें पठित हों । उनके उत्तर द्युतादित्वके कारण अङ् होगा और क्र्यादित्वके कारण विकल्प करके सिच् होगा । इस गणमें पाठ श्यन् प्रत्ययार्थ है ॥ क्लिदू धातु आर्द्रीभावमें है । क्लिद्यति । चिक्लेदिथ, चिक्लेत्थ । चिक्लिदिव, चिक्लिद्व । चिक्लिदिम, चिक्लिद्म । क्लेदिता, क्लेत्ता ॥ ञि मिदा धातु स्नेहनमें है । मिद धातुके इकारको गुण हो । मेद्यति । अमिदत् । द्युतादिके मध्यमें पाठ करनेसे ही 'अमिदत्, अमेदिष्ट' ऐसे पद सिद्ध होते, तथापि इस स्थलमें पाठ करनेसे 'अमेदीत्' ऐसा पद सिद्ध नहीं होसकता । द्युतादिसे पृथक् जो मिद धातु सो आत्मनेपदमें ही पढनीं उचित है ॥ ञिक्ष्विदा धातु स्नेहन और मोचनमें है ॥ ऋधु धातु वृद्धिमें है । आनर्द्ध । आर्द्धत् ॥ गृधु धातु अभिकांक्षामें है । अगृधत् । कोई २ कहतेहैं, पुषादि और दिवादिगणीय धातु समाप्त हुए । पुषादि धातु समाप्तिके निमित्त ही वृत् पदका ग्रहण हुआ है, किन्तु दिवादि धातु भ्वादिके समान आकृतिगणीय हैं, इसी कारण 'क्षीयते, मृग्यते' इत्यादि पदोंकी सिद्धि हुईहै ॥

॥ इति दिवादिप्रकरणम् ॥

अथ स्वादयः ५.

षुञ् अभिषवे । अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च । तत्र स्नानेऽकर्मकः ॥

षुञ् धातु अभिषव अर्थात् स्नपन, पडिन, सुरासन्धान और स्नान अर्थमें है । इन सब अर्थोंके मध्यमें स्नानार्थमें यह धातु अकर्म्मक है ॥

२५२३ स्वादिभ्यः श्नुः । ३ । १ । ७३ ॥

सुनोति । सुनुतः । हुश्नुवोरितियण् । सुन्वन्ति । सुन्वः–सुनुवः । सुन्वहे–सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । स्तुसुधूञ्भ्य इतीट् । असावीत् । असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव ॥

२५२३–स्वादिगणीय धातुके उत्तर श्नु प्रत्यय हो । सुनोति । सुनुतः । "हुश्नुवोः० २३८७" इस सूत्रसे यण् हुआ–सुन्वन्ति । सुन्वः, सुनुवः । सुन्वहे, सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । "स्तुसुधूञ्भ्यः० २३८५" इस सूत्रसे सु धातुके उत्तर स्थित सिच्को इट् हुआ–असावीत् । असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव ॥

२५२४ सुनोतेः स्यसनोः । ८ । ३ । ११७ ॥

स्ये सनि च परे सुञः षो न स्यात् । विसोष्यति ॥ १ ॥ षिञ् बन्धने । सिनोति । विसिनोति । सिषाय–सिष्ये । सेता ॥ २ ॥ शिञ् निशाने । तालव्यादिः । शेता ॥ ३ ॥ डुमिञ् प्रक्षेपणे । मीनातिमिनोतीत्यात्वम् । ममौ । ममिथ–ममाथ । मिम्ये । माता । मीयात्–मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ ४ ॥ चिञ् चयने । प्रणिचिनोति ॥

२५२४–स्य और सन् प्रत्यय परे रहते सुञ् धातुके सकारको षत्व न हो । विसोष्यति ॥ षिञ् धातु बन्धनमें है । सिनोति । विसिनोति । सिषाय । सिष्ये । सेता । शिञ् धातु निशानमें है । यह धातु तालव्य शकारादि है । शेता ॥ डुमिञ् धातु प्रक्षेपणमें है । "मीनाति मिनोति० २५०८" इस सूत्रसे आकार हुआ–ममौ । ममिथ, ममाथ । मिम्ये । माता । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ चिञ् धातु चयनमें है । प्रणिचिनोति ॥

२५२५ विभाषा चेः । ७ । ३ । ५८ ॥

अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च । प्रणिचिकाय–चिचाय । चिक्ये–चिच्ये ।

अचैषीत् । अचेष्ट ॥ ५ ॥ स्तृञ् आच्छादने । स्तृणोति । स्तृणुते । गुणोऽर्तीति गुणः । स्तर्यात् ॥

२५२५-सन् और लिट् परे रहते अभ्यासके परे स्थित चिञ् धातुके चके स्थानमें विकल्प करके कुत्व हो । प्राणाचिकाय, चिचाय । चिक्ये, चिच्ये । अचैषीत् । अचेष्ट ॥ स्तृञ् धातु आच्छादनमें है । स्तृणोति । स्तृणुते । "गुणोऽर्ति० २३८०" इस सूत्रसे गुण हुआ-स्तर्यात् ॥

२५२६ ऋतश्च संयोगादेः ।७।२।४३॥

ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात्तङि । स्तरिषीष्ट-स्तृषीष्ट । अस्तरिष्ट-अस्तृत । ॥ ६ ॥ कृञ् हिंसायाम् । कृणोति । कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत ॥ ७ ॥ वृञ् वरणे ॥

२५२६-तङ् परे रहते ऋकारान्त संयोगादि धातुके परे लिङ् और सिच्के स्थानमें विकल्प करके इट् हो । स्तरिषीष्ट, स्तृषीष्ट । अस्तरिष्ट, अस्तृत ॥ कृञ् धातु हिंसामें है । कृणोति कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत ॥ वृञ् धातु वरणमें है ॥

२५२७ बभूथाततन्थजगृम्भववर्थेति निगमे । ७ । २ । ६४ ॥

एषां वेदे इडभावो निपात्यते । तेन भाषायां थलीट् । ववरिथ । वव्रृव । वव्रृवहे । वरिता-वरीता ॥

२५२७-वेदमें बभूथ, ततन्थ, जगृम्भ और ववर्थ पदमें निपातनसे इट्का अभाव हो अत एव लोकमें थल्को इट् होताहै, जैसे-ववरिथ । वव्रृव । वव्रृवहे । वरिता, वरीता ॥

२५२८ लिङ्सिचोरात्मनेपदेषु । ७ । २ । ४२ ॥

वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ् सिचोरिड्वा स्यात्तङि ॥

२५२८-तङ् परे रहते वृङ् और वृञ् धातु और ऋकारान्त धातुओंके उत्तर लिङ् और सिच्को विकल्प करके इट् का आगम हो ॥

२५२९ न लिङि । ७ । २ । ३९ ॥

वॄतो लिङ इटो दीर्घो न स्यात् । वरिषीष्ट-वृषीष्ट । अवारीत् । अवरिष्ट-अवरीष्ट-अवृत ८॥ धुञ् कम्पने । धुनोति । धुनुते । अधौषीत् । अधोष्यत् ॥ ९ ॥ दीर्घान्तोऽप्ययम् । धूनोति । धूनुते । स्वरतिसूतीति वेट् । दुधविथ-दुधोथ । किति लिटि तु श्र्युकः कितीति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट् । दुधुविव । स्तुसुधूञ्भ्य इति नित्यमिट् । अधावीत् । अधविष्ट-अधोष्ट ॥ १० ॥

अथ परस्मैपदिनः । टुदु उपतापे । दुनोति ॥ १ ॥ हि गतौ वृद्धौ च ॥

२५२९-वृत्-वृङ्, वृञ्, ऋदन्त धातुके उत्तर लिङ् को उद्देश कर विहित इट्को दीर्घ न हो । वरिषीष्ट, वृषीष्ट । अवारीत् । अवरिष्ट, अवरीष्ट, अवृत ॥ धुञ् धातु कंपनमेंहै धुनोति । धुनुते । अधौषीत् । अधोष्यत् । यह धातु दीर्घान्त भी है । धूनोति । धूनुते । "स्वरतिसूति० २२७९" इस सूत्रसे विकल्प करके इट् हुआ, दुधविथ-दुधोथ । किंतु लिट् परे रहते तो "श्र्युकः० २३८१" इस सूत्रसे इट्के निषेधको बाध कर क्रादिनियमके अनुसार नित्य इट् होताहै-दुधुविव । "स्तुसुधूञ्भ्यः० २३८५" इस सूत्रसे नित्य इट् हुआ-अधावीत् । अधविष्ट, अधोष्ट ॥

अब परस्मैपदी धातु कहतेहैं ।

टुदु धातु उपतापमें है । दुनोति ॥ हि धातु गति और वृद्धिमें है ॥

२५३० हिनुमीना । ८ । ४ । १५ ॥

उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात् । प्रहिणोति ॥

२५३०-उपसर्गस्थ निमित्तके परे हिनु और मीनाके नकारको णत्व हो । प्रहिणोति ॥

२५३१ हेरचङि । ७ । ३ । ५६ ॥

अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि । जिघाय ॥ २ ॥ पृ प्रीतौ । पृणोति । पर्ता ॥ ३ ॥ स्पृ प्रीतिपालनयोः ॥ प्रीतिचलनयोरित्यन्ये । चलनं जीवनमिति स्वामी । स्पृणोति । पस्पार ॥ ४ ॥ स्मृ इत्येके । स्मृणोति । पृणोत्यादयस्त्रयोपि छान्दसा इत्याहुः ॥ ५ ॥ आपॢ व्याप्तौ । आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृदित्वादङ् । आपत् ॥ ६ ॥ शक्ॡ शक्तौ ॥ अशकत् ॥ ७ ॥ राध साध संसिद्धौ ॥ राध्नोति ॥

२५३१-अभ्यासके परे स्थित हि धातुसम्बन्धी हके स्थानमें कवर्ग हो, चङ् परे रहते न हो । जिघाय ॥ पृ धातु प्रीतिमें है । पृणोति । पर्ता ॥ स्पृ धातु प्रीति और पालनमें है, अन्य मतमें प्रीति और चलनमें है, स्वामीके मतमें चलन शब्दसे जीवनमें है । स्पृणोति । पस्पार । अन्य मतमें स्मृ धातु भी उक्तार्थक है । स्मृणोति । पृणोति-इत्यादि तीनों धातु वैदिक हैं । आपॢ धातु व्याप्तिमें है । आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृकार इत् होनेके कारण अङ् हुआ-आपत् ॥ शक्ॢ धातु शक्तिमें है । अशकत् ॥ राध और साध धातु संसिद्धिमें हैं । राध्नोति ॥

२५३२ राधो हिंसायाम् । ६ । ४ । १२३ ॥

एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । अपरेधतुः । रेधुः । रेधिथ । राद्धा । साध्नोति । साद्धा । असात्सीत् । असाद्धाम ॥ ९ ॥

अथ द्वावनुदात्तेतौ ॥ अशू व्याप्तौ संघाते च । अश्नुते ॥

२५३२-कित् लिट् और सेट् थल परे रहते हिंसार्थ राध धातुके एत्व और अभ्यासका लोप हो । अपरेधतुः । रेधुः । रेधिथ । राद्धा । साध्नोति । साद्धा । असात्सीत् । असाद्धाम् ॥

अब दो आत्मनेपदी धातु कहतेहैं ।

अशू धातु व्याप्ति और संघातमें है । अश्नुते ॥

२५३३ अश्नोतेश्च । ७ । ४ । ७२ ॥

दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात् । आनशे । अशिता-अष्टा । अशिष्यते-अक्ष्यते । अश्नुवीत । अशिषीष्ट-अक्षीष्ट । आशिष्ट-आष्ट । आक्षाताम् ॥ १ ॥ ष्टिघ आस्कन्दने ॥ स्तिघ्नुते । तिष्टिघे । स्तेघिता ॥ २ ॥

अथ आगणान्तात्परस्मैपदिनः ॥ तिक तिग गतौ च । चादास्कन्दने । तिक्नोति । तिग्नोति ॥ २ ॥ षघ हिंसायाम् ॥ सघ्नोति ॥ ३ ॥ ञिधृषा प्रागल्भ्ये ॥ धृष्णोति । दधर्ष । धर्षिता ॥ ४ ॥ दम्भु दम्भने ॥ दम्भनं दम्भः । दभ्नोति । ददम्भ । श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरमिहाप्याश्रीयत इत्युक्तम् । अनिदितामिति नलोपः । तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ ॥ दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ ॥ * ॥ देभतुः-ददम्भतुः । इदं कित्त्वं पिदपिद्विषयकमिति सुधाकरादयः । तन्मते तिप्सिप्मिप्सु । देभ-देभिथ-देभेति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु । ददम्भ-ददंभिथ-ददम्भेत्येव । दभ्यात् ॥ ५ ॥ ऋधु वृद्धौ ॥ ६ ॥ तृप प्रीणन इत्येके ॥ क्षुभ्नादित्वाण्णत्वं न । तृप्नोति ॥ ७ ॥ छन्दसि ॥ आगणान्तादधिकारोयम् । अह व्याप्तौ ॥ अह्नोति ॥ १ ॥ दध घातने पालने च ॥ दध्नोति ॥ २ ॥ चमु भक्षणे । चम्नोति ॥ ३ ॥ रि क्षि चिरि जिरि दाश दृ हिंसायाम् ॥ रिणोति । क्षिणोति । अयं भाषायामपीत्येके । न तद्यशः शस्त्रभृतां क्षिणोति । ऋक्षीत्येक एवाजादिरित्यन्ये । ऋक्षिणोति । चिरिणोति । जिरिणोति । दाश्नोति । दृणोति ॥ ९ ॥ वृत् ॥

॥ इति स्वादयः ॥

२५३३-अश धातुको दीर्घ अभ्याससंज्ञक अवर्णके परे नुट्का आगम हो । आनशे । अशिता, अष्टा । अशिष्यते, अक्ष्यते । अश्नुवीत । आशिषीष्ट, अक्षीष्ट । आशिष्ट, आष्ट । आक्षाताम् ॥ ष्टिघ धातु आस्कन्दनमें है । स्तिघ्नुते । तिष्टिघे । स्तेघिता ॥

अब गणसमाप्ति तक परस्मैपदी धातु कहतेहैं ॥

तिक और तिग धातु गति और चकारसे आस्कन्दनमें है । तिक्नोति । तिग्नोति ॥ षघ धातु हिंसामें है । सघ्नोति ॥ ञि धृषा धातु प्रागल्भ्यमें है । धृष्णोति । दधर्ष । धर्षिता ॥ दम्भु धातु दम्भमें है । दभ्नोति । ददम्भ ॥

श्रन्थि, ग्रन्थि, दम्भि और सञ्जि धातुके उत्तर लिट्को कित्त्व हो विकल्प करके यह व्याकरणान्तरमें कथित है, इस स्थलमें भी इसका आश्रय किया जा सकता है यह पहले कहा गया है । " अनिदिताम् ४१५" इस सूत्रसे नकारके लोपके आभीयत्वके कारण आसिद्धि होनेसे एत्व और अभ्यासलोपकी अप्राप्ति होनेपर वार्त्तिक कहतेहैं-दम्भ धातुके एत्व और अभ्यासका लोप हो * देभतुः, ददम्भतुः । यह श्रन्थि, ग्रन्थि इत्यादि सूत्रोक्त कित्त्वपित् और अपित् दोनों विषयक है, यह बात सुधाकरादिने कही है, उनके मतमें तिप्, सिप्, मिप् यह तीन प्रत्यय परे पूर्वोक्त कार्य होगा, देभ, देभिथ, देभ, यह रूपान्तर होंगे, अपित् विषयक है, ऐसा न्यासकारादिकोंका मत है उनके मतमें ददम्भ, ददम्भिथ, ददम्भ, इस प्रकार रूप होंगे । दभ्यात् ॥

ऋधु धातु वृद्धिमें है । किसीके मतमें तृप धातु प्रीणनमें है । क्षुभ्नादित्वके कारण नकारको णत्व नहीं होगा-तृप्नोति । 'वेदमें' इस पदका गण समाप्ति तक अधिकार है ॥ अह धातु व्याप्तिमें है । अह्नोति ॥ दध धातु घातन और पालनमें है । दध्नोति ॥ चमु धातु भक्षणमें है । चम्नोति ॥ रि, क्षि, चिरि, जिरि, दाश और दृ यह सम्पूर्ण धातु हिंसार्थमें हैं । रिणोति । क्षिणोति । किसी २ के मतमें क्षि धातुका भाषामें भी प्रयोग होताहै, जैसे-" न तद्यशः शस्त्रभृतां क्षिणोति " क्षि धातुको कोई २ ' ऋक्षि ' ऐसे अजादि धातु कहतेहैं, उनके मतमें ' ऋक्षिणोति ' ऐसा पद होगा । चिरिणोति । जिरिणोति । दाश्नोति । दृणोति ॥ वृत् ॥

॥ इति स्वादिप्रकरणम् ॥

अथ तुदादयः ६.

तुद व्यथने ॥ इतः षट् स्वरितेतः ॥

तुद धातु व्यथनमें है । यहांसे ६ धातु उभयपदी हैं ॥

२५३४ तुदादिभ्यः शः । ३ । १ । ७७ ॥

तुदति । तुदते । तुतोद । तुतोदिथ । तुतुदे । तोत्ता । अतौत्सीत् । अतुत्त ॥ १ ॥ णुद प्रेरणे । नुदति । नुदते । नुनोद । नुनुदे । नोत्ता ॥ २ ॥ दिश अतिसर्जने । अतिसर्जनं दानम् । देष्टा । दिक्षीष्ट । अदिक्षत् । अदिक्षत ॥ ३ ॥ भ्रस्ज पाके । ग्रहिज्येति संप्रसारणम् । सस्य श्चुत्वेन शः । शस्य जश्त्वेन जः । भृज्जति । भृज्जते ॥

२५३४-शप्के विषय रहते तुदादिगणीय धातुके उत्तर श प्रत्यय हो । तुदति । तुदते । तुतोद । तुतोदिथ । तुतुदे । तोत्ता । अतौत्सीत् । अतुत्त ॥ णुद धातु प्रेरणमें है । नुदति । नुदते । नुनोद । नुनुदे । नोत्ता ॥ दिश धातु अति-

सर्जन अर्थात् दानमें है। देष्टा। दिक्षीष्ट। अदिक्षत्। आदिक्षत ॥ भ्रस्ज धातु पाकमें है। "ग्रहिज्या० २४१२" इस सूत्रसे सम्प्रसारण अर्थात् भ्रस्ज धातुके रकारके स्थानमें ऋकार हुआ, सकारके स्थानमें चवर्गके योगमें श हुआ, श्के स्थानमें जश्त्वके कारण ज् हुआ-भृजति। भृज्जते ॥

२५३५ भ्रस्जो रोपधयो रमन्यतरस्याम्।६।४।४७॥

भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके। मित्त्वादन्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज। बभर्जतुः। बभर्जिथ-बभर्ष्ठ। बभर्जे। रमभावे बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति सलोपः॥ व्रश्चेति षः। बभ्रष्ठ। बभ्रज्जे। भ्रष्टा-भर्ष्टा। भ्रक्ष्यति-भर्क्ष्यति॥ क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन॥ * ॥ भृज्ज्यात्। भृज्ज्यास्ताम्। भ्रक्षीष्ट-भर्क्षीष्ट। अभ्राक्षीत्-अभार्क्षीत्। अभ्रष्ट-अभर्ष्ट॥ ४॥ क्षिप प्रेरणे॥ क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त॥५॥ कृष विलेखने॥ कृषति। कृषते। क्रष्टा-कर्ष्टा। कृष्यात्। कृक्षीष्ट। स्पृशमृशकृषेति सिज्वा-पक्षे क्सः। सिचि अम् वा। अक्राक्षीत्-अकार्क्षीत्-अकृक्षत्। ताङि लिङ्सिचाविति किंत्वादम्न। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षन्त॥ ६॥ ऋषी गतौ। परस्मैपदी। ऋषति। आनर्ष॥१॥ जुषी प्रीतिसेवनयोः॥- आत्मनेपदिनश्चत्वारः। जुषते॥ ओविजी भयचलनयोः॥ प्रायेणायमुत्पूर्वः॥ उद्विजते॥

२५३५-आर्धधातुक विभक्ति परे रहते भ्रस्ज धातुके रेफ और उपधाके स्थानमें विकल्प करके रम्का आगम हो। मित्त्वके कारण अन्त्याच्के परे 'र' होगा। स्थानमें षष्ठीनिर्देशके कारण रकार और उपधाकी निवृत्ति हुई-बभर्ज। बभर्जतुः। बभर्जिथ, बभर्ष्ठ। बभर्जे। रम्के अभावपक्षमें-बभ्रज। बभ्रज्जतुः। बभ्रजिथ। "स्कोः० ३८०" इस सूत्रसे सकारका लोप हुआ, "व्रश्च० २९४" इस सूत्रसे षत्व हुआ- बभ्रष्ठ। बभ्रज्जे। भ्रष्टा, भर्ष्टा। भ्रक्ष्याति भर्क्ष्यति-।

कित्, ङित् परे रहते "२२१७" सूत्रसे रमागमको बाध कर पूर्वविप्रतिषेधके कारण सम्प्रसारण हो-भृज्ज्यात्। भृज्ज्यास्ताम्। भ्रक्षीष्ट, भर्क्षीष्ट। आभ्राक्षीत्। अभार्क्षीत्, अभ्रष्ट-अभर्ष्ट॥

क्षिप धातु प्रेरणमें है। क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त॥ कृष धातु विलेखनमें है। कृषति। कृषते। क्रष्टा, कर्ष्टा। कृष्यात्। कृक्षीष्ट। "स्पृशमृशकृष०" इससे विकल्प करके सिच् हुआ, पक्षमें क्स हुआ, सिच् परे विकल्प करके अम् हुआ- अक्राक्षीत्, अकार्क्षीत्, अकृक्षत्। तङ् परे रहते "लिङ्सिचौ० २३००" इस सूत्रसे किंत्वके कारण अम् नहीं हुआ-अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षन्त॥ ऋषि धातु गतिमें है, यह परस्मैपदी है। ऋषति। आनर्ष॥ जुषी धातु प्रीति और सेवनमें है॥

अब चार धातु आत्मनेपदी कहतेहैं।

जुषते॥ ओविजी धातु भय और चलन में है। यह धातु प्रायः उत्पूर्वक प्रयुक्त होताहै, यथा-उद्विजते॥

२५३६ विज इट्।१।२।२॥

विजेः पर इडादिः प्रत्ययो ङिद्वत्। उद्विजिता। उद्विजिष्यते॥ २॥ ओलजी ओलस्जी व्रीडायाम्॥ लजते। लेजे। लज्जते। ललज्जे॥४॥

अथ परस्मैपदिनः॥ ओव्रश्चू छेदने। ग्रहिज्या। वृश्चति। वव्रश्च। वव्रश्चतुः। वव्रश्चिथ-वव्रष्ठ। लिट्यभ्यासस्येति सम्प्रसारणम्। रेफस्य ऋकारः। उरत्। तस्याचः परस्मिन्निति स्थानिवद्भावान्न सम्प्रसारण इति वस्योत्वं न। व्रश्चिता-व्रष्टा। व्रश्चिष्यति-व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्-अव्राक्षीत्। अव्रक्ष्यत्॥ १॥ व्यच व्याजीकरणे। विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्-अव्यचीत्। व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते। अनसीति पर्युदासेन कृन्मात्रविषयत्वात्॥ २॥ उछि उञ्छे॥ उञ्छति॥ ॥३॥ उच्छी विवासे॥ उच्छति॥ ४॥ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु॥ ऋच्छत्यॄतामिति गुणः। द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वान्नुट्। आनर्छ। आनर्छतुः। ऋच्छिता॥५॥ मिच्छ उत्क्लेशे॥ उत्क्लेशः पीडा। मिमिच्छ। अमिच्छीत्॥ ६॥ जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः॥ ९॥ त्वच संवरणे। तत्वाच॥१०॥ ऋच स्तुतौ। आनर्च॥ ११॥ उब्ज आर्जवे॥ ॥ १२॥ उज्झ उत्सर्गे॥ १३॥ लुभ विमोहने॥ विमोहनमाकुलीकरणम्। लुभति। लोभिता-लोब्धा। लोभिष्यति॥ १४॥ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु॥ रिफति। रिरेफ। रिहेत्येके। शिशुं न विप्रामतिभीरिहन्ति॥१५॥ तृप तृम्फ तृप्तौ॥ आद्यः प्रथमान्तः। द्वितीयो द्वितीयान्तः। द्वावपि द्वितीयान्तावित्यन्ये। तृपति। ततर्प। तर्पिता। स्पृशमृशेति सिज्विकल्पः पौषादिकस्यैव। अङ्पवादत्वात्। ते-

नात्र नित्यं सिच्। अतर्पीत्। तृम्फति। शस्य ङित्त्वादनिदितामिति नलोपे॥ शे तृम्फादीनां नुम्वाच्यः॥ * ॥ आदिशब्दः प्रकारे। तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः। तृम्फति। ततृम्फ। तृफ्यात्॥ १७॥ तुप तुम्प तुफ तुम्फ हिंसायाम्॥ तुपति। तुम्पति। तुफति। तुम्फति॥ २१॥ दृप दृम्फ उत्क्लेशे॥ प्रथमः प्रथमान्तः। द्वितीयो द्वितीयान्तः। प्रथमो द्वितीयान्त इत्येके। दृपति। दृफति। दृम्फति॥२३॥ ऋफ ऋम्फ हिंसायाम्। ऋफति। आनर्फ। ऋम्फति। ऋम्फांचकार॥ २५॥ गुफ गुम्फ ग्रन्थे॥गुफति। जुगोफ। गुम्फति। जुगुम्फ॥२७॥ उभ उम्भ पूरणे॥ उभति। उवोभ। उम्भति। उम्भांचकार॥ २९॥ शुभ शुम्भ शोभार्थे॥ शुभति। शुम्भति॥ ३१॥ दृभी ग्रन्थे। दृभति॥ ३२॥ चृती हिंसाग्रन्थनयोः॥ चर्तिता। से सिचीति वेट्। चर्तिष्यति-चर्त्स्यति-अचर्तीत्॥ ३३॥ विध विधाने॥ विधति। वेधिता॥३४॥ जुड गतौ॥ तवर्गपञ्चमान्त इत्येके। जुडति। मरुतो जुनन्ति॥ ३५॥ मृड सुखने॥ मृडति। मर्डिता॥ ३६॥ पृड च॥ पृडति॥ ३७॥ पृण प्रीणने॥ पृणति। पपर्ण॥३८॥ वृण च॥ वृणति॥३९॥ मृण हिंसायाम्॥४०॥ तुण कौटिल्ये॥ तुतोण॥ ४१॥ पुण कर्मणि शुभे। पुणति॥ ४२॥ मुण प्रतिज्ञाने॥ ४३॥ कुण शब्दोपकरणयोः॥ ४४॥ शुन गतौ॥४५॥ द्रुण हिंसागतिकौटिल्येषु॥ ४६॥ घुण घूर्ण भ्रमणे॥४८॥षुर ऐश्वर्यदीप्त्योः। सुरति। सुषोर। आशिषि। सूर्यात्॥४९॥कुर शब्दे। कुरति। कूर्यात्। अत्र न भकुर्छुरामिति निषेधोन। करोतेरेव तत्र ग्रहणादित्याहुः॥ ५०॥ खुर छेदने॥५१॥ मुर संवेष्टने॥ ५२॥ क्षुर विलेखने॥ ५३॥ घुर भीमार्थशब्दयोः॥ ५४॥ पुर अग्रगमने॥ ५५॥ वृहू उद्यमने। दन्त्योष्ठ्यादिः। पवर्गीयादिरित्यन्ये॥ ५६॥ तृहू स्तृहू तृंहू हिंसार्थाः। तृहति। ततर्ह। स्तृहति। तस्तर्ह। तर्हिता-तर्ढा। स्तर्हिता-स्तर्ढा। अतृंहीत्-अतार्ङ्क्षीत्। अतार्ण्ढाम्॥ ५९॥ इषु इच्छायाम्। इषुगमीति छः। इच्छति। एषिता-एष्टा। एषिष्यति। इष्यात्। ऐषीत्॥ ६०॥ मिष स्पर्धायाम्। मिषति। मेषिता॥ ६१॥ किल श्वैत्यक्रीडनयोः॥ ६२॥ तिल स्नेहने॥ ६३॥ चिल वसने॥ ६४॥ चल विलसने॥ ६५॥ इल स्वप्नक्षेपणयोः॥६६॥ विल संवरणे। दन्त्योष्ठ्यादिः॥ ६७॥ बिल भेदने। ओष्ठ्यादिः॥ ६८॥ णिल गहने॥६९॥ हिल भावकरणे॥७०॥ शिल षिल उञ्छे॥७२॥ मिल श्लेषणे॥ ७३॥ लिख अक्षरविन्यासे। लिलेख॥ ७४॥ कुट कौटिल्ये। गाङ्कुटादिभ्य इति ङित्त्वम्। चुकुटिथ। चुकोट। चुकुट। कुटिता॥ ७५॥ पुट संश्लेषणे॥ ७६॥ कुच सङ्कोचने॥ ७७॥ गुज शब्दे॥ ७८॥ गुड रक्षायाम्॥ ७९॥ डिप क्षेपे॥ ८०॥ छुर छेदने॥ नभकुर्छुरामिति न दीर्घः॥ ८१॥ छुर्यात्॥ स्फुट विकसने। स्फुटति। पुस्फोट॥८२॥ मुट आक्षेपमर्दनयोः॥ ८३॥ त्रुट छेदने। वा भ्राशेति श्यन्वा। त्रुट्यति। त्रुटति। तुत्रोट। त्रुटिता॥ ८४॥ तुट कलहकर्मणि॥ तुटति। तुतोट। तुटिता॥ ८५॥ चुट छुट छेदने॥८७॥ जुड बन्धने॥ ८८॥ कड मदे॥ ८९॥ लुट संश्लेषणे॥ ९०॥ कृड घनत्वे। घनत्वं सान्द्रता। चकर्ड। कृडिता॥ ९१॥ कुड बाल्ये॥ ९२॥ पुड उत्सर्गे॥ ९३॥ घुट प्रतिघाते॥ ९४॥ तुड तोडने। तोडनं भेदः॥९५॥थुड स्थुड संवरणे थुडति। तुथोड। तुस्थोड॥ ९७॥ खुड छुड इत्येके॥ ९९॥ स्फुर स्फुल सञ्चलने॥ १०१॥ स्फुर स्फुरणे॥ स्फुल संचलने इत्येके॥

२५३६-विज धातुके परे इडादि प्रत्यय ङिद्वत् हो, उद्विजिता। उद्विजिष्यते॥ ओलजी और ओलस्जी धातु व्रीडा-में हैं। लजते। लेजे। लज्जते। ललज्जे॥

अब परस्मैपदी धातु कहतेहैं॥

ओव्रश्चू धातु छेदनमें है "ग्रहिज्या० २४१२" इस सूत्रसे सम्प्रसारण होकर-वृश्चति। वव्रश्च। वव्रश्चतुः। वव्रश्चिथ, वव्रष्ठ। यहां "लिट्यभ्यासस्य २४०८" इससे अभ्यास रेफको ऋकार सम्प्रसारण और "उरत् २२४४" इस सूत्रसे ऋकारके स्थानमें अकार हुआ, उसको "अचः परस्मिन्० ५०" इस सूत्रसे स्थानिवद्भावके कारण "न संप्रसारणे सम्प्रसारणम् ३६३" इस सूत्रसे संप्रसारणके निषेध होनेसे वकारके स्थानमें उकार नहीं हुआ। व्रश्चिता, व्रष्टा। व्रश्चिष्यति, व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्, अव्राक्षीत्॥ व्यच धातु व्याजीकरणमें है। विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्, अव्यचीत्। "व्यचेः कुटादित्वमनसि" यह वार्त्तिक तो इस स्थलमें नहीं लगेगा, क्योंकि, 'अनसि' ऐसे पर्युदासके कारण उक्त वार्त्तिकका कृत्मात्र विषय है॥ उछि धातु उञ्छमें है। उञ्छति॥ उच्छी धातु विवासमें है। उच्छति॥ ऋच्छ धातु

गति, इन्द्रिय, प्रलय और मूर्त्तिभावमें है । "ऋच्छत्यृताम् २३८३" इस सूत्रसे गुण हुआ ॥ द्विहल्ग्रहणसे अनेक हल्का उपलक्षण जानाजाताहै, इस कारण ऋच्छ धातुको नुट्का आगम होगा—आनर्च्छ । आनर्च्छतुः । ऋच्छिता ॥ मिच्छ धातु उत्क्लेश, अर्थात् पीडामें है । मिमिच्छ । अमिच्छीत् । जर्ज, चर्च और झर्झ धातु परिभाषण और भर्त्सनमें है ॥ त्वच धातु संवरणमें है । तत्वाच ॥ ऋच धातु स्तुतिमें है । आनर्च ॥ उब्ज धातु आर्जवमें है ॥ उज्झधातु उत्सर्ग, अर्थात् त्यागमें है ॥ लुभ धातु विमोहन, अर्थात् आकुलीकरणमें है । लुभति । लोभिता, लोब्धा । लोभिष्यति ॥ रिफ धातु कत्थन, युद्ध, निन्दा, हिंसा और दानमें है । रिफति, रिरेफ । कोई २ कहतेहैं रिह धातु है, जैसे—'शिशुं न विप्रा मतिभी रिहन्ति' तृप और तृम्फ धातु तृप्तिमें है । प्रथम धातु प्रथमान्त, अर्थात् पकारान्त और द्वितीय द्वितीयान्त, अर्थात् फकारान्त है । कोई २ कहतेहैं दोनों द्वितीयान्त हैं । तृपति । ततर्प । तर्पिता । अङ्के अपवादत्वके कारण "स्पृशमृश० " इस सूत्रसे विकल्प करके सिच् पुषादि धातुओंके ही उत्तर होताहै, इस कारण इस स्थलमें नित्य सिच् होगा, अतर्पीत् । तृम्फति । शकारको ङित्त्वके कारण "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप होनेपर—

श परे रहते तृम्फादि धातुओंको नुम् हो * आदि शब्द प्रकारार्थक है, इस कारण इस स्थलमें जो नकारयुक्त हैं, वह तृम्फादि हैं । तृम्फति । ततृम्फ । तृफ्यात् । तुप, तुम्प, तुफ और तुम्फ धातु हिंसामें हैं । तुपति । तुम्पति । तुफति । तुम्फति ॥ दृप और दृम्फ धातु उत्क्लेशमें हैं । पहला प्रथमान्त और दूसरा द्वितीयान्त है, कोई २ कहतेहैं पहिला द्वितीयान्त है । दृपति । दृफति । दृम्फति ॥ ऋफ और ऋम्फ धातु हिंसार्थक हैं । ऋफति । ऋम्फति । ऋम्फाञ्चकार ॥ गुफ और गुम्फ धातु ग्रन्थनमें हैं । गुफति । जुगोफ । गुम्फति । जुगुम्फ ॥ उभ, उम्भ धातु पूरण अर्थमें हैं । उभति । उवोभ । उम्भति । उम्भाञ्चकार ॥ शुभ और शुम्भ धातु शोभनार्थमें हैं । शुभति । शुम्भति ॥ दृभी धातु ग्रन्थमें है । दृभति ॥ चृती धातु हिंसा और ग्रन्थनमें है । चर्त्तिता । "सेऽसिच० २५०६" इस सूत्रसे विकल्प करके इट् होकर—चर्त्तिष्यति, चर्त्स्यति । अचर्तीत् ॥ विध धातु विधानमें है । विधति । वेधिता ॥ जुड धातु गतिमें है । जुडति । कोई २ कहतेहैं, यह जुन धातु है, जैसे—'मरुतो जुनन्ति' ॥मृड धातु सुखनमें है । मृडति । मर्डिता ॥ पृड धातु सुखन अर्थमें है । पृडति ॥ पृण धातु प्रीणनमें है । पृणति । पपर्ण ॥ वृण धातु भी उक्तार्थक है । वृणति ॥ मृण धातु हिंसामें है ॥ तुण धातु कौटिल्यमें है । तुतोण ॥ पुण धातु शुभ कर्ममें है । पुणति ॥ मुण धातु प्रतिज्ञानमें है ॥ कुण धातु शब्द और उपकरणमें है ॥ शुन धातु गतिमें है ॥ द्रुण धातु हिंसा, गति और कौटिल्यमें हैं ॥ घुण और घूर्ण धातु भ्रमणमें है ॥ षुर धातु ऐश्वर्य और दीप्तिमें है । सुरति । सुषोर । आशिष्अर्थमें—सूर्यात् ॥ कुर धातु शब्दमें है । कुरति । कूर्यात्, इस स्थलमें । "न भकुर्छुराम् १६२९" इस सूत्रसे उपधा दीर्घका निषेध नहीं होगा, क्यों कि, उस स्थलमें कु धातुका ही ग्रहण है ॥ खुर धातु छेदनमें है ॥ मुर धातु संवेष्टनमें है ॥ क्षुर धातु विलेखनमें है ॥ घुर धातु भयानकार्थ और शब्दमें है ॥ पुर धातु अग्रगमनमें है वृहू धातु उद्यमनमें है, यह दन्त्योष्ठ्यादि है, अन्यमतसे पवर्गीयादि है ॥ तृहू, स्तृहू और तृंहू धातु हिंसार्थक हैं । तृहति । ततर्ह । स्तृहति । तस्तर्ह । तर्हिता, तर्ढा । स्तर्हिता, स्तर्ढा । अतृंहीत्, अतार्क्षीत् । अतार्ढाम् ॥ इष धातु इच्छामें है—"इषुगमि० २४००" इस सूत्रसे छ आदेश होकर—इच्छति । एषिता, एष्टा । एषिष्यति । इष्यात् । ऐषीत् ॥ मिष धातु स्पर्द्धामें है । मिषति । मेषिता ॥ किल धातु श्वैत्य और क्रीडामें है ॥ तिल धातु स्नेहनमें है ॥ चिल धातु वसनमें है ॥ चल धातु विलसनमें है ॥ इल धातु स्वप्न और क्षेपणमें है ॥ विल धातु संवरणमें है, यह धातु दन्त्योष्ठ्यादि है ॥ बिल धातु भेदनमें है। यह ओष्ठ्यादि है ॥ णिल धातु गहनमें है ॥ हिल धातु भावकरणमें हैं ॥ शिल और षिल धातु उञ्छमें है ॥ मिल धातु श्लेषणमें है ॥ लिख धातु अक्षरविन्यास (लिखने) में है । लिलेख ॥ कुट धातु कौटिल्यमें है । "गाङ्कुटादिभ्यः० २४६१" इस सूत्रसे ङित्त्व होकर—चुकुटिथ । चुकोट, चुकुट । कुटिता ॥ पुट धातु संश्लेषणमें है ॥ कुच धातु संकोचनमें है ॥ गुज धातु शब्दमें है ॥ गुड धातु रक्षामें है ॥ डिप धातु क्षेपमें है ॥ छुर धातु छेदनमें हैं । "नभकुर्छुराम् १६२९" इस सूत्रसे दीर्घ न हुआ, छुर्यात् ॥ स्फुट धातु विकसनमें है। स्फुटति । पुस्फोट ॥ मुट धातु आक्षेप और मर्दनमें है ॥ त्रुट धातु छेदनमें है । "वा भ्राश० २३२१" इस सूत्रसे विकल्प करके श्यन् होकर—त्रुट्यति, त्रुटति । तुत्रोट । त्रुटिता ॥ तुट धातु कलहमें है । तुटति । तुतोट । तुटिता ॥ चुट और छुट धातु छेदनमें है ॥ जुड धातु बंधनमें है ॥ कड धातु मदमें है ॥ लुट् धातु संश्लेषणमें है ॥ कृड धातु घनत्व, अर्थात् सान्द्रतामें है । चकर्ड । कृडिता ॥ कुड धातु बाल्यमें है ॥ पुड धातु उत्सर्गमें है ॥ घुट धातु प्रतिघातमें है ॥ तुड धातु तोडन, अर्थात् भङ्ग करनेमें है ॥ थुड और स्थुड धातु संवरणमें है । थुडति । थुथोड । तुस्थोड । किसीके मतसे । खुड और छुड धातु है ॥ स्फुर और स्फुल धातु सञ्चलनमें हैं॥स्फुर धातु स्फुरणमें है । स्फुल धातु सञ्चलनमें है, ऐसा कोई २ कहतेहैं ॥

२५३७ स्फुरतिस्फुलत्योर्निर्निविभ्यः । ८ । ३ । ७६ ॥

षत्वं वा स्यात् । निष्फुरति । निःस्फुरति । स्फर इत्यकारोपधं केचित्पठन्ति।पस्फार॥१०२॥ स्फुड चुड ब्रुड संवरणे ॥ १०५ ॥ क्रुड भृड निमज्जन इत्येके ॥ १०७ ॥ गुरी उद्यमने ॥ अनुदात्तेत् । गुरते । जुगुरे । गुरिता ॥ १०८ ॥ णू स्तवने ॥ दीर्घान्तः । परिणूतगुणोदयः ॥ इतश्चत्वारः परस्मैपदिनः॥नुवति।अनुवीत ॥१॥

धू विधूनने ॥ धुवति ॥ २ ॥ गु पुरीषोत्सर्गे ॥ जुगुविथ–जुगुथ । गुता । गुष्यति । अगुषीत् । ह्रस्वादङ्गात् । अगुताम् । अगुषुः ॥ ३ ॥ ध्रु गतिस्थैर्ययोः ॥ ध्रुव इति पाठान्तरम् । आद्यस्य ध्रुवतीत्यादि गुवतिवत् । द्वितीयस्तु सेट् । दुध्रुविथ । ध्रुविता । ध्रुविष्यति। ध्रूव्यात् । अध्रुवीत् । अध्रुविष्टाम् ॥ ४ ॥ कुङ् शब्दे । दीर्घान्त इति कैयटादयः । कुविता । अकुविष्ट । ह्रस्वान्त इति न्यासकारः ॥ कुता । अकुत ॥ १॥ वृत् ॥ कुटादयो वृत्ताः ॥

पृङ् व्यायामे ॥ प्रायेणायं व्याङ्पूर्वः । रिङ् । इयङ् । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते । व्यापृत । व्यापृषाताम् ॥ १ ॥ मृङ् प्राणत्यागे ॥

२५३७–निर्, नि और वि के परे स्थित स्फुर और स्फुल धातुके सकारको विकल्प करके षत्व हो, निःष्फुरति, निस्फुरति। निःष्फुलति, निस्फुलति। कोई स्फर ऐसा अकारोपध पाठ करतेहैं। पस्फार ॥ स्फुड, चुड और व्रुड धातु संवरणमें हैं ॥ क्रुड और भृड धातु निमज्जनमें हैं, यह किसी २ पंडितका मत है॥ गुरी धातु उद्यमनमें है, यह आत्मनेपदी है। गुरते। जुगुरे। गुरिता ॥ णू धातु स्तवनमें है, यह दीर्घ उकारान्त है, यथा–'परिणूतगुणोदयः' ॥

अब चार परस्मैपदी धातु हैं।

नुवति। अनुवीत् ॥ धू धातु विधूननमें है। धुवति ॥ गु धातु पुरीषोत्सर्गमें है। जुगुविथ, जुगुथ। गुता। गुष्याति। अगुषीत्। "ह्रस्वादङ्गात् २३६९" इससे सिच्का लोप होकर–अगुताम्। अगुषुः ॥ ध्रु धातु गति और स्थैर्य्यमें है। ध्रुव ऐसा पाठान्तर है। प्रथम धातुके 'ध्रुवति' इत्यादि गुवतिवत्, अर्थात् गु धातुके समान रूप होंगे। दूसरी धातु सेट् है। दुध्रुविथ। ध्रुविता। ध्रुविष्यति। ध्रुव्यात्। अध्रुवीत्। अध्रुविष्टाम् ॥ कुङ् धातु शब्दमें है, यह धातु दीर्घ उकारान्त है, ऐसा कैयटादि पंडितोंका मत है। कुविता। अकुविष्ट। यह न्यासकारके मतसे ह्रस्वान्त है। कुता। अकुत। कुटादि धातु समाप्त हुए ॥

पृङ् धातु व्यायाममें है, यह धातु प्रायः वि और आङ्पूर्वक है। रिङ् और इयङ् होकर–व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापरिष्यते ॥ व्यापृत। व्यापृषाताम् ॥ मृङ् धातु प्राणत्यागमें है ॥

२५३८ म्रियतेर्लुङ्लिङोश्च । १।३।६१॥

लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। ङित्त्वं स्वरार्थम्। म्रियते। ममार। ममर्थ। मम्रिव। मर्तासि॥ मरिष्यति। मृषीष्ट। अमृत ॥ २ ॥

अथ परस्मैपदिनः सप्त ॥ रि पि गतौ। अन्तरङ्गत्वादियङ्। रियति। पियति। रेता। पेता ॥ २ ॥ धि धारणे ॥ ३ ॥ क्षि निवासगत्योः ॥ ४ ॥ षू प्रेरणे। सुवति। सविता॥५॥ कॄ विक्षेपे। किरति। किरतः। चकार। चकरतुः। करीता–करिता। कीर्यात्।अकारीत्॥

२५३८–लुङ्, लिङ् और शित्की प्रकृतिभूत मृङ् धातुके उत्तर तङ् हो, अन्यत्र न हो। स्वरार्थ ङ् इत् कियाहै। म्रियते। ममार। ममर्थ। मम्रिव। मर्त्तासि। मरिष्यति। मृषीष्ट। अमृत ॥

अब परस्मैपदी ७ धातु कहतेहैं।

रि, पि, धातु गतिमें हैं। लघूपध गुणकी अपेक्षासे अन्तरङ्गत्वके कारण इयङ् होकर–रियति। रेता। पियति। पेता ॥ धि धातु धारणमें है ॥ क्षि धातु निवास और गतिमें है ॥ षू धातु प्रेरणमें है। सुवति। सविता ॥ कॄ धातु विक्षेपमें है। किरति। किरतः। चकार। चकरतुः। करीता–करिता। कीर्य्यात्। अकारीत् ॥

२५३९ किरतौ लवने। ६।१।१४०॥

उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे। उपस्किरति ॥ अडभ्यासव्यवायेऽपि। सुट्कात्पूर्व इति वक्तव्यम् ॥*॥ उपास्किरत्। उपचस्कार॥

२५३९–छेदार्थ होनेपर उप उपसर्गके परे स्थित कॄ धातुको सुट्का आगम हो, उपस्किरति।

अट् और अभ्यासके व्यवधान रहते भी ककारके पूर्वमें सुट् हो * उपास्किरत्। उपचस्कार ॥

२५४० हिंसायां प्रतेश्च। ६।१।१४१॥

उपात्प्रतेश्च किरतेः सुट् स्यात् हिंसायाम्। उपस्किरति। प्रतिस्किरति ॥ ६ ॥ गॄ निगरणे॥

२५४०–उप और प्रतिके परे स्थित कॄ धातुको हिंसार्थमें सुट्का आगम हो, उपस्किरति। प्रतिस्किरति ॥ गॄ धातु निगरणमें है ॥

२५४१ अचि विभाषा। ८।२।२१॥

गिरतेरेफस्य लत्वं वा स्यादजादौ। गिलति–गिरति। जगाल–जगार। जगलिथ–जगरिथ। गलीता–गरीता। गलिता–गरिता ॥७॥

दृङ् आदरे। आद्रियते। आद्रियेते। आदद्रे। आदद्रिषे। आदर्ता। आदरिष्यते। आदृषीष्ट। आदृत। आदृषाताम् ॥ १ ॥ धृङ् अवस्थाने। ध्रियते ॥ २ ॥

अथ परस्मैपदिनः षोडश। प्रच्छ ज्ञीप्सायाम् ॥ पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छिथ–पप्रष्ठ। प्रष्टा। प्रक्ष्यति। अप्राक्षीत् ॥ १॥ वृत्। किरादयो वृत्ताः। सृज विसर्गे। विभाषा सृजिदृशोः। ससर्जिथ–सस्रष्ठ। स्रष्टा। स्रक्ष्यति। सृजिदृशोर्झल्यमकितीत्यमागमः। सृजेत्। सृज्यात्। अस्राक्षीत् ॥ २ ॥ टुमस्जो शुद्धौ ॥

मज्जति । ममज्ज। ममज्जिथ। मस्जिनशोर्झलीति- नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः॥*॥ संयोगा- दिलोपः । ममङ्क्थ । मंक्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥ ३ ॥ रुजो भङ्गे । रोक्ता । रोक्ष्यति । अरौक्षीत् । अरौक्ताम् ॥४॥ भुजो कौटिल्ये ॥ रुजिवत्॥५॥ छुप स्पर्शे । छोप्ता । अच्छौप्सीत् ॥६॥रुश रिश हिंसायाम् । तालव्यान्तौ । रोष्टा । रोक्ष्यति । रेष्टा । रेक्ष्यति ॥ ८ ॥ लिश गतौ । अलिक्षत् । ॥९॥ स्पृश संस्पर्शने। स्प्रष्टा-स्पर्ष्टा। स्प्रक्ष्यति- स्पर्क्ष्यति। अस्प्राक्षीत्-अस्पार्क्षीत्। अस्पृक्षत्१०॥ विच्छ गतौ । गुपूधूपेत्यायः । आर्द्धधातुके वा । विच्छायति।विच्छायांचकार-विविच्छ ॥ ११॥ विश प्रवेशने।विशति।वेष्टा॥१२॥ मृश आमर्शने। आमर्शनं स्पर्शः । अम्राक्षीत्-अमार्क्षीत् । अमृ- क्षत् ॥ १३ ॥ णुद प्रेरणे । कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनः पाठः ॥१४॥ षद्लृ विशर- णगत्यवसादनेषु । सीदतीत्यादि भौवादिकवत्। इह पाठो नुम्विकल्पार्थः । सीदन्ती-सीदती । ज्वलादौ पाठस्तु णार्थः । सादः । स्वरार्थश्च । शबनुदात्तः । शस्तूदात्तः॥१५॥ शद्लृ शातने ॥ स्वरार्थ एष पुनः पाठः । शता तु नास्ति । शदेः शित इत्यात्मनेपदोक्तेः ॥ १६ ॥

अथ षट् स्वरितेतः । मिल सङ्गमे । मिल संश्ले- षणे इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः। मिलति । मिलते । मिमेल । मिमिले ॥ १ ॥ मुच्लृ मोक्षणे ॥

२५४१-अजादि प्रत्यय परे रहते गॄ धातुके रकारके स्थानमें विकल्प करके लकार हो, गिलति, गिरति । जगाल, जगार । जगलिथ, जगरिथ । गलीता, गरीता। गलिता, गरिता। दृङ् धातु आदरमें है । आद्रियते । आद्रियेते । आदद्रे । आदद्रिषे । आदर्त्ता । आदरिष्यते । आदृषीष्ट । आदृत । आदृषाताम् ॥ धृङ् धातु अवस्थानमें है । ध्रियते ॥

अब १६ परस्मैपदी धातु कहतेहैं ।

प्रच्छ धातु ज्ञीप्सामें है । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ, पप्रष्ठ । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । किरादि धातु समाप्त हुए ॥

सृज धातु विसर्ग अर्थात् त्याग करनेमें है । "विभाषा सृजि- दृशोः २४०४" इस सूत्रसे विकल्प करके इट् करके ससर्जिथ, ससृष्ठ । स्रष्टा । स्रक्ष्यति । "सृजिदृशोर्झल्यमकिति २४०५" इस सूत्रसे अमागम हुआ । सृजेत् । सृज्यात् । अस्राक्षीत् ॥ टुमस्जो धातु शुद्धिमें है । मजति । ममज । ममजिथ । "मस्जिनशोर्झलि २५१७" इस सूत्रसे नुम्का आगम हुआ । मस्ज धातुके अन्त्य वर्णके पूर्वमें नुम् हो यह कहना चाहिये * संयोगके आदिका लोप हुआ, ममङ्क्थ । मङ्क्ता। मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥ रुज् धातु भंगमें है । रोक्ता । रोक्ष्यति । अरौक्षीत् । अरौक्ताम् ॥ भुजो धातु कुटिलतामें है । रुजि धातुकी समान इसके रूप होंगे ॥ छुप धातु स्पर्शमें है । छोप्ता । अच्छौप्सीत् ॥ रुश और रिश धातु हिंसामें हैं,यह धातु तालव्यान्त हैं । रोष्टा । रोक्ष्यति। रेष्टा । रेक्ष्यति ॥ लिश धातु गतिमें है । अलिक्षत् ॥ स्पृश धातु संस्पर्शनमें है । स्प्रष्टा, स्पर्ष्टा । स्प्रक्ष्यति, स्पर्क्ष्यति । अस्प्राक्षीत्, अस्पार्क्षीत् । अस्पृक्षत् ॥ विच्छ धातु गतिमें है । "गुपूधूप० २३०३"इस सूत्रसे आय प्रत्यय होगा। आर्धधातुक स्थलमें विकल्प करके होगा, विच्छायति । विच्छायाञ्चकार, विविच्छ ॥ विश धातु प्रवेशमें है । विशति । वेष्टा ॥ मृश धातु आमर्शनमें है । आमर्शन शब्दसे स्पर्श जानना । अम्रा- क्षीत्, अमार्क्षीत् । अमृक्षत्॥ णुद धातु प्रेरणमें है । कर्तृगामी क्रियाफल होनेपर भी परस्मैपदार्थ पुनः पाठ किया है॥षद्लृ धातु विशरण, गति और अवसादनमें है । सीदति, इत्यादि भ्वादिगणके धातुकी समान रूप होंगे । इस स्थलमें पाठ करनेसे विकल्प करके नुम् होगा । सीदन्ती, सीदती । तो ज्वलादि गणमें पाठ तो "ज्वलति०" इससे ण प्रत्ययार्थ है । सादः । और स्वरार्थ भी यहां पाठ कियाहै, शप् अनुदात्त और श उदात्त होताहै॥ शद्लृ धातु शातनमें है । स्वरार्थ इसका पुनः पाठ है । शतृ प्रत्यय तो नहीं होसकताहै, कारण कि, "शदेः शितः २३६२" इससे शित्प्रत्यय होनेवाला है जिससे ऐसे शद धातुको आत्मनेपद कहा है ।

अब ६ स्वरितेत् धातु कहतेहैं ।

मिल धातु संगममें है । श्लेषण अर्थमें पठित'मिल'धातुका पुनः पाठ कर्त्रभिप्राय क्रियाफलमें भी तङ् विधानार्थ है । मिलति । मिलते । मिमेल । मिमिले ॥ मुच्लृ धातु मोचनमें है ॥

२५४२ शेमुचादीनाम् । ७ । १ । ५९ ॥

नुम् स्यात् । मुञ्चति ॥ मुञ्चते । मोक्ता । मुच्यात्। मुक्षीष्ट। अमुचत् ।अमुक्त।अमुक्षाताम् । ॥२॥ लुप्लृ छेदने । लुम्पति। लुम्पते । अलुपत्। अलुप्त ॥३॥ विद्लृ लाभे । विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूत्यादिमते तु सेट्को- ऽयम् । वेदिता । भाष्यादिमतेऽनिट्कः । वेत्ता । परिवेत्ता । परिर्वर्जने । ज्येष्ठं परित्यज्य दारान- ग्नींश्च लब्धवानित्यर्थः । तृन्तृचौ ॥ ४ ॥ लिप उपदेहे। उपदेहो वृद्धिः। लिम्पति। लिम्पते। लेप्ता। लिपिसिचीत्यङ् । तङि तु वा । अलिपत् । अलिपत-अलिप्त ॥ ५ ॥ षिच क्षरणे । सिञ्चति। सिञ्चते । असिचत् । असिचत-असिक्त । अभि- षिञ्चति । अभ्यषिञ्चत् । अभिषिषेच ॥ ६ ॥

अथ त्रयः परस्मैपदिनः ॥ कृती छेदने। कृन्तति । चकर्त । कर्तिता । कर्तिष्यति-

कर्त्स्यति। अकर्तीत् ॥ १ ॥ खिद परिघाते। खिन्दति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ रुधादौ च ॥ २ ॥ पिश अवयवे। पिंशति। पेशिता। अयं दीपनायामपि। त्वष्टा रूपाणि पिंशतु ॥ ३ ॥ इति मुचादयस्तुदादयश्च ॥

॥ इति तुदादयः ॥

२५४२–श प्रत्यय परे रहते मुचादि धातुओंको नुम् हो, मुञ्चति। मुञ्चते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षाताम् ॥ लुप्लृ धातु छेदनमें है। लुम्पति। लुम्पते। अलुपत्। अलुप्त ॥ विद्लृ धातु लाभमें है। विन्दति। विन्दते। विवेद। विविदे। व्याघ्रभूत्यादि–पंडितोंके मतसे यह धातु सेट् है, इससे वेदिता। भाष्यकारादिके मतसे यह अनिट् है, इससे वेत्ता। परिवेत्ता, यहां परि शब्दसे वर्जन समझना, ज्येष्ठको त्यागकर अर्थात् ज्येष्ठके विवाहादिके पूर्वमें ही पत्नी और अग्निको प्राप्त किये हुए। यहां विद धातुके उत्तर तृन् अथवा तृच् प्रत्यय है॥ लिप धातु उपदेहमें है। उपदेह, अर्थात् वृद्धि। लिम्पति। लिम्पते। लेप्ता। "लिपिसिचि० २४१८" इस सूत्रसे अङ् होगा, परन्तु तङ्परे विकल्प करके होगा, अलिपत्। अलिपत,अलिप्त॥ षिच धातु क्षरणमें है। सिञ्चति। सिञ्चते। असिचत्। असिचत, असिक्त। अभिषिञ्चति। अभ्यषिञ्चत्। अभिषिषेच ॥

अब ३ परस्मैपदी धातु कहतेहैं।

कृती धातु छेदनमें है। कृन्तति। चकर्त। कर्तिता। कर्तिष्यति, कर्त्स्यति। अकर्तीत् ॥ खिद धातु परिघातमें है। खिन्दति। चिखेद। खेत्ता। यह धातु दैन्यार्थमें दिवादि और रुधादिगणीय है ॥ पिश धातु अवयवमें है। पिंशति। पेशिता। यह धातु दीपनार्थमें भी है, यथा–' त्वष्टा रूपाणि पिंशतु ' ॥ इति मुचादयस्तुदादयश्च ॥

॥ इति तुदादिप्रकरणम् ॥

अथ रुधादयः ७.

रुधिर् आवरणे ॥ नव स्वरितेत इरितश्च ॥

रुधिर् धातु आवरणमें है।

अब धातु उभयपदी और इरित् कहतेहैं ॥

२५४३ रुधादिभ्यः श्नम्।३।१।७८॥

शपोऽपवादः। मित्वादन्त्यादचः परः। नित्यत्वाद् गुणं बाधते। रुणद्धि। श्नसोरल्लोपः। णत्वस्यासिद्धत्वादनुस्वारः। परसवर्णः। तस्यासिद्धत्वाण्णत्वं न। न पदान्तेतिसूत्रेणाऽनुस्वारपरसवर्णयोरल्लोपो न स्थानिवत्। रुन्धः। रुन्धन्ति। रुन्धे। रोद्धा। रोत्स्यति। रोत्स्यते। रुणद्धु। रुन्धात्। रुन्धि। रुणधानि। रुणधै। अरुणत्। अरुन्धाम्। अरुणत्–अरुणः। अरुणधम्। अरुधत्–अरौत्सीत्। अरुद्ध ॥ १ ॥ भिदिर् विदारणे ॥ भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। भेत्स्यते। अभिनत्–अभिनः। अभिनदम्। अभिन्त। अभिदत्–अभैत्सीत्। अभित्त ॥ २ ॥ छिदिर् द्वैधीकरणे। अच्छिदत्–अच्छैत्सीत्। अच्छित्त ॥३॥ रिचिर् विरेचने ॥ रिणक्ति। रिंक्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्–अरैक्षीत्। अरिक्त ॥ ४ ॥ विचिर् पृथग्भावे। विनक्ति। विंक्ते ॥ ५ ॥ क्षुदिर् सम्पेषणे ॥ क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्–अक्षौत्सीत्। अक्षुत्त ॥ ६ ॥ युजिर् योगे ॥ योक्ता ॥ ७ ॥ उछृदिर् दीप्तिदेवनयोः॥ छृणत्ति। छृन्ते। चच्छर्द। सेसिचीति वेट्। चच्छृदिषे–चच्छृत्से। छर्दिता। छर्दिष्यति–छर्त्स्यति। अच्छृदत्। अच्छर्दीत्। अच्छर्दिष्ट ॥ ८ ॥ उतृदिर् हिंसानादरयोः ॥ तृणत्तीत्यादि ॥ ९ ॥ कृती वेष्टने। परस्मैपदी। कृणत्ति। आर्धधातुके तौदादिकवत् ॥ १० ॥ ञिइन्धी दीप्तौ ॥ त्रय आत्मनेपदिनः ॥

२५४३–रुधादि धातुके उत्तर श्नम् हो, यह श्नम् शप्का अपवाद (विशेषक) है। मकार इत् होनेके कारण अन्त्य अच्के परे होगा। नित्यत्वके कारण गुणको बाध करताहै। रुणद्धि। "श्नसोरल्लोपः" इस सूत्रसे श्नम्के अकारका लोप हुआ। श्नम्के मकार शकारकी इत्संज्ञा हुई नकार शेष रहा। णत्वके असिद्धके कारण नकारको अनुस्वार,और परसवर्ण हुआ, उसके असिद्धत्वके कारण फिर णत्व नहीं हुआ। अनुस्वार, परसवर्ण कर्तव्यमें अल्लोपके स्थानिवद्भाव तो नहीं होगा कारण कि,"न पदान्त० ५१"इस सूत्रसे स्थानिवद्भावका निषेध होजाताहै। रुन्धः। रुन्धन्ति। रुन्धे। रोद्धा। रोत्स्यति। रोत्स्यते। रुणद्धु। रुन्धात्। रुन्धि। रुणधानि। रुणधै। अरुणत्। अरुन्धाम्। अरुणत्, अरुणः। अरुणधम्। अरुधत्, अरौत्सीत्। अरुद्ध ॥ भिदिर् धातु विदारणमें है। भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। अभिनत्, अभिनः। अभिनदम्। अभिन्त। अभिदत्, अभैत्सीत्। अभित्त ॥ छिदिर् धातु द्वैधीकरणमें है। अच्छिदत्,अच्छैत्सीत्। अच्छित्त॥ रिचिर् धातु विरेचनमें है। रिणक्ति। रिङ्क्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्, अरैक्षीत्। अरिक्त॥ विचिर् धातु पृथक् भावमें है। विनक्ति। विङ्क्ते ॥ क्षुदिर् धातु सम्पेषणमें है। क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्, अक्षौत्सीत्। अक्षुत्त ॥ युजिर् योगमें है। योक्ता ॥ उच्छृदिर् धातु दीप्ति और पाशकक्रीडामें है। छृणत्ति। छृन्ते। चच्छर्द। "सेऽसिचि० २५०६" इस सूत्रसे विकल्प करके इट् होकर–चच्छृदिषे, चच्छृत्से। छर्दिता। छर्दिष्यति, छर्त्स्यति। अच्छदत्। अच्छर्दीत्। अच्छर्दिष्ट ॥ उतृदिर् धातु हिंसा और अनादरमें है। तृणत्ति। इत्यादि ॥ कृती धातु वेष्टनमें है, यह परस्मैपदी धातु है। कृणत्ति। आर्धधातुक स्थलमें इसके रूप तुदादिगणके

धातुकी समान होंगे ॥ जिइन्धी धातु दीप्तिमें है, यह तीन धातु आत्मनेपदी हैं ॥

२५४४ श्नान्नलोपः । ६ । ४ । २३ ॥

श्नमः परस्य नस्य लोपः स्यात् । श्नसोरल्लोपः । इन्धे । इन्त्से । इन्धिता । इन्धै । ऐन्ध । ऐन्धाः ॥ १ ॥ खिद दैन्ये । खिन्ते । खेत्ता ॥ २ ॥ विद विचारणे । विन्ते । वेत्ता ॥ ३ ॥

अथ परस्मैपदिनः ॥ शिषॢ विशेषणे । शिनष्टि । शिंष्टः । शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । हेर्धिः । जश्त्वम् । झरो झरीति वा डलोपः । अनुस्वारपरसवर्णौ । शिण्ढि-शिण्ड्ढि । शिनषाणि । अशिनट् । लृदित्त्वादङ् । अशिषत् ॥ १ ॥ पिषॢ सञ्चूर्णने ॥ शिषिवत् । पिनष्टि ॥ २ ॥ भञ्जो आमर्दने ॥ भनक्ति । बभञ्जिथ-बभङ्क्थ । भङ्क्ता ॥ ३ ॥ भुज पालनाभ्यवहारयोः ॥ भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ॥ ४ ॥ तृह हिंसि हिंसायाम् ॥

२५४४-श्नम्के परे नकारका लोप हो " श्नसोरल्लोपः " इससे अकारका लोप होकर-इन्धे । इन्त्से । इन्धिता । इन्धै । ऐन्ध । ऐन्धाः ॥ खिद धातु दैन्यमें है । खिन्ते । खेत्ता ॥ विद धातु विचारणमें है । विन्ते । वेत्ता ।

अब परस्मैपदी धातु कहतेहैं ।

शिषॢ धातु विशेषणमें है । शिनष्टि । शिंष्टः । शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । शिष धातुके उत्तर हिके स्थानमें धि, और षको जश्त्व, और ' झरोझरि०७२ " इस सूत्रसे विकल्प करके डकारका लोप, अनुस्वार, औरपरसवर्ण होकर-शिण्ढि, शिण्ड्ढि । शिनषाणि । अशिनट् । लृकार इत् होनेके कारण च्लिके स्थानमें अङ् होकर-अशिषत् ॥ पिषॢ धातु संचूर्णनमें है । इसके रूप शिष धातुकी समान होंगे । पिनष्टि ॥ भञ्जो धातु आमर्दनमें है । भनक्ति । बभञ्जिथ, बभङ्क्थ । भङ्क्ता ॥ भुज धातु पालन और अभ्यवहार, अर्थात् भोजनमें है । भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ॥ तृह और हिंसि धातु हिंसामें हैं ॥

२५४५ तृणह इम् । ७ । ३ । ९२ ॥

तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता ॥ ६ ॥ उन्दी क्लेदने ॥ उनत्ति । उन्तः । उन्दन्ति । उन्दांचकार । औनत् । औन्ताम् । औन्दन् । औनः-औनत् । औनदम् ॥ ७ ॥ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ-आनङ्क्थ । अङ्क्ता । अञ्जिता । अङ्ग्धि । अनजानि । आनक् ॥

२५४५-हलादि पित् प्रत्यय परे रहते तृह धातुके उत्तर श्नम् होनेपर इमागम हो, तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता ॥ उन्दी धातु क्लेदनमें है । उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत् । औन्ताम् । औन्दन् । औनः,औनत् । औनदम् ॥ अञ्जू धातु व्यक्ति, म्रक्षण, कान्ति और गतिमें है । अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ, आनङ्क्थ । अङ्क्ता । अञ्जिता । अङ्ग्धि । अनजानि । आनक् ॥

२५४६ अञ्जेः सिचि । ७ । २ । ७१ ॥

अञ्जेः सिचो नित्यमिट् स्यात् । आञ्जीत् ॥ ८ ॥ तञ्चू संकोचने ॥ तञ्चिता-तङ्क्ता ॥ ९ ॥ ओविजी भयचलनयोः ॥ विनक्ति । विंक्तः । विज इडिति ङित्त्वम् । विविजिथ । विजिता । अविनक् । अविजीत् ॥ १० ॥ वृजी वर्जने ॥ वृणक्ति । वर्जिता ॥ ११ ॥ पृची संपर्के । पृणक्ति । पपर्च ॥ १२ ॥

॥ इति रुधादयः ॥

२५४६-अञ्जू धातुके उत्तर सिच्को नित्य इट् हो, आञ्जीत् ॥ तञ्चू धातु संकोचनमें है । तञ्चिता,तङ्क्ता ॥ ओविजी धातु भय और चलनमें है । विनक्ति । विङ्क्तः । "विज इट्२५३६" इस सूत्रसे ङित्व होकर-विविजिथ । विजिता । अविनक् । अविजीत् ॥ वृजी धातु वर्जनमें है । वृणक्ति । वर्जिता ॥ पृची धातु संपर्कमें है । पृणक्ति । पपर्च ॥

॥ इति रुधादिप्रकरणम् ॥

अथ तनादयः ८.

अथ सप्त स्वरितेतः ॥ तनु विस्तारे । तनादिकृञ्भ्य उः ॥ तनोति । तन्वः-तनुवः । तनुते । ततान । तेने । तनु । अतानीत्-अतनीत् ॥

यहांसे लेकर ७ धातु उभयपदी कहतेहैं । तनु धातु विस्तारमें है । " तनादिकृञ्भ्य उः " (तनादिगणीय धातु और कृञ् धातुके उत्तर उ प्रत्यय हो) इस सूत्रसे उ प्रत्यय करके-तनोति । तन्वः, तनुवः । तनुते । ततान । तेने । तनु । अतानीत्, अतनीत् ॥

२५४७ तनादिभ्यस्तथासोः । २ । ४ । ७९ ॥

तनादेः सिचो वा लुक् स्यात्तथासोः । थासा साहचर्यादेकवचनं तशब्दो गृह्यते । तेनेह न । यूयमतनिष्ट-अतानिष्ट । अनुदात्तोपदेशेत्यनुनासिकलोपः । तङि । अतत-अतनिष्ट । अतथाः-अतनिष्ठाः ॥ १ ॥ षणु दाने ॥ सनोति । सनुते । ये विभाषा । सायात्-सन्यात् । जनसनेत्यात्वम् । असात-असनिष्ट । असाथाः-असनिष्ठाः ॥ २ ॥ क्षणु हिंसायाम् ॥ क्षणोति । क्षणुते । ह्मयन्तेति न वृद्धिः । अक्ष

णीत् । अक्षत-अक्षणिष्ट । अक्षथाः-अक्षणिष्ठाः ॥ ॥ ३ ॥ क्षिणु च ॥ उप्रत्ययनिमित्तो लघूपधगुणः संज्ञापूर्वको विधिरनित्य इति न भवतीत्यात्रेयादयः । भवत्येवेत्यन्ये । क्षिणोति-क्षेणोति । क्षेणितासि । क्षेणितासे । अक्षेणीत् । अक्षित-अक्षेणिष्ट ॥ ४ ॥ ऋणु गतौ ॥ ऋणोति-अर्णोति । ऋणुतः-अर्णुतः । ऋण्वन्ति-अर्णुवन्ति । आनर्ण-आनृणे । अर्णितासि । आर्णीत् । आर्त-आर्णिष्ट । आर्थाः-आर्णिष्ठाः ॥ ॥ ५ ॥ तृणु अदने ॥ तृणोति-तर्णोति । तृणुते-तर्णुते ॥ ६ ॥ घृणु दीप्तौ ॥ जघर्ण । जघृणे ॥ ७ ॥

अथ द्वावनुदात्तेतौ ॥ वनु याचने ॥ वनुते । ववने । चान्द्रमते परस्मैपदी । वनोति । ववान ॥ ॥ १ ॥ मनु अवबोधने ॥ मनुते ॥ मेने ॥ २ ॥ डुकृञ् करणे ॥ करोति । अत उत्सार्वधातुके । कुरुतः । यण् । न भकुर्छुरामिति न दीर्घः । कुर्वन्ति ॥

२५४७-त और थास् प्रत्यय परे रहते तनादि धातुओंके उत्तर विकल्प करके सिच्का लुक् हो । थास् प्रत्ययके साहचर्य्यसे एकवचन तशब्दका ग्रहण होताहै, इस कारण 'यूयमतनिष्ट, अतानिष्ट' इस स्थलमें सिच्का लुक् न हुआ । "अनुदात्तोपदेश० २४२८" इस सूत्रसे अनुनासिक वर्णका लोप होकर-तङ्में अतत, अतनिष्ट । अतथाः, अतनिष्ठाः ॥ षणु धातु दानमें है, सनोति । सनुते । "ये विभाषा २३१९" इस सूत्रसे यकारादि प्रत्यय परे सन धातुके नकारके स्थानमें विकल्प करके आकार होकर-सायात्, सन्यात् । "जनसन० २५०४" इस सूत्रसे आत्व होकर-असात, असनिष्ट । असाथाः, असनिष्ठाः ॥ क्षणु धातु हिंसामें है । क्षणोति । क्षणुते । "ह्म्यन्त० २२९९" इस सूत्रसे वृद्धि न होकर-अक्षणीत् । अक्षत, अक्षणिष्ट । अक्षथाः, अक्षणिष्ठाः ॥ क्षिणु धातु भी उक्तार्थक है । उ प्रत्यय निमित्तक लघूपध गुण "संज्ञापूर्वको विधिरनित्यः" (संज्ञापूर्वक विधि अनित्य होताहै ।) इस परिभाषाके अनुसार नहीं होगा, यह आत्रेयादि मुनियोंका मत है । अन्यमतसे गुण होहीगा, जैसे-क्षिणोति, क्षेणोति । क्षेणितासि । क्षेणितासे । अक्षेणीत् । अक्षित, अक्षेणिष्ट ॥ ऋणु धातु गतिमें है । ऋणोति, अर्णोति । ऋणुतः, अर्णुतः । ऋण्वन्ति, अर्णुवन्ति । आनर्ण, आनृणे । अर्णितासि । आर्णीत् । आर्त्त, आर्णिष्ट । आर्थाः, आर्णिष्ठाः ॥ तृणु धातु अदनमें है । तृणोति, तर्णोति । तृणुते, तर्णुते ॥ घृणु धातु दीप्तिमें है । जघर्ण । जघृणे ॥

अब दो धातु आत्मनेपदी कहतेहैं । वनु धातु याचनमें है । वनुते । ववने । चान्द्रमतसे यह धातु परस्मैपदी है । वनोति । ववान ॥ मनु धातु अवबोधनमें है । मनुते । मेने ॥ डुकृञ् धातु करणमें है । करोति । "अत उत् सार्वधातुके २४६७" इससे उत्व होकर-कुरुतः । यण् और "न भकुर्छुराम् १६२९" इस सूत्रसे दीर्घ निषेध होकर कुर्वन्ति ॥

२५४८ नित्यं करोतेः । ६ । ४ । १०८ ॥

प्रत्ययोकारस्य नित्यं लोपः स्याद्वमोः परयोः । कुर्वः । कुर्मः । चकर्थ । चकृव । चकृषे । कर्ता । करिष्यति ॥

२५४८-व और म परे रहते कृ धातुके उत्तर प्रत्ययके उकारका नित्य लोप हो । कुर्वः । कुर्मः । चकर्थ । कर्त्ता । चकृव । करिष्यति ॥

२५४९ ये च । ६ । ४ । १०९ ॥

कृञ उलोपः स्याद्यादौ प्रत्यये परे । कुर्यात् । आशिषि । क्रियात् । कृषीष्ट । अकार्षीत् । तनादिभ्य इति लुकोऽभावे ह्रस्वादङ्गादिति सिचो लोपः । अकृत । अकृथाः ॥

२५४९-यकारादि प्रत्यय परे रहते कृ धातुके उकारका लोप हो । कुर्य्यात् । आशीर्लिङ्में-क्रियात् । कृषीष्ट । अकार्षीत् । "तनादिभ्यः० २५४७" इस सूत्रके लुक्के अभावमें "ह्रस्वादङ्गात्० २३६९" इस सूत्रसे सिच्का लोप होताहै, अकृत । अकृथाः ॥

२५५० संपरिभ्यां करोतौ भूषणे । ६ । १ । १३७ ॥

२५५०-भूषण अर्थ गम्यमान होनेपर सम्, और परि उपसर्गसे पर कृ धातुको सुट्का आगम हो ॥

२५५१ समवाये च । ६ । १ । १३८ ॥

संपरिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे । संस्करोति । अलंकरोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । संपूर्वस्य क्वचिदभूषणेऽपि सुट् । संस्कृतं भक्षा इति ज्ञापकात् । परिनिविभ्य इति षः । परिष्करोति ॥ सिवादीनां वा । पर्यष्कार्षीत । पर्यस्कार्षीत् ॥

२५५१-समूह अर्थ गम्यमान होनेपर भी सम्, और परि उपसर्गसे पर कृ धातुको सुट्का आगम हो । संस्करोति, अर्थात् अलंकृत करताहै । संस्कुर्वन्ति, अर्थात् सब एकत्र होकर दलबद्ध होतेहैं । "संस्कृतं भक्षाः" इस ज्ञापकके कारण संपूर्वक कृ धातुको कभी २ भूषणसे भिन्न अर्थमें भी सुट् होताहै । परि, नि और वि पूर्वक कृ धातुके सुट्के सकारको षत्व हो । परिष्करोति । सिवादिके सकारको विकल्प करके षत्व होताहै । (२३५९) पर्यष्कार्षीत् । पर्यस्कार्षीत् ॥

२५५२ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च । ६ । १ । १३९ ॥

उपात्कृञः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोर-

र्थयोः। प्रतियत्नो गुणाधानम्। विकृतमेव वैकृतं विकारः। वाक्यस्याध्याहारः, आकाङ्क्षितैकदेशपूरणम्। उपस्कृता कन्या। अलंकृतेत्यर्थः। उपस्कृता ब्राह्मणाः। समुदिता इत्यर्थः। एधोदकस्योपस्कुरुते। गुणाधानं करोतीत्यर्थः। उपस्कृतं भुङ्क्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते। वाक्याध्याहारेण ब्रूते इत्यर्थः ॥

२५५२-प्रतियत्न, वैकृत और वाक्यके अध्याहार अर्थमें उपपूर्वक कृ धातुको सुट्का आगम हो। चकारसे प्रागुक्त अर्थमें अर्थात् भूषण और समूहअर्थमें भी हो। प्रतियत्न शब्दसे गुणाधान, वैकृत शब्दसे विकार वाक्याध्याहार अर्थात् आकाङ्क्षित एक देशका पूरण करना। उपस्कृता कन्या, अर्थात् अलंकृता। उपस्कृता ब्राह्मणाः, अर्थात् समुदिताः। एधोदकस्योपस्कुरुते, अर्थात् इन्धन जलका गुणाधान करताहै। उपस्कृतं भुङ्क्ते, अर्थात् विकृतभावसे भोजन करताहै। उपस्कृतं ब्रूते, अर्थात् वाक्याऽध्याहारपूर्वक बोलताहै ॥

२५५३ सुट्कात्पूर्वः । ६ । १ । १३५ ॥

अडभ्यासव्यवायेपीत्युक्तम्। संचस्कार। कात्पूर्व इत्यादि भाष्ये प्रत्याख्यातम्। तथा हि। पूर्वं धातुरुपसर्गेण युज्यते। अन्तरङ्गत्वात्सुट्। ततो द्वित्वम्। एवं च ऋतश्च संयोगादेर्गुणः। संचस्करतुः ॥ कृसृभृ० इति सूत्रे ऋतो भारद्वाजस्येतिसूत्रे च कृञोऽसुट इति वक्तव्यम् ॥*॥ तेन ससुट्कात्परस्येट्। संचस्करिथ। संचस्करिव। गुणोर्तीतिसूत्रे नित्यं छन्दसीतिसूत्राच्चित्यमित्यनुवर्तते। नित्यं यः संयोगादिस्तस्येत्यर्थात्सुटि गुणो न। संस्क्रियात्। ऋतश्च संयोगादेरिति लिङ्सिचोर्नेट्। एकाच उपदेशे इति सूत्रादुपदेश इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात्। संस्कृषीष्ट। समस्कृत। समस्कृषाताम् ॥ १ ॥

॥ इति तनादयः ॥

२५५३-सम्, परि और उपसे परे अट् और अभ्यासका व्यवधान रहते भी कृ धातुके ककारके पूर्वमें सुट्का आगम हो। सञ्चस्कार। "कात्पूर्वः" इत्यादि भाष्यमें प्रत्याख्यात हुए हैं, क्योंकि, पूर्वमें धातु उपसर्गके साथ युक्त होताहै, तो अन्तरङ्गत्वके कारण पहले सुट्, पश्चात् द्वित्व होगा। ऐसा होनेपर "ऋतश्च संयोगादेर्गुणः २३८९" इस सूत्रसे ऋकारान्त संयोगादि धातुको गुण होता है। सञ्चस्करतुः। "कृसृभृ० २२९३" इस सूत्रमें और "ऋतो भारद्वाजस्य २२९६" इस सूत्रमें सुट्से रहित कृ धातु ऐसा कहना चाहिये। इस कारण ससुट्क धातुके उत्तर इट् हो। सञ्चस्करिथ। सञ्चस्करिव। "गुणोऽर्ति० २३८०" इस सूत्रमें "नित्यं छन्दसि ३५८७" इस सूत्रसे 'नित्यम्' पदकी अनुवृत्ति होतीहै, इससे नित्य जो संयोगादि, उसको गुण न हो ऐसे अर्थ होनेसे सुट् पर रहते गुण नहीं होता जैसे-संस्क्रियात्। "ऋतश्च संयोगादेः २५२६" इस सूत्रसे लिङ् और सिच्को वैकल्पिक इट् नहीं होता, क्योंकि, "एकाच उपदेशे० २२७६" इस सूत्रसे 'उपदेशे' की अनुवृत्ति कर उपदेशमें 'संयोगादि' ऐसी व्याख्या करनेसे जैसे-संस्कृषीष्ट। समस्कृत। समस्कृषाताम् ॥

॥ इति तनादिप्रकरणम् ॥

अथ क्र्यादयः ९.

डुक्रीञ् द्रव्यविनिमये ॥

डुक्रीञ् धातु द्रव्यविनिमयमें है ॥

२५५४ क्र्यादिभ्यः श्ना । ३ । १ । ८१ ॥

क्रीणाति ॥ ई हल्यघोः। क्रीणीतः। ईत्वात्पूर्वं झेरन्तादेशः परत्वान्नित्यत्वादन्तरङ्गत्वाच्च। एवं झस्याद्भावः। ततः श्नाभ्यस्तयोरित्याल्लोपः। क्रीणन्ति। क्रीणीते। क्रीणाते। क्रीणते। चिक्राय। चिक्रियतुः। चिक्रयिथ-चिक्रेथ। चिक्रियिव। चिक्रियिषे। क्रेता-क्रेष्यति। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट ॥ १ ॥ प्रीञ् तर्पणे कान्तौ च ॥ कान्तिः कामना। प्रीणाति। प्रीणीते ॥ २ ॥ श्रीञ् पाके ॥ ३ ॥ मीञ् हिंसायाम् ॥ हिनुमीना। प्रमीणाति। प्रमीणीतः। मीनातिमिनोतीत्येज्विषये आत्वम्। ममौ। मिम्यतुः। ममिथ-ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त ॥ ४ ॥ षिञ् बन्धने। सिनाति। सिनीते। सिषाय। सिष्ये। सेता ॥ ५ ॥ स्कुञ् आप्रवणे ॥

२५५४-क्र्यादि धातुओंके उत्तर श्ना प्रत्यय हो। सार्वधातुक प्रत्यय परे रहते क्रीणाति। "ई हल्यघोः २४९७" इस सूत्रसे श्ना प्रत्ययके आकारके स्थानमें ईकार हो, क्रीणीतः। ईत्वके पूर्वमें झिके स्थानमें परत्व, नित्यत्व और अन्तरङ्गत्वके कारण "झोऽन्तः" से 'अन्त' आदेश हो, और झके स्थानमें "आत्म० " अत् हो, पश्चात् "श्नाभ्यस्तयोः० २४८३" इस सूत्रसे आकारका लोप हो। क्रीणन्ति। क्रीणीते। क्रीणाते। क्रीणते। चिक्राय। चिक्रियतुः। चिक्रयिथ, चिक्रेथ। चिक्रियिव। चिक्रियिषे। क्रेता, क्रेष्यति। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट ॥

प्रीञ् धातु तर्पण, और कान्ति अर्थात् कामनामें है। प्रीणाति। प्रीणीते ॥ श्रीञ् धातु पाकमें है ॥ मीञ् धातु हिंसामें है। "हिनुमीना २५३०" यह सूत्र यहां स्मरणार्थ है। प्रमीणाति। प्रमीणीतः। "मीनातिमिनोति० २५०८" इस सूत्रसे एचूके विषयमें आत्व हो। ममौ। मिम्यतुः। ममिथ, ममाथ। मिम्ये। माता। मास्यति।

मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ षिञ् धातु बंधनमें है । सिनाति । सिनीते । सिषाय । सिष्ये । सेता ॥

स्कुञ् धातु आप्रवण अर्थात् सम्यक् प्लवनमें है ॥

२५५५ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च । ३ । १ । ८२ ॥

चात् श्ना । स्कुनोति । स्कुनुते । स्कुनाति । स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्कोष्ट ॥ ६ ॥ स्तन्भ्वादयश्चत्वारः सौत्राः । सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ द्वितीयो निष्कोषणार्थः । चतुर्थो धारणार्थ इत्याह । सर्वे परस्मैपदिनः । नलोपः । विष्टभ्नोति-विष्टभ्नाति । अवष्टभ्नोति-अवष्टभ्नाति । अवतष्टम्भ । जृस्तन्भ्वित्यङ् वा । व्यष्टभत्-व्यष्टम्भीत् । स्तुभ्नोति-स्तुभ्नाति ॥

२५५५-स्तन्भु, स्तुन्भु, स्कन्भु, स्कुन्भु और स्कुञ् धातुके उत्तर श्नु और श्ना प्रत्यय हो । स्कुनोति, स्कुनाति । स्कुनुते, स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्कोष्ट । स्तन्भु आदि ४ धातु सौत्र (सूत्रोक्त) हैं । एक आचार्य कहतेहैं कि, सब (४) ही रोधनार्थक हैं । माधवके मतमें प्रथम और तृतीय स्तम्भार्थ हैं, द्वितीय निष्कोषणार्थ और चतुर्थ धारणार्थ है, और सब परस्मैपदी हैं । नकारका लोप, विष्टभ्नोति, विष्टभ्नाति । अवष्टभ्नोति, अवष्टभ्नाति । अवतष्टम्भ । "जृस्तन्भु० २२९१" इस सूत्रसे विकल्प करके अङ्, व्यष्टभत्, व्यष्टम्भीत् । स्तुभ्नोति, स्तुभ्नाति ॥

२५५६ वेः स्कभ्नातेर्नित्यम् । ८ । ३ । ७७ ॥

वेः परस्य स्कभ्नातेः सस्य षः स्यात् । विष्कभ्नोति-विष्कभ्नाति । स्कुभ्नोति-स्कुभ्नाति ॥

२५५६-विपूर्वक स्कन्भ धातुके सकारको षत्व हो, विष्कभ्नोति, विष्कभ्नाति । स्कुभ्नोति, स्कुभ्नाति ॥

२५५७ हलः श्नः शानज्झौ । ३ । १ । ८३ ॥

हलः परस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान-स्तुभान । स्कभान-स्कुभान । पक्षे स्तभ्नुहीत्यादि ॥ युञ् बन्धने ॥ युनाति । युनीते । योता ॥ ७ ॥ क्नूञ् शब्दे ॥ क्नूनाति । क्नूनीते । क्नविता ॥ ८ ॥ द्रूञ् हिंसायाम् ॥ द्रूणाति । द्रूणीते ॥ ९ ॥ पूञ् पवने ॥

२५५७-हि परे रहते हलके परे श्नाके स्थानमें शानच् आदेश हो । स्तभान, स्तुभान । स्कभान, स्कुभान । पक्षमें स्तभ्नुहि इत्यादि पद होंगे । युञ् धातु बंधनमें है । युनाति । युनीते । योता ॥ क्नूञ् धातु शब्दमें है । क्नूनाति । क्नूनीते । क्नविता । द्रूञ् धातु हिंसामें है । द्रूणाति । द्रूणीते ॥ पूञ् धातु पवित्र करनेमें है ॥

२५५८ प्वादीनां ह्रस्वः । ७ । ३ । ८० ॥

शिति परे । पुनाति । पुनीते । पविता ॥ १० ॥ लूञ् छेदने ॥ लुनाति । लुनीते ॥ ११ ॥ स्तॄञ् आच्छादने स्तृणाति । स्तृणीते । तस्तार । तस्तरतुः । स्तरीता-स्तरिता । स्तृणीयात् । स्तृणीते । आशिषि स्तीर्यात् ॥ लिङ्सिचोरिति वेट् ॥ (न लिङि । ७ । २ । ३९) वृत इटो लिङि दीर्घो न स्यात् । स्तरिषीष्ट । उश्चेति किरवम् । स्तीर्षीष्ट । सिचि च परस्मैपदेष्विति न दीर्घः । अस्तारीत् । अस्तारिष्टाम् । अस्तरीष्ट-अस्तरिष्ट । अस्तीर्ष्ट ॥ १२ ॥ कॄञ् हिंसायाम् ॥ कृणाति । कृणीते । चकार । चकरे ॥ १३ ॥ वॄञ् वरणे ॥ वृणाति वृणीते । ववार । ववरे । वरीता-वरिता । आशिषि उदोष्ठ्यपूर्वस्य । वूर्यात् । वरिषीष्ट-वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरीष्ट-अवरिष्ट-अवूर्ष्ट ॥ १४ ॥ धूञ् कम्पने ॥ धुनाति । धुनीते । दुधविथ-दुधोथ । दुधुविव । धविता-धोता । स्तुसुधूञ्भ्य इतीट् । अधावीत् । अधविष्ट-अधोष्ट ॥ १५ ॥

अथ बध्नात्यन्ताः परस्मैपदिनः ॥ शॄ हिंसायाम् ॥ शॄदॄप्रां ह्रस्वो वेति ह्रस्वपक्षे यण् । अन्यदा ऋच्छत्यॄतामिति गुणः । शश्रतुः-शशरतुः । श्रयुकः किर्तीतिनिषेधस्य क्रादिनियमेन बाधः । शशरिव-शश्रिव । शरीता-शरिता । शृणीहि । शीर्यात् । अशारिष्टाम् ॥ १ ॥ पॄ पालनपूरणयोः ॥ पप्रतुः-पपरतुः । आशिषि, पूर्यात् ॥ २ ॥ वॄ वरणे ॥ भरण इत्येके ॥ ३ ॥ भॄ भर्त्सने ॥ भरणेऽप्येके ॥ ४ ॥ मॄ हिंसायाम् ॥ मृणाति । ममार ॥ ५ ॥ दॄ विदारणे ॥ ददरतुः । दद्रुः ॥ ६ ॥ जॄ वयोहानौ ॥ ७ ॥ झॄ इत्येके ॥ ८ ॥ धॄ इत्यन्ये ॥ ९ ॥ नॄ नये ॥ १० ॥ कॄ हिंसायाम् ॥ ११ ॥ ॠ गतौ ॥ ऋणाति । अरांचकार । अरीता-अरिता । आर्णात् । आर्णीताम् । ईर्यात् । आरीत् । आरिष्टाम् ॥ १२ ॥ गॄ शब्दे ॥ १३ ॥ ज्या वयोहानौ ॥ ग्रहिज्या ॥

२५५८-शित् परे रहते प्वादि धातुओंको ह्रस्व हो । पुनाति । पुनीते । पविता ॥ लूञ् धातु छेदनमें है । लुनाति । लुनीते ॥ स्तॄञ् धातु आच्छादनमें है । स्तृणाति । स्तृणीते । तस्तार । तस्तरतुः । स्तरीता, स्तरिता । स्तृणीयात् । स्तृणीते । आशीर्लिङ्में स्तीर्यात् । "लिङ्सिचोः० २५२८" इस सूत्रसे विकल्प करके इट् हो । "न लिङि २५२९" इस सूत्रसे

लिङ् परे रहते वृत (वृङ्, वृञ्, ऋदन्त) धातुके उत्तर इट्को दीर्घ न हो । स्तरिषीष्ट । "उश्च २३६८" इस सूत्रसे किच्च हो । स्तीर्षीष्ट । सिच् परे रहते परस्मैपदमें दीर्घ न हो । (२३९२) अस्तारीत् । अस्तारिष्टाम् । अस्तरीष्ट । अस्तारिष्ट, अस्तीर्ष्ट ॥ कृञ् धातु हिंसामें है । कृणाति । कृणीते । चकार । चकरे ॥ वृञ् धातु वरणमें है । वृणाति । वृणीते । ववार । ववरे । वरीता, वरिता । आशीर्लिङ्में । ओष्ठ्यवर्ण पूर्वक जो ऋकार, तदन्त धातुको उकार हो । (२४९४) वूर्य्यात् । वरिषीष्ट । वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरीष्ट, अवरिष्ट, अवृष्ट ॥ धूञ् धातु कम्पनमें है । धुनाति । धुनीते । दुधविथ, दुधोथ । दुधुविव । धोता, धविता । "स्तुसुधूञ्भ्यः २३८५" इस सूत्रसे धू धातुके उत्तरको इट् हो । अधावीत् । अधविष्ट, अधोष्ट ।

अब बध धातुतक परस्मैपदी हैं ॥ शॄ धातु हिंसामें है । "शॄदॄप्रां ह्रस्वो वा २४९५" इस सूत्रसे विहित ह्रस्वपक्षमें यण् हो । अन्य पक्षमें । "ऋच्छत्यॄताम् २३८३" इस सूत्रसे गुण हो । शश्रतुः । शशरतुः । "श्र्युकः किति २३८१" इस निषेध सूत्रका क्र्यादि नियमसे बाध होगा । शशरिव, शश्रिव । शरीता, शरिता । शृणीहि । शीर्य्यात् । अशारिष्टाम् । पॄ धातु पालन और पूरणमें है । पप्रतुः, पपरतुः । आशीर्लिङ्में-पूर्य्यात् ॥ वॄ धातु वरणमें है । कोई २ कहतेहैं कि, यह भरणार्थक है । भॄ धातु भर्त्सनमें है । किसीके मतमें भरणार्थक है ॥ मॄ धातु हिंसामें है । मृणाति । ममार ॥ दॄ धातु विदारणमें है । ददरतुः । दद्रुः ॥ जॄ, झॄ और धॄ धातु वयोहानिमें है ॥ नॄ धातु नयमें है । कॄ धातु हिंसामें है । ॠ धातु गतिमें है । ऋणाति । अराञ्चकार । अरीता, अरिता । आर्णीत् । आर्णीताम् । ईर्य्यात् । आरीत् । आरिष्टाम् ॥ गॄ धातु शब्दमें है । ज्या धातु वयोहानिमें है । "ग्रहिज्या० २४१२" यह सूत्र यहां स्मरणार्थहै ॥

२५५९ हलः । ६ । ४ । २ ॥

अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात् । इति दीर्घे कृते । प्वादीनां ह्रस्वः । जिनाति । जिज्यौ । जिज्यतुः ॥ १४ ॥ री गतिरेषणयोः ॥ रेषणं वृकशब्दः ॥ १५ ॥ ली श्लेषणे ॥ विभाषा लीयतेरित्येज्विषये आत्वं वा । ललौ-लिलाय । लाता-लेता ॥ १६ ॥ व्ली वरणे ॥ व्लिनाति ॥ १७ ॥ प्ली गतौ ॥ १८ ॥ वृत् ॥ ल्वादयो वृत्ताः । प्वादयोऽपीत्येके ॥ व्री वरणे ॥ १९ ॥ भ्री भये ॥ भरण इत्येके ॥ २० ॥ क्षीष् हिंसायाम् ॥ एषां त्रयाणां ह्रस्वः । केचिन्मते तु न ॥ २१ ॥ ज्ञा अवबोधने ॥ ज्ञाजनोर्जा । जानाति । दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः ॥ २२ ॥ बन्ध बन्धने । बध्नाति । बबन्धिथ-बबन्ध । बन्धा । बन्धारौ । भन्त्स्यति । बधान । अभान्त्सीत् । पूर्वत्रासिद्धमिति भष्भावात्पूर्वं झलो झलीति सिज्लोपः । प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न, प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात् । अबान्द्धाम् । अभान्त्सुः ॥ २३ ॥ वृङ् सम्भक्तौ । वृणीते । वव्रे । ववृषे । ववृढ्वे । वरीता-वरिता । अवरीष्ट-अवरिष्ट-अवृत ॥ १ ॥ श्रन्थ विमोचनप्रतिहर्षयोः ॥ इतः परस्मैपदिनः ॥ श्रथ्नाति । श्रन्थिग्रन्थीत्यादिना कित्त्वपक्षे एत्वाभ्यासलोपावप्यत्र वक्तव्यौ, इति हरदत्तादयः । श्रेथतुः । श्रेथुः । इदं कित्त्वं पितामपीति सुधाकरमते । श्रेथिथ । अस्मिन्नपि पक्षे णलि । शश्राथ । उत्तमे तु शश्राथ-शश्रथेति माधवः । तत्र मूलं मृग्यम् ॥ १ ॥ मन्थ विलोडने ॥ २ ॥ श्रन्थ ग्रन्थ सन्दर्भे ॥ अर्थभेदात् श्रन्थेः पुनः पाठः रूपं तूक्तम् ॥ ४ ॥ कुन्थ संश्लेषणे । संक्लेश इत्येके । कुथ्नाति चुकुन्थ ॥ ५ ॥ कुथेति दुर्गः । चुकोथ ॥ ६ ॥ मृद क्षोदे ॥ मृद्नाति । ममर्द ॥ ७ ॥ मृड च ॥ अयं सुखेऽपि । मृडत्वम् । मृड्णाति ॥ ८ ॥ गुध रोषे ॥ गुध्नाति ॥ ९ ॥ कुष निष्कर्षे ॥ कुष्णाति । कोषिता ॥

२५५९-अङ्गावयवीभूत हल्के परे जो सम्प्रसारण तदन्त अङ्गको दीर्घ हो, इससे दीर्घ होनेपर, "प्वादीनां ह्रस्वः २५५८" इस सूत्रसे ह्रस्व होगा । जिनाति । जिज्यौ । जिज्यतुः ॥ री धातु गति और रेषणमें है । रेषण अर्थात् वृकके शब्दमें ॥ ली धातु श्लेषणमें है । "विभाषा लीयतेः २५०९" इस सूत्रसे एच्विषयमें विकल्प करके आत्व हो । ललौ । लिलाय । लाता, लेता ॥ व्ली धातु वरणमें है । व्लिनाति । प्ली धातु गतिमें है । ल्वादि धातु सम्पूर्ण हुए । कोई २ कहतेहैं कि, प्वादि धातु भी सम्पूर्ण हुए ।

व्री धातु वरणमें है । भ्री धातु भयमें है । किसी २ के मतमें यह भरणमें है ॥ क्षीष् धातु हिंसामें है, इन तीन धातुओंको ह्रस्व हो, किसीके मतमें ह्रस्व नहीं होगा ॥ ज्ञा धातु अवबोधनमें है । "ज्ञा जनोर्जा २५११" इस सूत्रसे ज्ञा धातुके स्थानमें 'जा' आदेश हो । जानाति । सूत्रमें दीर्घ निर्देशके कारण ह्रस्व नहीं होगा ॥ बंध धातु बंधनमें है । बध्नाति । बबन्धिथ, बबन्ध । बन्धा । बन्धारौ । भन्त्स्यति । बधान । अभान्त्सीत् । "पूर्वत्रासिद्धम् १२" इस सूत्रसे भष्भावके पूर्वमें "झलो झलि २२८१" इस सूत्रसे सिच्का लोप होगा । प्रत्यय लक्षणसे सकारादि प्रत्ययका आश्रय करके भष्भाव नहीं होगा, क्योंकि प्रत्ययलक्षणके प्रति सिच्के लोपको असिद्धत्व है । अबान्द्धाम् । अभान्त्सुः ॥ वृङ् धातु सम्भक्तिमें है । वृणीते । वव्रे । ववृषे । ववृढ्वे । वरीता, वरिता । अवरीष्ट, अवरिष्ट, अवृत ॥ श्रन्थ धातु विमोचन और प्रतिहर्षमें है । यहांसे परस्मैपदी हैं । श्रथ्नाति । हरदत्ता-

दिके मतमें "श्रन्थिग्रन्थि०" से कित्त्वपक्षमें एत्व और अभ्यासका लोप भी होगा । श्रेथतुः । श्रेथुः । सुधाकरके मतमें इस पित्संज्ञक होनेपर भी इसकी कित्संज्ञा हो । श्रेथिथ । णल् परे–शश्राथ । उत्तम पुरुषमें शश्राथ–शश्रथ। यह माधवका मत है । इस विषयमें मूल अनुसंधेय है॥ मन्थ धातु विलोडनमें है ॥ श्रन्थ और ग्रन्थ धातु सन्दर्भमें हैं । अर्थभेदके कारण श्रन्थ धातुका पुनः पाठ हुआ, किन्तु इसका रूप पूर्वमें कह दिया है । कुन्थ धातु संश्लेषणमें है, किसीके मतमें संक्लेशमें है । कुथ्नाति । चुकुन्थ । दुर्गके मतमें यह 'कुथ' धातु है । चुकोथ ॥ मृद धातु क्षोदमें है । मृद्नाति । ममर्द ॥ मृड धातु मर्दनमें है । और यह सुखमें भी है । ष्टुत्व हो । मृड्णाति॥गुध धातु रोषमें है । गुध्नाति ॥ कुष धातु निष्कोशमें है । कुष्णाति । कोषिता ॥

२५६० निरः कुषः । ७ । २ । ४६ ॥

निरः परात्कुषो वलादेरार्धधातुकस्य इड्वा स्यात् । निष्कोषिता–निष्कोष्टा । निरकोषीत्–निरकुक्षत् ॥ १० ॥ क्षुभ सञ्चलने ॥ (क्षुभ्नादिषु च । ८ । ४ । ३९ ॥) क्षुभ्नाति । क्षुभ्नीतः । क्षोभिता । क्षुभाण॥११॥ णभ तुभ हिंसायाम् ॥ नभ्नाति । तुभ्नाति । नभते--तोभते इति शपि । नभ्यति–तुभ्यतीति श्यनि॥ १३॥क्लिशू विबाधने॥ शादिति श्चुत्वनिषेधः। क्लिश्नाति । क्लेशिता–क्लेष्टा। अक्लेशीत्–अक्लिक्षत् ॥ १४ ॥ अश भोजने ॥ अश्नाति । आश ॥ १५ ॥ उध्रस उञ्छे ॥ इकार इत् । ध्रस्नाति ॥ १६ ॥ उकारो धात्ववयव इत्येके । उध्रसांचकार ॥ १७ ॥ इष आभीक्ष्ण्ये ॥ पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम् । इष्णाति । तीषसहेत्यत्र सहिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः । एषिता । वस्तुतस्तु इष्णातेरपि इड्विकल्प उचितः । तथा च वार्तिकम् ॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेध इति ॥ * ॥ १८ ॥ विष विप्रयोगे ॥ विष्णाति । वेष्टा ॥ १९ ॥ प्रुष प्लुष स्नेहनसेवनपूरणेषु ॥ प्रुष्णाति । प्लुष्णाति ॥२१॥ पुष पुष्टौ॥ पोषिता ॥२२॥ मुषी स्तेये॥ मोषिता ॥ २३ ॥ खच भूतप्रादुर्भावे ॥ भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । खश्नाति ॥ वान्तोयमित्येके ॥

२५६०–निर्पूर्वक कुष धातुसे पर वलादि आर्धधातुकके स्थानमें विकल्प करके इट् हो–निष्कोषिता, निष्कोष्टा । निरकोषीत्, निरकुक्षत् ॥ क्षुभ धातु संचलनमें है । "क्षुभ्नादिषु च ७९२" इस सूत्रसे णत्व न हो । क्षुभ्नाति । क्षुभ्नीतः । क्षोभिता । क्षुभाण ॥ णभ और तुभ धातु हिंसामें हैं । नभ्नाति । तुभ्नाति । शप् परे रहते–नभते । तोभते । श्यन् परे रहते–नभ्यति । तुभ्यति । क्लिशू धातु विबाधनमें है । "शात् ११२" इस सूत्रसे श्चुत्व न होगा। क्लिश्नाति । क्लेशिता, क्लेष्टा । अक्लेशीत्, अक्लिक्षत्॥ अश धातु भोजनमें है। अश्नाति।आश॥उध्रस् धातु उञ्छमें है । उकारकी इत्संज्ञा हुई । ध्रस्नाति । कोई२ कहतेहैं कि, उकार धातुका अवयव है । उध्रसाञ्चकार ॥ इष धातु आभीक्ष्ण्यमें है । आभीक्ष्ण्य शब्दसे पौनःपुन्य अथवा भृशार्थ समझना । इष्णाति । "तीषसह०२३४० " इस सूत्रसे सह शब्दके साहचर्य्यसे अकारविकरण तुदादिगणीय इष धातुका ही ग्रहण हुआ है, इष्यति अथवा इष्णाति-पद वाले इष धातुका ग्रहण नहीं है । एषिता । वस्तुतः (इष्णाति) इष धातुके परको विकल्प करके इट् होना उचित है, तथा च वार्तिक–"इषेस्तकारे श्यन् प्रत्ययात् प्रतिषेधः" अर्थात् श्यन् प्रत्ययवाले इष धातुसे पर तकारादि आर्धधातुकके इट्का प्रतिषेध है। विष धातु विप्रयोगमें है । विष्णाति । वेष्टा ॥ प्रुष और प्लुष धातु स्नेहन, सेवन और पूरणमें हैं–प्रुष्णाति । प्लुष्णाति ॥ पुष धातु पुष्टिमें है । पोषिता ॥ मुष धातु स्तेय (चोरी) में है । मोषिता ॥ खच धातु भूतप्रादुर्भावमें है–भूतप्रादुर्भाव शब्दसे अतिक्रान्तोत्पत्ति जाननी । खच्नाति । कोई २ कहतेहैं कि, यह धातु वकारान्त है ॥

२५६१ च्छ्वोः शूडनुनासिके च । ६ । ४ । १९ ॥

सतुक्कस्य छस्य वस्य च क्रमात् श ऊठ् एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति । खौनाति । चखाव । खविता । शानचः परत्वादूठि कृते हलन्तत्वाभावान्न शानच् । खौनीहि ॥२४॥ हिठ च ॥ ष्टुत्वम् । हिठ्णाति ॥ २५ ॥ ग्रह उपादाने ॥ स्वरितेत् । ग्रहिज्या–। गृह्णाति । गृह्णीते ॥

२५६१–अनुनासिक, क्वि और झलादि कित्, ङित् प्रत्यय परे रहते सतुक छ, और वके स्थानमें क्रमसे श और ऊठ् आदेश हो । खौनाति । चखाव । खविता । शानच्से परत्वके कारण ऊठ् होनेपर हलन्तके अभावके कारण शानच् नहीं होगा । खौनीहि ॥ हिठ धातु पूर्वोक्त अर्थमें है । ष्टुत्व होताहै । हिठ्णाति ॥ ग्रह धातु उपादानमें है । यह उभयपदी है । "ग्रहिज्या०२४१२" इस सूत्रसे ग्रह धातुको सम्प्रसारण हो । गृह्णाति । गृह्णीते ॥

२५६२ ग्रहोऽलिटि दीर्घः । ७।२।३७ ॥

एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यात् न तु लिटि।ग्रहीता।लिटि तु–जग्रहिथ।गृह्यात्।ग्रहीषीष्ट। ह्यन्तेति न वृद्धिः । अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत ॥ १ ॥

॥ इति क्र्यादयः ॥

२५६२-एकाच् ग्रह धातुके उत्तर विहित प्रत्ययके इट्को दीर्घ हो। लिट् परे रहते नहीं हो, लिट्में न हो ग्रहीता, लिट्में तो 'जग्रहिथ' ऐसा होगा। गृह्यात्। ग्रहीषीष्ट। "ह्म्यन्त० २२९९" इस सूत्रसे वृद्धि नहीं होगी-अग्रहीत्। अग्रहीशाम्। अग्रहीष्ट। अग्रहीषाताम्। अग्रहीषत॥

॥ इति क्र्यादिप्रकारणम्॥

अथ चुरादयः १०.

चुर स्तेये॥

चुर धातु स्तेयमें है।

२५६३ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्। ३। १। २५॥

एभ्यो णिच् स्यात्। चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धं तेषामिह ग्रहणं प्रपञ्चार्थम्। चुरादिभ्यस्तु स्वार्थे। पुगन्तेति गुणः। सनाद्यन्ता इति धातुत्वम्। तिप्शबादिगुणायादेशौ। चोरयति॥

२५६३-सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोम, त्वच, वर्म, वर्ण, चूर्ण और चुरादि धातुओंके उत्तर स्वार्थमें णिच् हो। चूर्णान्त धातुओंके उत्तर "प्रातिपदिकात् धात्वर्थे" इस गण सूत्रसे णिच् होसकताहै तथापि उनका ग्रहण इस स्थलमें विस्तारार्थ है। चुरादिगणीय धातुओंके उत्तर तो स्वार्थमें णिच् हो। "पुगन्त० २१८९" इस सूत्रसे गुण हो "सनाद्यन्ताः० २३०४" इस सूत्रसे णिजन्तकी धातु संज्ञा हो। इस कारण उसके उत्तर तिप्, शप्, गुण, आय आदेश इत्यादि समस्त ही होंगे। चोरयति॥

२५६४ णिचश्च। १। ३। ७४॥

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट। णिश्रीति चङ्। णौ चङीति ह्रस्वः। द्वित्वम्। हलादिः शेषः। दीर्घो लघोरित्यभ्यासदीर्घः। अचूचुरत्। अचूचुरत॥१॥ चिति स्मृत्याम्॥ चिन्तयति। अचिचिन्तत्। चिन्तेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम्। तेन चिन्त्यात्--चिन्त्यते इत्यादौ नलोपो न। चिन्तति। चिन्तेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके अत एकहल इत्यत्र वृत्तिकृता जगाण जगणतुरित्युदाहृतत्वात्। विशेषापेक्षमित्यपरे, अत एवाधृषाद्वेत्यस्य न वैयर्थ्यम्॥ २॥ यत्रि संकोचे॥ यन्त्रयति। यन्त्रेति पठितुं शक्यम्। यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं कुद्रितन्त्रिमन्त्रिषु॥ ३॥ स्फुडि परिहासे॥ स्फुण्डयति। इदित्करणात्-स्फुण्डति॥ स्फुटीति पाठान्तरम्। स्फुण्टयति॥ ४॥ लक्ष दर्शनांकनयोः॥ ५॥ कुद्रि अनृतभाषणे॥ कुन्द्रयति॥ ६॥ लड उपसेवायाम्॥ लाडयति॥ ७॥ मिदि स्नेहने॥ मिन्दयति। मिन्दति॥ ८॥ ओलडि उत्क्षेपणे॥ ओलण्डयति। ओलण्डति॥ ९॥ ओकार इदित्येके। लण्डयति। लण्डति॥१०॥ उकारादिरयमित्यन्ये। उलण्डयति॥ ११॥ जल अपवारणे॥ १२॥ लज इत्येके॥ १३॥ पीड अवगाहने। पीडयति॥

२५६४-क्रियाफल कर्तृगामी होनेपर णिजन्त धातुके उत्तर आत्मनेपद हो। चोरयते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट "णिश्रि० २३१२" इस सूत्रसे चङ् हो। "णौच०२३१४" इस सूत्रसे ह्रस्व हो। द्वित्व हो। "हलादिः शेषः २१७९" दीर्घो लघोः २३१८" इस सूत्रसे दीर्घ हो। अचूचुरत्। अचूचुरत॥ चिति धातु स्मृतिमें है। चिन्तयति। अचिचिन्तत्। 'चिन्त' ऐसा पठितव्य होनेपर इदित्करण णिच्के पाक्षिकत्वका ज्ञापक है। अर्थात् णिच्के विकल्प पक्षमें इसकी इत्संज्ञा चरितार्थ होगी। इसी कारण 'चिन्त्यात्, चिन्त्यते' इत्यादि स्थलमें नकारका लोप नहीं होता। चिन्तति। चिन्तेत्। कोई २ कहतेहैं कि, यह ज्ञापक सामान्यापेक्ष है, क्योंकि, "अत एकहल० २२६०" इस सूत्रमें वृत्तिकारने 'जगाण। जगणतुः' इत्यादि उदाहरण दियाहै। 'यह विशेषापेक्ष है' ऐसा भी कोई २ कहते हैं, अत एव "आधृषाद्वा" इस गणसूत्रकी व्यर्थता नहीं हुई॥ यत्रि धातु संकोचमें है। यंत्रयति। 'यन्त्र' ऐसा पाठ भी किया जासकताहै। जो तो माधवाचार्य्यने इदित्करणसे 'यंत्रति' ऐसा कहा है, वह चिन्त्य है। कुद्रि, तत्रि और मत्रि धातुमें भी इसी प्रकार है। स्फुडि धातु परिहासमें है। स्फुण्डयति। इकार इत् करनेसे 'स्फुडति' ऐसा होगा। 'स्फुटि' ऐसा पाठान्तर भी है, जैसे-स्फुण्टयति॥ लक्ष धातु दर्शन और अंकनमें है॥ कुद्रि धातु मिथ्या कथनमें है। कुन्द्रयति॥ लड धातु उपसेवामें है। लाडयति॥ मिदि धातु स्नेहनमें है। मिन्दयति। मिन्दति॥ ओ लडि धातु उत्क्षेपणमें है। ओलण्डयति। ओलण्डति। कोई २ कहतेहैं कि, इस धातुका ओकार इत्संज्ञक होताहै, ऐसा होनेपर-लण्डयति, लण्डति, ऐसा होगा। कोई २ कहतेहैं कि, यह धातु उकारादि है। उलण्डयति॥ जल धातु अपवारणमें है। कोई २ कहते हैं, कि 'लज' धातु है॥ पीड धातु अवगाहनमें है। पीडयति॥

२५६५ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्। ७। ४। ३॥

एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। अपीपिडत्-अपिपीडत्॥१४॥ नट अवस्यन्दने।

अवस्यन्दनं नाटयम् ॥ १५ ॥ श्रथ प्रयत्ने प्रस्थाने इत्येके ॥ १६ ॥ बध संयमने ॥ बाधयति । बन्धेति चान्द्रः ॥ १७ ॥ पॄ पूरणे ॥ पारयति । दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गं तद्धि सङ्कत्वाय । एवं पृणातिपिपर्तिभ्यां परितेत्यादि- सिद्धावपि परति परत इत्यादिसिद्धिः फलम् ॥ ॥ १८ ॥ ऊर्ज बलप्राणनयोः ॥ १९ ॥ पक्ष परिग्रहे ॥ २० ॥ वर्ण चूर्ण प्रेरणे ॥ २१ ॥ वर्ण वर्णन इत्येके ॥ २२ ॥ प्रथ प्रख्याने ॥ प्राथयति । नान्ये मितोऽहेताविति वक्ष्यमाणत्वान्नास्य मित्त्वम् ॥

२५६५–भ्राज, भास, भाष, दीप, जीव, मील और पीड धातुकी उपधाको विकल्प करके ह्रस्व हो, चङ् जिससे परे हो ऐसी णि परे रहते । अपीपिडत् । अपिपीडत् ॥ नट धातु अवस्यन्दनमें है । अवस्यन्दन शब्दसे नाटय समझना ॥ श्रथ धातु प्रयत्नमें है । किसीके मतमें प्रस्थानार्थमें है । बध धातु संयमनमें है । बाधयति । चान्द्र मतमें यह 'बंध' धातु है ॥ पॄ धातु पूरणमें है । पारयति । दीर्घका उच्चारण णिच्के पाक्षिकत्वमें लिङ्ग और इट्के निमित्त है । इस प्रकार पृणाति (क्रैयादिक पॄ), और पिपर्त्ति (जौहोत्यादिक पॄ) से 'परिता' इत्यादि रूपोंकी सिद्धि होनेपर भी 'पारयति, परति, परतः' इत्यादि रूपोंकी सिद्धि फल है ॥ ऊर्ज धातु बल और प्राणनमें है ॥ पक्ष धातु परिग्रहमें है ॥ वर्ण और चूर्ण धातु प्रेरणमें हैं । किसीके मतमें वर्ण धातु वर्णनामें है ॥ प्रथ धातु प्रख्यानमें है । प्राथयति । "नान्ये मितोऽहेतौ" अर्थात् स्वार्थिक णिच् परे रहते ज्ञपादि पांच धातुओंको छोडकर अन्य धातु मित् नहीं होते, इस वक्ष्यमाण गणसूत्रसे यहां मित्त्व नहीं होगा ॥

२५६६ अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् । ७ । ४ । ९५ ॥

एषामभ्यासस्य अकारोन्तादेशः स्याच्चङ्परे णौ । इत्वापवादः । अपप्रथत् ॥ २३ ॥ पृथ प्रक्षेपे ॥ पर्थयति ॥

२५६६–चङ् परक णि परे रहते स्मॄ, दॄ, त्वर, प्रथ, म्रद, स्तॄ, और स्पश धातुके अभ्यासके स्थानमें अकार अन्तादेश हो । यह अकार इत्वका अपवाद है । अपप्रथत् । पृथ धातु प्रक्षेपमें है । पर्थयति ॥

२५६७ उर्ऋत् । ७ । ४ । ७ ॥

उपधाया ऋवर्णस्य स्थाने ऋत्स्याद्वा चङ्परे णौ । इररारामपवादः । अपीपृथत्–अपपर्थत् ॥ २४ ॥ षम्ब सम्ब पथ इत्येके । पाथयति ॥ २५ ॥ षम्ब सम्ब धने । सम्बयति । अससम्बत् ॥ २६ ॥ शम्ब च ॥ अशशम्बत् ॥ २७ ॥ साम्ब इत्येके ॥ २८ ॥ भक्ष अदने ॥ २९ ॥ कुट्ट छेदनभर्त्सनयोः । पूरण इत्येके । कुट्टयति ॥ ३० ॥ पुट्ट चुट्ट अल्पीभावे ॥ ३२ ॥ अट्ट षुट्ट अनादरे ॥ अट्टयति । अयं दोपधः । ष्टुत्वस्यासिद्धत्वान्नन्द्रा इति निषेधः । आट्टिटत् ॥ ३४ ॥ लुण्ठ स्तेये ॥ लुण्ठयति । लुण्ठतीति । लुठ स्तेये इति भौवादिकस्य ॥ ३५ ॥ शठ श्वठ असंस्कारगत्योः ॥ ३७ ॥ श्वठिइत्येके ॥ ३८ ॥ तुजि पिजि हिंसाबलादाननिकेतनेषु ॥ तुञ्जयति । पिञ्जयति । इदित्करणात् तुञ्जति पिञ्जति ॥ ॥ ४० ॥ तुज पिजेति केचित् ॥ ४२ ॥ लजि लुजि इत्येके ॥ ४४ ॥ पिस गतौ ॥ पेसयति । पेसतीति तु शपि गतम् ॥ ४५ ॥ षान्त्व सामप्रयोगे ॥ ४६ ॥ श्वल्क वल्क परिभाषणे ॥ ४८ ॥ ष्णिह स्नेहने ॥ स्फिट इत्येके ॥ ५० ॥ स्मिट अनादरे ॥ अषोपदेशत्वान्न षः । असिस्मिटत् ॥ ॥ ५१ ॥ ष्मिङ् अनादर इत्येके । ङित्त्वस्याव- यवेऽचरितार्थत्वाण्णिजन्तात्तङ् । स्माययते ॥ ॥ ५२ ॥ श्लिष श्लेषणे ॥ ५३ ॥ पथि गतौ ॥ पन्थयति । पन्थति ॥ ५४ ॥ पिच्छ कुट्टने ॥ ॥ ५५ ॥ छदि संवरणे ॥ छन्दयति । छन्दति ॥ ॥ ५६ ॥ श्रण दाने ॥ प्रायेणायं विपूर्वः । विश्राणयति ॥ ५७ ॥ तड आघाते ॥ ताडयति ॥ ५८ ॥ खड खडि कडि भेदने ॥ खाडयति । खण्डयति । कण्डयति ॥ ६१ ॥ कुडि रक्षणे ॥ ६२ ॥ गुडि वेष्टने ॥ रक्षण इत्येके ॥ ६३ ॥ कुठि इत्यन्ये ॥ अवकुण्ठयति ॥ अवकुण्ठति । गुठि इत्यपरे ॥ ६५ ॥ खुडि खंडने ॥ ६६ ॥ वटि विभाजने ॥ वडि इत्येके ॥ ॥ ६८ ॥ मडि भूषायां हर्षे च ॥ ६९ ॥ भडि कल्याणे ॥ ७० ॥ छर्द वमने ॥ ७१ ॥ पुस्त बुस्त आदरानादरयोः ॥ ७३ ॥ चुद संचोदने ॥ ७४ ॥ नक्क धक्क नाशने ॥ णोपदेशलक्षणे पर्युदस्तोयम् । प्रनक्कयति ॥ ७६ ॥ चक्क चुक्क व्यथने ॥ ७८ ॥ क्षल शौचकर्मणि ॥ ७९ ॥ तल प्रतिष्ठायाम् ॥ ८० ॥ तुल उन्माने ॥ तोलयति । तोलयामास । अतूतुलत् । कथं तुलयति तुलना इत्यादि । अतुलोपमाभ्यामिति निपातनादङन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् ॥ ८१ ॥ दुल उत्क्षेपे ॥ ८२ ॥ पुल महत्त्वे ॥ ८३ ॥ चुल समुच्छ्राये ॥ ८४ ॥ मूल रोहणे ॥ ८५ ॥ कल बिल क्षेपे ॥ ८७ ॥ बिल भेदने ॥ ८८ ॥ तिल स्नेहने ॥ ८९ ॥ चल भृतौ ॥ ॥ ९० ॥ पाल रक्षणे ॥ ९१ ॥ लूष हिंसायाम् ॥ ९२ शुल्ब माने ॥ ९३ ॥ शूर्प च ॥ ९४ ॥ चुट छेदने ॥ ९५ ॥ मुट सञ्चूर्णने ॥ ९६ ॥ पडि पसि नाशने ॥ पण्डयति । पण्डति । पंसयति ।

पंसति ॥ ९८ ॥ व्रज मार्ग संस्कारगत्योः ॥ ॥ १०० ॥ शुल्क अतिस्पर्शने ॥ १०१ ॥ चपि गत्याम् ॥ चम्पयति । चम्पति ॥ १०२ ॥ क्षपि क्षान्त्याम् ॥ क्षम्पयति । क्षम्पति ॥ १०३ ॥ छजि कृच्छ्रजीवने ॥ १०४ ॥ श्वर्त गत्याम् ॥ ॥ १०५ ॥ श्वभ्र च ॥ १०६ ॥ ज्ञप मिच्च । अयं ज्ञाने ज्ञापने च वर्तते ॥

२५६७–चङ् परक णि परे रहते धातुके उपधाभूत ऋवर्णके स्थानमें विकल्प करके ऋकार हो, यह इर्, अर् और आरका अपवादक है । अपीपृथत्, अपपर्थत् । किसीके मतसे पथ धातु है । पाथयति ॥ षम्ब धातु संबन्धमें है । सम्बयति । अससम्बत् ॥ शम्ब धातु भी उक्तार्थक है । अशशम्बत् । किसीके मतसे साम्ब धातु है ॥ भक्ष धातु भक्षणमें है । कुट्ट धातु छेदन और भर्त्सन और किसीके मतसे पूरणार्थमें है । कुट्टयति ॥ पुट्ट और चुट्ट धातु अल्पीभावमें हैं ॥ अट्ट और षुट्ट धातु अनादरमें हैं अट्टयति । यह धातु दकारोपध है । ष्टुत्वके असिद्धत्वके कारण "नन्द्राः० २४४६" इस सूत्रसे दकारको द्वित्व नहीं होगा, आट्टिटत् ॥ लुण्ठ धातु चोरी करनेमें है । लुण्ठयति । 'लुण्ठति' यह 'लुठि स्तेये' इस भ्वादिगणीय धातुका रूप है ॥ शठ और श्वठ धातु असंस्कार और गतिमें हैं । कोई २ कहतेहैं श्वठि धातु है ॥ तुजि और पिजि धातु हिंसा, बल, आदान, और निकेतनार्थमें हैं । तुञ्जयति । पिञ्जयति । इदित् करणके कारण–तुञ्जति । पिञ्जति । कोई २ कहतेहैं तुज और पिज धातु हैं । कोई २ कहतेहैं लजि और लुजि धातु हैं ॥ पिस धातु गतिमें है । पेसयति । 'पेसति' यह तो ज्ञप परे कहा गया है ॥ षान्त्व धातु सामप्रयोगमें है ॥ श्वल्क और वल्क धातु परिभाषणमें हैं ॥ ष्णिह धातु स्नेहनमें है ॥ कोई स्फिट् धातु कहते हैं ॥ स्मिट् धातु अनादरमें है । अषोपदेशत्वके कारण षत्व नहीं होगा, असिस्मिटत् ॥ स्मिङ् धातु अनादरमें है । ङित्त्वके णिजन्तके अवयव ष्मिङ् धातुमें अचरितार्थत्वके कारण णिजन्तसे तङ् होगा, स्माययते ॥ श्लिष धातु श्लेषणमें है ॥ पथि धातु गतिमें है । पन्थयति । पन्थति ॥ पिच्छ धातु कुट्टनमें है ॥ छदि धातु संवरणमें है । छन्दयति । छन्दति ॥ श्रण धातु दानमें है, यह धातु प्रायः विपूर्वक है । विश्राणयति ॥ तड धातु आघातमें है । ताडयति ॥ खड, खडि और कडि धातु भेदनमें हैं । खाडयति । खंडयति । खण्डति । कण्डयति । कण्डति ॥ कुडि धातु रक्षा करनेमें है ॥ गुडि धातु वेष्टनमें है और किसीके मतसे रक्षणमें है । कोई २ इस धातुके स्थानमें कुठि धातु पढतेहैं । अवकुण्ठयति । अवकुण्ठति । कोई २ गुठि धातुका पाठ करतेहैं ॥ खुडि धातु खंडनमें है । वटि धातु विभाजनमें है । किसीके मतसे वडि धातु है ॥ मडि धातु भूषा और हर्षमें है ॥ भंडि धातु कल्याणमें है ॥ छर्द धातु वमनमें है ॥ पुस्त और बुस्त धातु आदर और अनादरमें हैं ॥ चुद धातु सम्यक् प्रकारसे प्रेरणमें है ॥ नक्क और धक्क धातु नाशमें हैं । नक्क धातु णोपदेशके लक्षणमें पर्युदस्त है ॥ इससे णत्व न होगा, प्रनक्कयति ॥ चक्क और चुक्क धातु व्यथनमें हैं ॥ क्षल धातु शौचकर्ममें है ॥ तल धातु प्रतिष्ठामें है ॥ तुल धातु परिमाणमें है । तोलयति । अतूतुलत् । गुणविधायक शास्त्रके रहते 'तुलयति तुलना' इत्यादि प्रयोग किस प्रकार सिद्ध हुए ? तो "अतुलोपमाभ्याम् ६३०" इस सूत्रमें निपातनसे अदन्त तुला शब्दकी सिद्धि होनेपर उसके उत्तर णिच् है ॥ दुल धातु उत्क्षेपक्षणमें है ॥ पुल धातु महत्त्वमें है ॥ चुल धातु समुच्छ्रायमें है ॥ मूल धातु रोहणमें है ॥ कल और विल धातु क्षेपणमें हैं ॥ बिल धातु भेदनमें है ॥ तिल धातु स्नेह करनेमें है । चल धातु भृतिमें है ॥ पाल धातु रक्षणमें है ॥ लूष धातु हिंसामें है ॥ शुल्व और शूर्प धातु मानमें हैं ॥ चुट धातु छेदनमें है ॥ मुट धातु संचूर्णनमें है ॥ पडि और पसि धातु नाशनमें हैं । पण्डयति । पण्डति । पंसयति । पंसति ॥ व्रज धातु और मार्ग धातु संस्कारमें और गतिमें हैं ॥ शुल्क धातु अतिस्पर्शनमें है ॥ चपि धातु गतिमें है । चम्पयति । चम्पति ॥ क्षपि धातु क्षान्तिमें है ॥ क्षम्पयति । क्षम्पति ॥ लज धातु कष्टसे जीवन धारणमें है ॥ श्वर्त और श्वभ्र धातु गतिमें है ॥ ज्ञप धातु मित् हो । इस धातुका ज्ञान और ज्ञापनार्थ जानना ॥

२५६८ मितां ह्रस्वः । ६ । ४ । ९२ ॥

मितामुपधाया ह्रस्वः स्याण्णौ परे । ज्ञपयति ॥ ॥ १०७ ॥ यम च परिवेषणे ॥ चान्मित् । परिवेषणमिह वेष्टनम् । न तु भोजना नापि वेष्टना । यमयति चन्द्रम् । परिवेष्टत इत्यर्थः ॥ १०८ ॥ चह परिकल्पने ॥ चहयति । अचीचहत् । कथादौ वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वादीर्घसन्वद्भावौ न । अचचहत् ॥ चप इत्येके ॥ चपयति ॥ ११० ॥ रह त्यागे इत्येके । अरीरहत् । कथादेस्तु अररहत् ॥ १११ ॥ बल प्राणने ॥ बलयति ॥ ११२ ॥ चिञ् चयने ॥

२५६८–णिच् परे रहते मित् धातुओंकी उपधाको ह्रस्व हो, ज्ञपयति ॥ यम धातु परिवेषणमें है । चकारसे यम धातु मित् हो । इस स्थलमें परिवेषण शब्दसे परिवेष्टन समझना । भोजन और वेष्टन नहीं ॥ यमयति–चन्द्रम्, अर्थात् चन्द्रको परिवेष्टन करताहै ॥ चह धातु परिकल्पनमें है । चहयति । अचीचहत् । कथादिमें वक्ष्यमाण चह धातुको तो अदन्तत्व होनेसे अग्लोपित्वके कारण दीर्घ और सन्वद्भाव नहीं होगा, जैसे–अचचहत् ॥ चप धातु भी उक्तार्थक है । चपयति ॥ रह धातु त्यागमें है, यह कोई २ कहतेहैं । अरीरहत् । कथादिका तो अररहत् ॥ बल धातु प्राणनमें है ॥ बलयति ॥ चिञ् धातु चयनमें है ॥

२५६९ चिस्फुरोर्णौ । ६ । १ । ५४ ॥

आत्वं वा स्यात् ॥

२५६९–णि परे रहते चि और स्फुर धातुको विकल्प करके आत्व हो ॥

२५७० अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ । ७ । ३ । ३६ ॥

चपयति । चययति । ञित्करणसामर्थ्यादस्य णिज्विकल्पः । चयते । प्रणिचयति। प्रनिचयति॥ नान्ये मितोऽहेतौ ॥ अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः तेन शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न ॥ ११३ ॥ घट्ट चलने॥ ११४॥ मुस्त सङ्घाते ॥ ११५ ॥ खट्ट संवरणे॥ ११६॥ षट्ट स्फिट्ट चुबि हिंसायाम् ॥ ११९ ॥ पुल सङ्घाते ॥ १२० ॥ पूर्ण इत्येके ॥ पुणेत्यन्ये ॥ ॥ १२१ ॥ पुंस अभिवर्धने ॥ १२२ ॥ टकि बन्धने । टङ्कयति । टङ्कति ॥ १२३ ॥ धूस कान्तिकरणे ॥ धूसयति । दन्त्यान्तः । मूर्धन्यान्त इत्येके । तालव्यान्त इत्यपरे ॥ १२४ ॥ कीट वर्णे ॥ १२५ ॥ चूर्ण संकोचने ॥ १२६ ॥ पूज पूजायाम् ॥ १२७ ॥ अर्क स्तवने ॥ तपन इत्येके ॥ १२८ ॥ शुठ आलस्ये ॥ १२९ ॥ शुठि शोषणे ॥ शुण्ठयति । शुण्ठति ॥ १३० ॥ जुड प्रेरणे ॥ १३१ ॥ गज मार्ज शब्दार्थौ ॥ गाजयति।मार्जयति॥१३३॥मर्च च॥मर्चयति ॥ ॥ १३४ ॥ घृ प्रस्रवणे ॥स्रावण इत्येके॥१३५॥ पचि विस्तारवचने ॥ पञ्चयति। पञ्चति । पञ्चते इति व्यक्तार्थस्य शपि गतम् ॥ १३६ ॥ तिज निशाने ॥ तेजयति ॥ १३७ ॥ कृत संशब्दने ॥

२५७०–अर्त्ति, ह्री, व्ली, री, क्नूयी, क्ष्मायी और आकारान्त धातुओंके णि परे रहते पुक्का आगम हो, चपयति, चययति । ञित्करण सामर्थ्यके कारण इससे णिच् विकल्प होगा– चयते । प्रणिचयति, प्रनिचयति ।

"नान्ये मितोऽहेतौ" अहेतु अर्थात् स्वार्थिक णिच् परे रहते ज्ञपादि पांच धातुओंसे भिन्न धातु मित् न हो, इससे शमादि धातुओंको अमन्तत्व प्रयुक्त मित्त्व नहीं होगा ॥

घट्ट धातु चलनमें है ।। मुस्त धातु संघातमें है ॥ खट्ट धातु संवरणमें है ॥ षट्ट, स्फिट्ट और चुबि धातु हिंसामें हैं ॥ पुल धातु समूहमें है । कोई २ पूर्ण धातु पढतेहैं । कोई २ पुण धातु कहतेहैं । पुंस धातु अभिवर्द्धनमें है ॥ टकि धातु बंधनमें है । टंकयति । टंकति ॥ धूस धातु कान्ति करनेमें है। धूसयाति। यह धातु दन्त्य सकारान्त है । कोई २ कहतेहैं मूर्धन्य षकारान्त है । अन्य मतसे तालव्यान्त है ॥ कीट धातु वर्णमें है ॥ चूर्ण धातु संकोचनमें है ॥ पूज धातु पूजामें है ॥ अर्क धातु स्तवनमें है ॥ किसीके मतसे तपनार्थक है ॥ शुठ धातु आलस्यमें है ॥ शुठि धातु शोषणमें है । शुण्ठयति । शुण्ठति ॥ जुड धातु प्रेरणमें है ॥ गज और मार्ज धातु शब्दार्थक है । गाजयति । मार्जयति ॥ मर्च धातु भी उक्तार्थक है । मर्चयति ॥ घृ धातु प्रस्रवणमें है । किसीके मतसे स्रावणमें है ॥ पचि धातु विस्तार वचनमें है । पञ्चयति । (पञ्चते) ऐसा पद तो व्यक्तार्थक पचि धातुका शप्में कथित हुआ ॥ तिज धातु तीक्ष्णीकरणमें है । तेजयति ॥ कृत धातु संशब्दनमें है ॥

२५७१ उपधायाश्च । ७ । १ । १०१॥

धातोरुपधाभूतस्य ॠत इत्स्यात् रपरत्वम् । उपधायां चेति दीर्घः । कीर्तयति ॥ उर्कृत् । अचीकृतत्–अचिकीर्तत् ॥ १३८ ॥ वर्ध छेदनपूरणयाः ॥ १३९ ॥ कुबि आच्छादने ॥ कुम्बयति ॥ कुभि इत्येके ॥ १४१ ॥ लुबि तुबि अदर्शने ॥ अर्दने इत्येके ॥ १४३ ॥ ह्लप व्यक्तायां वाचि ॥ क्लपेत्येके ॥ १४५ ॥ चुटि छेदने ॥ १४६ ॥ इल प्रेरणे ॥ एलयति । ऐलिलत् ॥ १४७ ॥ म्रक्ष म्लेच्छने ॥ १४८ ॥ म्लेच्छ अव्यक्तायां वाचि ॥ १४९ ॥ ब्रूस बर्ह हिंसायाम् ॥ १५१ ॥ केचिदिह गर्ज गर्द शब्दे, गर्ध अभिकाङ्क्षायामिति पठन्ति ॥ १५४ ॥ गुर्द पूर्वनिकेतने ॥ १५६ ॥ जसि रक्षणे ॥ मोक्षण इति केचित्। जंसयति। जंसति ॥१५७॥ ईड स्तुतौ ॥ १५८ ॥ जसु हिंसायाम् ॥१५९॥ पिडि सङ्घाते ॥१६० ॥ रुष रोषे ॥ रुठ इत्येके ॥१६२ ॥ डिप क्षेपे ॥ १६३ ॥ ष्टुप समुच्छ्राये ॥ १६४ ॥

आकुस्मादात्मनेपदिनः ॥ कुस्मनाम्नो वेति वक्ष्यते तमभिव्याप्येत्यर्थः । अकर्तृगामिफलार्थमिदम् । चित सञ्चेतने ॥ चेतयते । अचीचितत ॥ १ ॥ दशि दंशने ॥ दंशयते । अददंशत । इदित्वाण्णिजभावे । दंशति । आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनैवेति व्याख्यातारः । नलोपे सञ्जिसाहचर्याद् भ्वादेरेव ग्रहणम् ॥ २ ॥ दसि दर्शनदंशनयोः॥ दंसयते । दंसति । दसेत्यप्येके ॥ ४ ॥ डप डिप संघाते॥ ६ ॥ तत्रि कुटुम्बधारणे।तन्त्रयते। चान्द्रास्तु धातुद्वयमिति मत्वा कुटुम्बयते इत्युदाहरन्ति ॥ ८ ॥ मन्त्रि गुप्तपरिभाषणे॥९॥ स्पश ग्रहणसंश्लेषणयोः ॥ १० ॥ तर्ज भर्त्स तर्जने ॥ १२ ॥ बस्त गन्ध अर्दने ॥ बस्तयते । गन्धयते ॥ १४ ॥ विष्क हिंसायाम् ॥ हिष्केत्येके ॥ १६ ॥ निष्क परिमाणे ॥ १७ ॥ लल ईप्सायाम् ॥ १८ ॥ कूण संकोचने ॥ १९ ॥ तूण पूरणे ॥२०॥ भ्रूण आशाविशंकयोः ॥ २१॥

शठ श्लाघायाम् ॥ २२ ॥ यक्ष पूजायाम् ॥ २३ ॥ स्यम वितर्के ॥ २४ ॥ गूर उद्यमने ॥ २५ ॥ शम लक्ष आलोचने ॥ नान्ये मित इति मित्त्वनिषेधः । शामयते ॥ २७ ॥ कुत्स अवक्षेपणे ॥ २८ ॥ त्रुट छेदने ॥ कुट इत्येके ॥ ३० ॥ गल स्रवणे ॥ ॥ ३१ ॥ भल आभण्डने ॥ ३२ ॥ कूट आप्रदाने ॥ अवसादने इत्येके ॥ ३३ ॥ कुट्ट प्रतापने ॥ ३४ ॥ वञ्चु प्रलम्भने ॥ ३५ ॥ वृष शक्तिबन्धने । शक्तिबन्धनं प्रजननसामर्थ्यं शक्तिसंबन्धश्च । वर्षयते ॥ ३६ ॥ मद तृप्तियोगे ॥ मदयते ॥ ३७ ॥ दिवु परिकूजने ॥ ३८ ॥ गृ विज्ञाने । गारयते ॥ ३९ ॥ विद चेतनाख्याननिवासेषु ॥ वेदयते ॥ ४० ॥ सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्

मान स्तम्भे ॥ मानयते ॥ ४१ ॥ यु जुगुप्सायाम् ॥ यावयते ॥ ४२ ॥ कुस्म नाम्नो वा ॥ कुस्मेति धातुः कुत्सितस्मयने वर्तते । कुस्मयते । अचुकुस्मत ॥ ४३ ॥ अथ वा कुस्मेति प्रातिपदिकं ततो धात्वर्थे णिच् ॥ इत्याकुस्मीयाः ॥

चर्च अध्ययने ॥ १ ॥ बुक्क भाषणे ॥ २ ॥ शब्द उपसर्गादाविष्कारे च ॥ चाद्भाषणे । प्रतिशब्दयति प्रतिश्रुतमाविष्करोतीत्यर्थः ॥ अनुपसर्गाच्च ॥ आविष्कारे इत्येव । शब्दयति ॥ ३ ॥ कण निमीलने ॥ काणयति ॥ णौ चङ्युपधाया ह्रस्वः । काण्यादीनां वेति विकल्प्यते । अचीकणत् । अचकाणत् ॥ ४ ॥ जभि नाशने ॥ जम्भयति । जम्भति ॥ ५ ॥ षूद क्षरणे ॥ सूदयति । असूषुदत् ॥ ६ ॥ जसु ताडने ॥ जासयति । जसति ॥ ७ ॥ पश बन्धने ॥ पाशयति ॥ ८ ॥ अम रोगे ॥ आमयति । नान्ये मित इति निषेधः । अम गत्यादौ शपि गतः । तस्माद्धेतुमण्णौ न कम्यमिचमामिति निषेधः । आमयति ॥ ९ ॥ चट स्फुट भेदने । विकासे शशपोः स्फुटति स्फोटते इत्युक्तम् ॥ ११ ॥ घट सङ्घाते । घाटयति ॥ ॥ १२ ॥ हन्त्यर्थाश्च ॥ नवगण्यामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्त इत्यर्थः ॥ दिवु मर्दने । उदित्त्वाद्देवतीत्यपि ॥ १३ ॥ अर्ज प्रतियत्ने ॥ अयमर्थान्तरेऽपि । द्रव्यमर्जयति ॥ १४ ॥ घुषिरविशब्दने ॥ घोषयति । घुषिरविशब्दन इति सूत्रेऽविशब्दन इति निषेधाल्लिङ्गादनित्योऽस्य णिच् । घोषति । इरित्त्वादङ् । अघुषत् । अघोषीत् । ण्यन्तस्य तु अजूघुषत् ॥ १५ ॥ आङः क्रन्दसातत्ये ॥ भौवादिकः क्रन्दधातुराह्वानाद्यर्थ उक्तः स एवाङ्पूर्वो णिचं लभते सातत्ये । आक्रन्दयति । अन्ये तु आङ्पूर्वो घुषिः क्रन्द सातत्ये इत्याहुः । आघोषयति ॥ ॥ १६ ॥ लस शिल्पयोगे ॥ १७ ॥ तसि भूष अलंकरणे । अवतंसयति । अवतंसति । भूषयति ॥ १९ ॥ मोक्ष असने । मोक्षयति ॥ २० ॥ अर्ह पूजायाम् ॥ २१ ॥ ज्ञा नियोगे ॥ आज्ञापयति ॥ ॥ २२ ॥ भज विश्राणने ॥ २३ ॥ शृधु प्रसहने ॥ अशशर्धत्—अशीशृधत् ॥ २४ ॥ यत निकारोपस्कारयोः ॥ २५ ॥ रक लग आस्वादने ॥ रघ इत्येके ॥ रगेत्यन्ये ॥ २९ ॥ अञ्चु विशेषणे ॥ अञ्चयति । उदित्त्वमिड्विकल्पार्थम् । अत एव विभाषितो णिच् । अञ्चति । एवं शृधुजसु प्रभृतीनामपि बोध्यम् ॥ ३० ॥ लिगि चित्रीकरणे ॥ लिङ्गयति । लिङ्गति । ३१ ॥ मुद संसर्गे ॥ मोदयति सक्तून् घृतेन ॥ ३२ ॥ त्रस धारणे ॥ ग्रहण इत्येके । वारण इत्यन्ये ॥ ३३ ॥ उध्रस उञ्छे । उकारो धात्ववयव इत्येके । नेत्यन्ये । ध्रासयति । उध्रासयति ॥ ३५ ॥ मुच प्रमोचने मोदने च ॥ ३६ ॥ वस स्नेहच्छेदापहरणेषु ॥ ३७ ॥ चर संशये ॥ ३८ ॥ च्यु सहने ॥ हसने चेत्येके । च्यावयति । च्युसेत्येके । च्योसयति ॥ ४० ॥ भुवोऽवकल्कने ॥ अवकल्कनं मिश्रीकरणमित्येके । चिन्तनमित्यन्ये । भावयति ॥ ४१ ॥ कृपेश्च । कल्पयति ॥ ४२ ॥

आस्वदः सकर्मकात् ॥ स्वदिमभिव्याप्य सम्भवत्कर्मभ्य एव णिच् । ग्रस ग्रहणे ॥ ग्रासयति फलम् ॥ १ ॥ पुष धारणे ॥ पोषयत्याभरणम् ॥ २ ॥ दल विदारणे दालयति ॥ ३ ॥ पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि बृहि बर्ह बल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः ॥ पाटयति । पोटयति । लोटयति । तुञ्जयति । तुञ्जति । एवं परेषाम् । घाटयति । घण्टयति ॥

२५७१—धातुके उपधाभूत ऋकारके स्थानमें इत् हो रपरत्व होनेपर "उपधायाश्च २२६५" इस सूत्रसे दीर्घ होकर कीर्तयति । "उर्ऋत् २५६७" इस सूत्रसे उपधाभूत ऋवर्णके स्थानमें ऋत् होकर—अचीकृतत्, अचिकीर्तत् ॥ वर्ध धातु छेदन और पूरणमें है ॥ कुबि धातु आच्छादनमें है । कुम्ब-

यति। कोई कुमि धातु पढतेहैं, कुम्भयति ॥ छुबि और तुवि धातु अदर्शनमें हैं। किसीके मतसे अर्दनमें हैं ॥ ह्रप धातु स्पष्टवाक्य कथनमें है। कोई क्लप धातु पढतेहैं ॥ चुटि धातु छेदनमें है ॥ इल धातु प्रेरणमें है। एलयति। ऐलिलत् ॥ म्रक्ष धातु म्लेच्छनमें है ॥ म्लेच्छ धातु अव्यक्त शब्दमें है ॥ ब्रुस और बर्ह धातु हिंसामें है। कोई २ गर्ज और गर्द धातु शब्दमें और गर्ध धातु अभिकांक्षामें कहतेहैं ॥ गुर्द धातु पूर्वनिकेतनमें है ॥ जसि धातु रक्षण और किसीके मतसे मोक्षणमें है। जंसयति। जंसति ॥ ईड धातु स्तुतिमें है ॥ जसु धातु हिंसामें है ॥ पिडि धातु संघातमें है ॥ रुष धातु रोषमें है ॥ कोई रुठ धातु पढतेहैं ॥ डिप धातु क्षेपमें है ॥ ष्टुप धातु समुच्छ्रायमें है।

अब कुस्म धातुतक आत्मनेपदी हैं, अर्थात् "कुस्मनाम्नो वा" यह पश्चात् वर्णित होगा वहां तक सम्पूर्ण धातु आत्मनेपदी हैं। यह अकर्तृगामि फलार्थ है।

चित धातु संचेतनमें है। चेतयते। अचीचितत् ॥ दशि धातु दंशनमें है। दंशयते। अददंशत्। इदित्वके कारण णिच्के अभाव पक्षमें, दंशति। व्याख्याकारोंके मतसे णिच् सन्नियोगसे ही कुस्म धातु पर्य्यन्त आत्मनेपद होगा इससे यहां आत्मनेपद नहीं हुआ ॥ नलोपशास्त्रमें सञ्जि धातुके साहचर्य्यसे भ्वादिगणीय धातुका ही ग्रहण है, इससे नलोप नहीं हुआ। दसि धातु दर्शन और दंशनमें है। दंसयते। दंसति। कोई २ कहते हैं, दस धातु है ॥ डप और डिप धातु संघातमें हैं ॥ तत्रि धातु कुटुम्बधारणमें है। तंत्रयते, चान्द्रनें तो यह दो धातु मान कर 'कुटुम्बयते' ऐसा उदाहरण दियाहै ॥ मन्त्रि धातु गुप्तपरिभाषणमें है ॥ स्पश धातु ग्रहण और संश्लेषणमें है ॥ तर्ज और भर्त्स धातु तर्जनमें है ॥ वस्त और गन्ध धातु अर्दनमें हैं। वस्तयते। गन्धयते ॥ विष्क धातु हिंसामें है। किसीके मतसे हिष्क धातु है ॥ निष्क धातु परिमाणमें है ॥ लल धातु ईप्सामें है ॥ कूण धातु संकोचमें है ॥ तूण धातु पूरणमें है ॥ भ्रूण धातु आशा और विशङ्कामें है ॥ शठ धातु श्लाघामें है ॥ यक्ष धातु पूजामें है स्यम धातु वितर्कमें है ॥ गूर धातु उद्यमनमें है ॥ शम और लक्ष धातु आलोचनमें है। "नान्ये मितः" इससे मित्त्वनिषेध हुआ। शामयते ॥ कुत्स धातु अवक्षेपणमें है ॥ त्रुट धातु छेदनमें है ॥ कोई कुट पढतेहैं ॥ गल धातु स्रवणमें है ॥ भल धातु आभण्डनमें है ॥ कूठ धातु आप्रदानमें है ॥ किसीके मतसे अवसादनमें है ॥ कुट्ट धातु प्रतापनमें है ॥ वञ्चु धातु प्रलम्भनमें है ॥ वृष धातु प्रजनन सामर्थ्य, अर्थात् शक्तिबंधनमें है। वर्षयते ॥ मद धातु तृप्तियोगमें है। मदयते ॥ दिवु धातु परिकूजनमें है ॥ गॄ धातु विज्ञानमें है। गारयते। विद धातु चेतना, आख्यान और विवासनमें है। वेदयते।

(कारिकाका अर्थ) "सत्ता अर्थमें दिवादिगणीय विद धातुके उत्तर श्यन् परे रहते विद्यते, ज्ञानार्थमें अदादिगणीय विद धातुके उत्तर शप्का लुक् होकर वेत्ति, विचारार्थमें रुधादिगणीय विद धातुके उत्तर श्नम् प्रत्यय होकर विन्ते, प्राप्ति, अर्थात् लाभार्थमें तुदादिगणीय विद धातुके उत्तर श होकर विन्दते और विन्दति पद क्रमसे सिद्ध हैं।

मान धातु स्तम्भमें है। मानयते ॥ यु धातु जुगुप्सामें है। यावयते ॥ "कुस्मनाम्नो वा" कुस्म धातु है कुत्सित हास्यमें है। कुस्मयते। अचुकुस्मत। अथवा कुस्म यह प्रातिपदिक है, उसके उत्तर धात्वर्थमें णिच् है ॥

आकुस्मीय धातु समाप्त हुए ॥

चर्च धातु अध्ययनमें है ॥ बुक्क धातु भाषणमें है ॥ शब्द धातु उपसर्गयुक्त होनेपर आविष्कार और चकारसे कथनमें है। प्रतिशब्दयति, अर्थात् प्रतिश्रुत विषयको आविष्कार करताहै। उपसर्गके उत्तर न होनेपर केवल आविष्कारार्थ ही समझना। शब्दयति ॥ कण धातु निमीलनमें है। काणयति। "णौ चङ्युपधाया ह्रस्वः १३१४" इससे ह्रस्व "काण्यादीनां वा" इस वार्त्तिकसे विकल्प करके होगा। इससे—अचीकणत्। अचकाणत् ॥ जभि धातु नाश करनेमें है। जम्भयति। जम्भति॥ षूद धातु क्षरणमें है। सूदयति। असूषुदत् ॥ जसु धातु ताडनमें है। जासयति। जसति ॥ पश धातु बंधनमें है। पाशयति। अम धातु रोगमें है। आमयति, यहां "नान्ये मितः०" इससे मित्त्व निषेध हुआ ॥ अम धातु गत्यादिमें शप्में कहचुकेहैं, उसके उत्तर हेतुमत् णिच् रहते "न कम्यमिचमाम्" इससे ह्रस्वनिषेध होकर 'आमयति' पद होगा ॥ चट और स्फुट धातु भेदनमें हैं। विकासार्थमें श और शप्में स्फुटति। स्फोटते इस प्रकार कहा है ॥ घट धातु संघातमें है। घाटयति।

"हन्त्यर्थाश्च" नवगणीमें उक्त भी जो हन्त्यर्थक धातु, उससे स्वार्थमें णिच् हो ॥

दिवु धातु मर्दनमें है। उकार इत् होनेके कारण 'देवति' पद भी होगा। अर्ज धातु प्रतियत्नमें है। यह धातु अन्यार्थमें भी प्रयुक्त होताहै, जैसे—द्रव्यमर्जयति ॥ घुषिर् धातु अविशब्दनमें है। घोषयति। "घुषिरविशब्दने ३०६३" इस सूत्रमें 'अविशब्दने' ऐसे निषेधके कारण इसको नित्य णिच् नहीं होगा, घोषति। इर् इत् होनेके कारण विकल्प करके अङ् होगा, अघुषत्, अघोषीत् ॥ णिजन्त का तो 'अजूघुषत्' ऐसा होगा।

भ्वादिगणीय क्रन्द धातु आह्वानादि अर्थमें कहा गया है, वही सातत्यार्थमें आङ्पूर्वक होकर णिच्को लाभ करे। आक्रन्दयति। अन्य मतसे तो आङ्पूर्वक घुषि धातुसे क्रन्दसातत्य अर्थमें णिच् होगा। आघोषयति ॥ लस धातु शिल्पयोगमें है॥ तसि और भूष धातु अलंकरणमें है। अवतंसयति। अवतंसति। भूषयति ॥ अर्ह धातु पूजामें है ॥ ज्ञा धातु नियोगमें है। आज्ञापयति ॥ भज धातु वितरण करनेमें है ॥ शृधु धातु प्रहसनमें है। अशशर्द्धत्, अशीशृधत् ॥ यत धातु निकार और उपस्कारमें है ॥ रक और लग धातु आस्वादनमें है। कोई २ रघ धातु कहतेहैं। कोई २ रग धातु कहतेहैं ॥ अंचु धातु विशेषणमें है। अञ्चयति। उकार इत् होनेसे क्त्वा प्रत्ययसे होनेपर विकल्प करके इट् होगा, इसी कारण णिच् भी विकल्पसे होताहै। अञ्चति। इसी प्रकार शृधु, जसु आदि धातुओंके क्त्वा प्रत्ययमें रूप होंगे ॥ लिगि धातु चित्रीकरणमें है। लिङ्गयति, लिङ्गति ॥ मुद धातु संसर्गमें है। 'मोदयति सक्तून् घृतेन'

त्रस धातु धारणमें किसीके मतसे ग्रहणमें है । अन्य मतसे वारणार्थमें है ॥ उध्रस धातु उञ्छमें है । कोई २ कहतेहैं, उकार धातुका ही अवयव है । अन्य मतसे ऐसा नहीं, उध्रासयति, ध्रासयति ॥ मुच धातु प्रमोचन और मोदनमें है।वस धातु स्नेह, छेद और अपहरणमें है ॥ चर धातु संशयमेंहै ॥ च्यु धातु सहनमें है । किसी २ के मतसे हसनमें है । च्यावयति । कोई २ च्युस धातु कहतेहैं । च्योसयति ॥

अवकल्कन, अंर्थमें ही भू धातुके उत्तर णिच् हो॥ कोई २ अवकल्कन शब्दका मिश्रीकरण और कोई २ चिन्तन अंर्थ कहतेहैं । भावयति । कृप धातुसे भी अवकल्पनार्थमें णिच् हो—कल्पयति ॥

"आस्वदः सकर्मकात्" अर्थात् स्वदि धातु पर्यन्त सकर्मक धातुओंके ही उत्तर णिच् हो । ग्रस धातु ग्रहण करनेमें है । ग्रासयति फलम् ॥ पुष धातु धारणमें है । पोषयति आभरणम्। दल धातु विदारणार्थमें है । दालयति ॥ पट, पुट, लुट, तुजि, मिजि, पिजि, लुजि, भजि, लघि, त्रसि, पिसि, कुसि, दशि, कुशि, घट, घटि, बृहि, बर्ह, बल्ह, गुप, धूप, विच्छ, चीव, पुथ, लोकृ, लोचृ, णद, कुप, तर्क, वृतु और वृधु धातु भाषार्थक हैं । पाटयति । पोटयति । लोटयति । तुञ्जयति, तुञ्जति । इसी प्रकार अन्य धातुओंके भी रूप होंगे । घाटयति । घण्टयति ॥

२५७२ नाग्लोपिशास्वृदिताम्।७।४।२॥

णिच्यग्लोपिनः शास्तेर्ऋदितां च उपधाया ह्रस्वो न स्याच्चङ्परे णौ । अलुलोकत् । अलुलोचत् । वर्तयति । वर्धयति । उदित्त्वाद्वर्तति । वर्धति ॥ ३४ ॥ रुट लजि अजि दसि भृशि रुशि शीक नट पुटि जि चि रघि लघि अहि रहि महि च ॥ ४९ ॥ लडि तड नल च॥५२॥ पूरी आप्यायने ॥ ईदित्त्वं निष्ठायामिण्निषेधाय । अत एव णिज्वा । पूरयति । पूरति ॥५३ ॥ रुज हिंसायाम् ॥ ५४ ॥ ष्वद आस्वादने । स्वाद इत्येके ॥ असिष्वदत् । दीर्घस्य त्वषोपदेशत्वात असिस्वदत् ॥ ५६ ॥ (इत्यास्वदीयाः)

आधृषाद्वा ॥ इत ऊर्ध्वं विभाषितणिचो धृषधातुमभिव्याप्य ॥ युज पृच संयमने । योजयति । योजति । अयौक्षीत् । पर्चयति । पर्चति । पर्चिता । अपर्चीत् ॥ २ ॥ अर्च पूजायाम् ॥ ॥ ३ ॥ षह मर्षणे ॥ साहयति । स एवायं नागः सहति कलभेभ्यः परिभवम् ॥ ४ ॥ ईर क्षेपे ॥ ५ ॥ ली द्रवीकरणे ॥ लाययति । लयति । लेता ॥ ६ ॥ वृजी वर्जने ॥ वर्जयति । वर्जति ॥ ७ ॥ वृञ् आवरणे ॥ वारयति । वरति । वरते । वरीता-वरिता ॥ ८ ॥ जॄ वयोहानौ । जारयति । जरति । जरीता-जरिता ॥ ९ ॥ ज्रि च ॥ ज्राययति । ज्रयति ॥ ज्रेता ॥ १० ॥ रिच वियोजनसम्पर्चनयोः ॥ रेचयति । रेचति । रेक्ता ॥ ११ ॥ शिष असर्वोपयोगे ॥ शेषयति । शेषति । शेष्टा । अशिक्षत्। अयं विपूर्वोऽतिशये ॥ १२ ॥ तप दाहे ॥ तापयति । तपति । तप्ता ॥ १३ ॥ तृप तृप्तौ ।। सन्दीपने इत्येके । तर्पयति । तर्पति । तर्पिता ॥ १४ ॥ छृदी सन्दीपने ॥ छर्दयति । छर्दति । छर्दिता । छर्दिष्यति । सेसिचीति विकल्पो न । साहचर्यात्तत्र रौधादिकस्यैव ग्रहणात् ॥ १५ ॥ चृप छृप दृप सन्दीपन इत्येके ॥ चर्पयति । छर्पयति ॥ १८ ॥ दृभी भये । दर्भयति । दर्भति । दर्भिता ॥ १९ ॥ दृभ सन्दर्भे ॥ अयं तुदादावीदित् ॥ २० ॥ श्रथ मोक्षणे ॥ हिंसायामित्येके ॥ २१ ॥ मी गतौ ॥ माययति । मयति । मेता ॥ २२ ॥ ग्रन्थ बन्धने ॥ ग्रन्थयति । ग्रन्थति ॥ २३ ॥ शीक आमर्षणे ॥२४॥ चीक च ॥ २५ ॥ अर्द हिंसायाम् । स्वरितेत् । अर्दयति । अर्दति । अर्दते ॥ २६ ॥ हिसि हिंसायाम् ॥ हिंसयति । हिंसति । हिनस्तीति श्नमि गतम् ॥ २७ ॥ अर्ह पूजायाम् ॥ २८ ॥ आङः षद पद्यर्थे ॥ आसादयति । आसीदति । पाघ्रेति सीदादेशः । आसत्ता । आसात्सीत् ॥ २९ ॥ शुंध शौचकर्मणि ॥ शुन्धिता । अशुन्धीत् । अशुन्धिष्टाम् ॥ ३० ॥ छद अपवारणे । स्वरितेत् ॥ ३१ ॥ जुष परितर्कणे ॥ परितर्कणमूहो हिंसा वा ॥ परितर्पण इत्यन्ये । परितर्पणं परितृप्तिक्रिया । जोषयति । जोषति । प्रीतिसेवनयोर्जुषते इति तुदादौ ॥ ३२॥ धूञ् कम्पने ॥ णावित्यधिकृत्य ॥ धञ्प्रीञोर्नुग्वक्तव्यः ॥ * ॥ धूनयति । धवति । धवते । केचित्तु धूञ्प्रीणोरिति पठित्वा प्रीणातिसाहचर्याद्धुनातेरेव नुकमाहुः । धावयति ॥ ३३ ॥ अयं स्वादौ क्र्यादौ तुदादौ च । स्वादौ ह्रस्वश्च । तथा च कविरहस्ये॥

> धूनोति चम्पकवनानि धुनोत्यशोकं
> चूतं धुनाति धुवति स्फुटितातिमुक्तम् ॥
> वायुर्विधूनयति चम्पकपुष्परेणून्
> यत्कानने धवति चन्दनमञ्जरीश्च ॥ १ ॥

प्रीञ् तर्पणे ॥ प्रीणयति । धञ्प्रीणोरिति हरदत्तोक्तपाठे तु । प्राययति । प्रयति । प्रयते ॥ ३४॥ श्रन्थ ग्रन्थ सन्दर्भे ॥ ३६ ॥ आप्लृ लम्भने ॥

आपयति । आपिपत् । आपति । आप्ता । आपत् । स्वरितेदयमित्येके । आपते ॥ ३७ ॥ तनु श्रद्धोपकरणयोः ॥ उपसर्गाच्च दैर्घ्ये ॥ तानयति । वितानयति।तनति। वितनति॥३८॥ चन श्रद्धोपहननयोरित्येके ॥ चानयति चनति ॥ ३९ ॥ वद सन्देशवचने ॥ वादयति। स्वरितेत् । वदति । वदते । ववदतुः । ववदिथ । वद्यात् । अनुदात्तेदित्येके । ववदे ॥ ४० ॥ वच परिभाषणे । वाचयति । वचति । वक्ता । अवाक्षीत् ॥ ४१ ॥ मान पूजायाम् ॥ मानयति । मानति । मानिता । विचारणे तु भौवादिको नित्यसन्नन्तः । स्तम्भे–मानयते । इत्याकुस्मीयाः॥ मन्यते इति दिवादौ । मनुते इति तनादौ च ॥ ४२ ॥ भू प्राप्तावात्मनेपदी ॥ भावयते । भवते । णिच्सन्नियोगेनैवात्मनेपदमित्येके । भवति ॥४३॥ गर्ह विनिन्दने ॥४४॥ मार्ग अन्वेषणे ॥ ४५ ॥ कठि शोके ॥ उत्पूर्वोयमुत्कण्ठायाम्।कण्ठते इत्यात्मनेपदीगतः॥४६॥ मृजू शौचालंकारयोः । मार्जयति । मार्जति । मार्जिता–मार्ष्टा ॥ ४७ ॥ मृष तितिक्षायाम् । स्वरितेत् । मर्षयति । मर्षति । मर्षते । मृष्यति मृष्यते इति दिवादौ॥ सेचने शपि मर्षति॥४८॥ धृष प्रसहने॥धर्षयति।धर्षति।४९।इत्याधृषीयाः॥

अथादन्ताः ॥ कथ वाक्यप्रबन्धे ॥ अल्लोपस्य स्थानिवद्भावान्न वृद्धिः । कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ । अचकथत् ॥ १ ॥ वर ईप्सायाम् ॥ वरयति । वारयतीति गतम् ॥ २ ॥ गण संख्याने ॥ गणयति ॥

२५७२–णिच् परे अग्लोपि, शास् और ऋकारान्त धातुकी उपधाको चङ् परे रहते ह्रस्व न हो, अलुलोकत् । अलुलोचत् । वर्तयति । वर्द्धयति । उकारकी इत्संज्ञा होनेके कारण, वर्त्तति । वर्धति ॥ रुट, लजि, अजि, दसि, भृशि, रुशि, शीक, नट, पुटि, जिवि, रघि, लघि, अहि, रहि, महि, लडि तड और नल धातु भाषार्थक हैं ॥ पूरी धातु आप्यायनमें है । निष्ठामें इट् निषेधके निमित्त ईदित्व है, इसी कारण विकल्प करके णिच् होगा, पूरयति, पूरति ॥ रुज धातु हिंसामें है ॥ ष्वद धातु आस्वादनमें है । कोई स्वाद धातु कहतेहैं । असिष्वदत् । दीर्घका तो षोपदेश न होनेसे षत्व न होगा । असिस्वदत् ॥

"आधृषाद्वा" यहांसे धृष धातुतक विकल्प करके णिच् हो। युज और पृच धातु संयमनमें है । योजयति, योजति । अयौक्षीत् ॥ पर्चयति, पर्चति । पर्चिता । अपर्चीत् ॥ अर्च धातु पूजामें है ॥ षह धातु मर्षणमें है । साहयति । 'स एवायं नागः सहति कलभेभ्यः परिभवम्' ॥ ईर धातु क्षेपमें है ॥ ली धातु द्रवीकरणमें है । लाययति, लयति । लेता ॥ वृजी धातु वर्जनमें है । वर्जयति, वर्जति ॥ वृञ् धातु आवरणमें है । वारयति, वरति । वरते । वरीता, वरिता ॥ जॄ धातु वयोहानिमें है । जारयति, जरति ॥ जरीता, जरिता॥ ज्रि धातु वयोहानिमें है । ज्राययति, ज्रयति । ज्रेता ॥ रिच धातु वियोजन और सम्पर्चनमें है । रेचयति, रेचति । रेक्ता ॥ शिष धातु असर्वोपयोगमें है । शेषयति, शेषति । शेष्टा । अशिक्षत् । विपूर्वक शिष धातु अतिशयमें है ॥ तप धातु दाहमें है । तापयति, तपति । तप्ता ॥ तृप धातु तृप्तिमें है । किसीके मतसे सन्दीपनमें है। तर्पयति, तर्पति । तर्पिता ॥ छृदी धातु सन्दीपनमें है। छर्दयति, छर्दति । छर्दिता । छर्दिष्यति। यहां "सेसिचि० २५०६" इस सूत्रसे विकल्प करके इट् न होगा, कारण कि, साहचर्य्यसे उस स्थलमें रुधादिगणीय धातुका ही ग्रहण है ॥ चृप, छृप, दृप, धातु सन्दीपनमें हैं, ऐसा कोई २ कहतेहैं । चर्पयति । छर्पयति ॥ दृभी धातु भयमें है, दर्भयति, दर्भति । दर्भिता ॥ दृभ धातु सन्दर्भमें है, यह धातु तुदादि गणमें ईदित् है ॥ श्रथ धातु मोक्षणमें है । किसीके मतसे हिंसामें है ॥ मी धातु गतिमें है । मामयति, मयति । मेता ॥ ग्रन्थ धातु बंधनमें है । ग्रन्थयति, ग्रन्थति ॥ सीक धातु आमर्षणमें है । चीक धातु भी उक्तार्थमें है ॥ अर्द धातु हिंसामें है, यह उभयपदी है । अर्दयति, अर्दति । अर्दते ॥ हिसि धातु हिंसामें है । हिंसयति, हिंसति । 'हिनस्ति' ऐसा पद तो श्नम् प्रत्यय करके पूर्वमें वर्णित हुआहै॥ अर्ह धातु पूजामें है ।

आङ्पूर्वक पद धातु पद्यर्थ (प्राप्त्यर्थ) में है । आसादयति, आसीदति । यहां "पाघ्रा० २३६०" इस सूत्रसे सद धातुके स्थानमें सीद आदेश हुआ । आसत्ता । आसात्सीत् ॥ शुन्ध धातु शौचकर्ममें है । शुन्धिता । अशुन्धीत् । अशुन्धिष्टाम् ॥ छद धातु अपवारणमें है, यह उभयपदी है ॥ जुष धातु परितर्कण, अर्थात् वितर्क वा हिंसामें है । अन्य मतसे परितर्पणमें है । जोषयति, जोषति । प्रीति और सेवार्थमें 'जुषते' ऐसा तुदादिमें होताहै ॥ धूञ् धातु कम्पनमें है । 'णौ' इसका अधिकार करके ।

धूञ् और प्रीञ् धातुको नुगागम हो णि परे रहते । धूनयति, धवति, धवते । कोई २ 'धूञ् प्रीणोः' ऐसा पाठ करके प्री धातुके साहचर्य्यसे क्र्यादिगणीय धू धातुको ही नुक् हो, ऐसा कहतेहैं । धावयति। यह धातु स्वादि, क्र्यादि और तुदादिगणमें पठित है । स्वादिमें यह ह्रस्व है । इसीको कविरहस्यमें कहेहैं, यथा–' धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम् ॥ वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च ॥' सब उपरोक्त गणोंके रूप इसमें आगये ॥ प्रीञ् धातु तर्पणमें है । प्रीणयति । 'धूञ्प्रीणोः' ऐसे हरदत्तोक्त पाठमें प्राययति, प्रयति । प्रयते ॥ श्रन्थ और ग्रन्थ धातु सन्दर्भमें हैं ॥ आप्लृ धातु लम्भनमें है । आपयति, आपिपत् । आपति । आप्ता । आपत् । कोई कहतेहैं, यह धातु उभयपदी है, आपते॥ तनु धातु श्रद्धा और उपकरणमें है ।

उपसर्गपूर्वक तन धातुसे दैर्घ्यार्थमें णिच् हो । तानयति । वितानयति।तनति । वितनति॥ चन धातु श्रद्धा और उपहननमें है,ऐसा कोई कहतेहैं । चानयीत। चनति ॥ वद धातु सन्देशवचनमें है, यह स्वरितेत् है । वादयति, वदति । वदते । ववदतुः । ववदिथ । वद्यात् । कोई २ कहतेहैं, यह अनुदात्तेत् है । ववदे ॥ वच धातु परिभाषणमें है । वाचयति, वचति। वक्ता । अवाक्षीत् ॥ मान धातु पूजामें है मानयति, मानति । मानिता । विचारार्थमें तो भ्वादिगणीय मान धातु नित्य सन्नन्त है । स्तम्भार्थमें 'मानयते' यह आकुस्मीय है । मन्यते ऐसा पद दिवादिगणमें होताहै । तनादिगणमें 'मनुते' ऐसा पद होताहै ॥ प्राप्ति अर्थमें भू धातु आत्मनेपदी हो । भावयते, भवते । कोई कहतेहैं णिच् सन्नियोगसे ही आत्मनेपद हो, इससे भवति ॥ गर्ह धातु विनिन्दामें है ॥ मार्ग धातु अन्वेषणमें है ॥ कठि धातु शोकमें है । उत्पूर्वक होनेपर इस धातुको उत्कंठामें समझना । कण्ठते ।

आत्मनेपदी धातु कथित हुए ।

मृज धातु शौच और अलंकारमें है । मार्जयति—मार्जति । मार्जिता, मार्ष्टा ॥ मृष धातु तितिक्षामें है, यह स्वरितेत् है । मर्षयति,मर्षति। मर्षते । मृष्यति। मृष्यते,इस प्रकार दिवादिमें होताहै। सेचन अर्थमें शप् करके मर्षति होताहै॥धृष धातु प्रहसनमें है । धर्षयति, धर्षति ॥

आधृषीय धातु समाप्त हुए ।

अब अदन्त धातु कहतेहैं । कथ धातु वाक्यप्रबंधमें है । अकारलोपेक स्थानिवद्भावके कारण वृद्धि नहीं होगी, कथयति। अग्लोपित्वके कारण दीर्घ और सन्वद्भाव नहीं होगा, अचकथत् ॥ वर धातु ईप्सामें है । वरयति । वारयति, यह पद पूर्वमें कहेहैं ॥ गण धातु संख्यानमें है । गणयति ॥

२५७३ ई च गणः । ७ । ४ । ९७ ॥

गणेरभ्यासस्य ईत्स्याच्चङ्परे णौ । चादत् । अजीगणत् । अजगणत् ॥ ३ ॥ शठ श्वठ सम्यगवभाषणे ॥५॥ पट वट ग्रन्थे ॥ ७ ॥ रह त्यागे।अररहत्॥८॥स्तनगदी देवशब्दे।स्तनयति। गदयति।अजगदत्॥१०॥पत गतौ वा॥वा णिजन्तः । वाऽदन्त इत्येके । आद्ये । पतयति।पतति। पतांचकार । अपतीत् । द्वितीये । पातयति । अपीपतत् ॥ ११ ॥ पष अनुपसर्गात्॥ गतावित्येवापषयति॥१२॥स्वर आक्षेपे॥स्वरयति।१३॥ रच प्रतियत्ने ॥ रचयति ॥ १४ ॥ कल गतौ संख्याने च ॥ १५ ॥ चह परिकल्कने ॥ परिकल्कनं दम्भः शाठ्यं च ॥ १६ ॥ मह पूजायाम् ॥ महयति । महतीति शपि गतम् ॥१७॥ सार कृप श्रथ दौर्बल्ये ॥ सारयति । कृपयति । श्रथयति ॥ २० ॥ स्पृह ईप्सायाम् ॥ २१ ॥ भाम क्रोधे ॥ अबभामत् ॥२२॥ सूच पैशुन्ये ॥ सूचयति । अषोपदेशत्वान्न षः । असूसुचत्॥२३॥ खेट भक्षणे ॥ तृतीयान्त इत्येके ॥ खोट इत्यन्ये ॥ २६ ॥ क्षोट क्षेपे ॥ २७ ॥ गोम उपलेपने ॥ अजुगोमत् ॥ २८ ॥ कुमार क्रीडायाम्॥ अचुकुमारत् ॥ २९ ॥ शील उपधारणे ॥ उपधारणमभ्यासः ॥ ३० ॥ साम सान्त्वप्रयोगे ॥ अससामत् । साम सान्त्वने इत्यतीतस्य तु असीषमत् ॥ ३१ ॥ वेल कालोपदेशे ॥ वेलयति ॥ ३२ ॥ काल इति पृथग्धातुरित्येके । कालयति ॥३३॥ पल्यूल लवनपवनयोः ॥३४॥ वात सुखसेवनयोः ॥ गतिसुखसेवनेष्वित्येके ॥ वातयति । अववातत् ॥ ३५ ॥ गवेष मार्गणे ॥ अजगवेषत् ॥ ३६ ॥ वास उपसेवायाम् ॥३७॥ निवास आच्छादने ॥ अनिनिवासत् ॥ ३८ ॥ भाज पृथक्कर्मणि ॥ ३९ ॥ सभाज प्रीतिदर्शनयोः, प्रीतिसेवनयोरित्यन्ये ॥ सभाजयति ॥ ४० ॥ ऊन परिहाणे ॥ ऊनयति । ओः पुयण्जि इति सूत्रे पयोरितिवक्तव्ये वर्गप्रत्याहारजकारग्रहो लिङ्गं णिचि अच आदेशो न स्याद्द्वित्वे कार्ये इति । यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठिते रूपे वाऽवर्णो लभ्यते तत्रैवायं निषेधः । ज्ञापकस्य सजातीयापेक्षत्वात्तेनाचिकीर्त्तदिति सिद्धम् । प्रकृते तु नशब्दस्य द्वित्वं तत उत्तरखण्डेऽल्लोपः । औननत् । मा भवानूननत् ॥४१ ॥ ध्वन शब्दे॥ अदध्वनत् ॥ ४२ ॥ कूट परितापे ॥ परिदाहे इत्यन्ये ॥ ४३ ॥ संकेत ग्राम कुण गुण चामन्त्रणे ॥ चात्कूटोऽपि । कूटयति । संकेतयति । ग्रामयति। कुणयति। गुणयति पाठान्तरम्॥ केत श्रावणे निमन्त्रणे च । केतयति । निकेतयति ॥ कुण गुण चामन्त्रणे ॥ चकारात्केतने । कूण संकोचने इति ॥ ४८ ॥ स्तेन चौर्ये ॥ अतिस्तेनत् ॥ ४९ ॥

आगर्वादात्मनेपदिनः ॥ पद गतौ ॥ पदयते। अपपदत ॥ १ ॥ गृह ग्रहणे ॥ गृहयते ॥ २ ॥ मृग अन्वेषणे ॥ मृगयते । मृग्यतीति कण्ड्वादिः ॥ ३ ॥ कुह विस्मापने ॥ ४ ॥ शूर वीर विक्रान्तौ ॥ ६ ॥ स्थूल परिबृंहणे ॥ स्थूलयते। अतुस्थूलत् ॥ ७ ॥ अर्थ उपयाच्ञायाम् ॥ अर्थयते । आर्तथत ॥ ८ ॥ सत्र सन्तानक्रियायाम् ॥ अससत्रत । अनेकाच्त्वान्न षोपदेशः । सिसत्रयिषते ॥ ९ ॥ गर्व माने । गर्वयते ।

अदन्तत्वसामर्थ्याण्णिज्विकल्पः। धातोरन्त उदात्तो लिट्याम् च फलम्। एवमग्रेऽपि ॥ १० ॥ इत्यागर्वीयाः ॥

सूत्र वेष्टने ॥ सूत्रयति। असुसूत्रत् ॥ १ ॥ मूत्र प्रस्रवणे ॥ मूत्रयति। मूत्रति ॥ २ ॥ रूक्ष पारुष्ये ॥ ३ ॥ पार तीर कर्मसमाप्तौ ॥ अपपारत्। अतितीरत् ॥ ५ ॥ पुट संसर्गे ॥ पुटयति ॥ ६ ॥ धेक दर्शने इत्येके ॥ अदिधेकत् ॥ ७ ॥ कत्र शैथिल्ये ॥ कत्रयति। कत्रति ॥ कर्तेत्यप्येके ॥ कर्तयति। कर्तति ॥ ९ ॥ प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थे णिच् स्यादिष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः। पटुमाचष्टे पटयति। परत्वाद् वृद्धौ सत्यां टिलोपः। अपीपटत्। णौ चङ्गीत्यत्र भाष्ये तु वृद्धेर्लोपो बलीयानिति स्थितम्। अपपटत् ॥ तत्करोति ॥ तदाचष्टे ॥ पूर्वस्य प्रपञ्चः ॥ करोत्याचष्ट इति धात्वर्थमात्रं णिजर्थः ॥ लडर्थस्त्वविवक्षितः ॥ तेनातिक्रामति। अश्वेनातिक्रामति अश्वयति। हस्तिनातिक्रामति हस्तयति ॥ धातुरूपं च ॥ णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। तथा च वार्तिकम् ॥ आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति ॥ * ॥ कंसवधमाचष्टे कंसं घातयति। इह कंसं हन् इ इति स्थिते ॥

२५७३–चङ् परे है जिससे ऐसे णिच् परे रहते गण धातुके अभ्यासको ईत् हो, चकारसे अत् भी हो, अजीगणत्। अजगणत् ॥ शठ और श्वठ धातु सम्यक् अवभाषणमें हैं ॥ पट और वट धातु ग्रन्थमें हैं ॥ रह धातु त्यागमें हैं। अरहत् ॥ स्तन धातु और गदी धातु देवशब्दमें हैं। स्तनयति। गदयति। अजगदत् ॥ पत धातु गतिमें विकल्प करके णिजन्त हो, विकल्प करके अदन्त ऐसा हो कोई २ कहतेहैं। द्वितीये श्चाद्ये पतयति, पतति। पताञ्चकार। अपतीत्। पातयति। अपीपतत् ॥ अनु उपसर्गके परे पष धातुको गतिमें समझना। पषयति ॥ स्वर धातु आक्षेपमें है। स्वरयति ॥ रच धातु प्रतियत्नमें है। रचयति ॥ कल धातु गति और संख्यानमें है ॥ चह धातु परिकल्कनमें है। परिकल्कन शब्दसे दम्भ और शाठ्य समझना ॥ मह धातु पूजामें है। महयति। 'महति' यह पद शप् परे कह आएहैं ॥ सार, कृप और श्रथ धातु दौर्बल्यमें हैं। सारयति। कृपयति। श्रथयति ॥ स्पृह धातु स्पृहामें है ॥ भाम धातु क्रोधमें है। अबभामत् ॥ सूच धातु पिशुनतामें है। सूचयति। अषोपदेशत्वके कारण षत्व नहीं होगा, असूसुचत् ॥ खेट धातु भक्षणमें है। कोई २ कहतेहैं, यह धातु तृतीयान्त अर्थात् खेड है। अन्यमतसे खोट धातु है ॥ क्षोट धातु क्षेप, अर्थात् निन्दामें है ॥ गोम धातु उपलेपनमें है। अजुगामत् ॥ कुमार धातु क्रीडामें है। अचुकुमारत् ॥ शील धातु उपधारणमें है। उपधारण, अर्थात् अभ्यास ॥ साम धातु सान्त्वनमें है। अससामत्। साम सान्त्वने ऐसे पूर्वमें उल्लिखित धातुका तो 'असीषमत्' पद होगा ॥ वेल धातु कालोपदेशमें है। वेलयति। कोई कहतेहैं काल यह पृथक् धातु है। कालयति ॥ पल्यूल धातु लवन (काटने) और पवनमें है। वात धातु सुख और सेवनमें है। कोई कहतेहैं उक्त धातुका गति, सुख और सेवन अर्थ है। वातयति। अववातत् ॥ गवेष धातु अन्वेषणमें है। अजगवेषत् ॥ वास धातु उपसेवामें है। निवास धात आच्छादनमें है। अनिनिवासत् ॥ भाज धातु पृथक् करनेमें है ॥ सभाज धातु प्रीति और दर्शनमें है। अन्यमतसे प्रीति और सेवनमें है। सभाजयति ॥ ऊन धातु परिहाणमें है। ऊनयति।

ऊन धातुसे णिच् पश्चात् लुङ् मध्यमें च्लि प्रत्यय, उसको चङादेश होकर–'ऊन–इ–अत्' ऐसी स्थिति होनेपर णिलोप और "चङि" इससे अजादि धातुके द्वितीय एकाच् न शब्दको द्वित्व और अकारका लोप हुआ तब णिच् परे अग्लोपित्व होनेसे सन्वद्भावके अभावके कारण अभ्यासमें इत्त्व और दीर्घ न होकर आटको वृद्धि करके 'औननत्' ऐसा रूप होताहै, परन्तु वह अनुपपन्न है, कारण कि, द्वित्वसे पहले परत्वके कारण अकारका लोप करनेपर नि शब्दको द्वित्व होनेसे अभ्यासमें इकारश्रवण होगा, यदि कहो कि, द्वित्व कर्त्तव्य रहते "द्विर्वचनेऽचि" इससे अतोलोपका निषेध होगा वह नहीं कह सकते हो; कारण कि, अल्लोपनिमित्तक णिच्का द्वित्वनिमित्तत्व नहीं है ? इसपर कहतेहैं कि, "ओः पुयण्ज्यपरे २५७७" इस सूत्रमें 'पय्योः' ऐसा नहीं कहकर वर्ग प्रत्याहार और जकार ग्रहण जो कियाहै, उससे यह ज्ञापित होताहै कि, द्वित्व कर्त्तव्य रहत णिच् परे अच्स्थानिक आदेश नहीं हो, नहीं तो विभावयिषति। यियावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति, इत्यादि स्थलमें भी द्वित्वके प्रति णिच्को निमित्तत्व न होनेसे "द्विर्वचनेऽचि२२४३" इसकी प्रवृत्ति न होनेपर द्वित्वसे परत्वके कारण वृद्धि, आवादेश होगा, पश्चात् द्वित्व, अभ्यासको ह्रस्व होनेपर "सन्यतः" इसीसे इत्त्व सिद्ध होनेसे पवर्ग, यण्, जकारग्रहण व्यर्थ ही होजाता। पकार यकारग्रहण तो व्यर्थ नहीं है, कारण कि, 'पिपविषते, यियविषति' यहां पूङ्, यु धातुसे सन् प्रत्ययके समभिव्याहारमें "स्मि पूङ्रञ्ज्वशां सनि" "सनीवन्तर्ध०" इन सूत्रोंसे इट् होनेपर इडादि सन् प्रत्ययको द्वित्वनिमित्तत्वके कारण इट्को भी द्वित्वनिमित्त होनेसे "द्विर्वचनेऽचि" इससे गुण, अवादेशको निषेधके कारण द्वित्व होनेपर अभ्यासमें उकारका श्रवण न हो, इसलिये चरितार्थ है।

यदि कहो कि, इस प्रकार ज्ञापन करनेपर कृत धातुके उत्तर णिच् पश्चात् लुङ् चङ् करनेपर ऋकारके स्थानमें 'इर्' आदेश और द्वित्वकी प्राप्ति हुई, परन्तु इरादेशके पूर्वमें ही उक्त ज्ञापनसे द्वित्व होगा, पश्चात् "उरत्" इस

सूत्रसे अभ्यास ऋकारके स्थानमें अर् और अभ्यासावयवका लोप होकर-' अचकीर्त्तत् ' ऐसा रूप होजायगा, इस कारण कहतेहैं कि, जिस धातुमें द्विरुक्ति होनेपर अभ्यासके उत्तर खण्डका आदि अच् प्रक्रियादशामें अथवा परिनिष्ठित रूपमें अवर्णको प्राप्त हो उस धातुमें यह निषेध हो, क्योंकि, ज्ञापक समान जातीयकी अपेक्षा करताहै, इस कारण ' अचिकीर्तत् ' इत्यादि पद सिद्ध हुए हैं। प्रकृत स्थलमें तो नकारको द्वित्व पश्चात् उत्तर खण्डमें अकारका लोप होकर-' औननत् ' पद सिद्ध हुआ। मा भवानूननत् ॥ ध्वन धातु शब्द करनेमें है। अदध्वनत् ॥ कूट धातु परिताप करनेमें है। अन्यमतसे परिदाहमें समझना ॥ सङ्केत, ग्राम, कुण, गुण और चकारसे कूट धातु आमंत्रणमें है । कूटयति । संकेतयति । ग्रामयति । कुणयति । गुणयति ॥ केत धातु श्रावण, अर्थात् श्रवण कराने और निमंत्रणमें है । केतयति । निकेतयति ॥ कुण और गुण धातु आमंत्रण और चकारसे केतनमें हैं ॥ कुण धातु संकोचार्थक समझना ॥ स्तेन धातु चौर्य्यमें है। अतिस्तेनत् ॥

अब गर्व धातुपर्य्यन्त आत्मनेपदी हैं।

पद धातु गतिमें है। पदयते । अपपदत ॥ गृह धातु ग्रहणमें है। गृहयते॥मृग धातु अन्वेषणमें है। मृगयते।'मृग्यति' ऐसा पद कण्ड्वादिगणमें होताहै ॥ कुह धातु विस्मापनमें है॥ शूर और वीर धातु विक्रान्तिमें है ॥ स्थूल धातु परिबृंहणमें है। स्थूलयते । अतुस्थूलत ॥ अर्थ धातु उपयाच्ञामें है। अर्थयते । आर्त्तथत ॥ सत्र धातु विस्तार करनेमें है । अससत्रत । अनेकाच्त्वके कारण षोपदेश न होनेसे-सिसत्रयिषते॥ गर्व धातु मानमें है। गर्वयते । अकारान्तत्वके कारण इसके उत्तर विकल्प करके णिच् होगा, उस धातुका अन्त्य स्वर उदात्त, और लिट् परे आम् प्रत्यय यह फल है। इस प्रकार आगे भी जानना चाहिये ।

आगर्वीय गण समाप्त हुआ।

सूत्र धातु वेष्टनमें है । सूत्रयति । असुसूत्रत् ॥ मूत्र धातु प्रस्रवणमें है । मूत्रयति ॥ रूक्ष धातु पारुष्य, अर्थात् कठोरतामें है ॥ पार और तीर धातु कर्मसमाप्तिमें हैं । अपपारत् । अतितीरत् ॥ पुट धातु संसर्गमें है । पुटयति ॥ किसीके मतसे धेक धातु दर्शनमें है । अदिधेकत् ॥ कत्र धातु शिथिलतामें है। कत्रयति, कत्रति । किसीके मतसे कर्त्त धातु है । कर्त्तयति, कर्त्तति ।

प्रातिपदिकके उत्तर धात्वर्थमें णिच् हो, और इष्ठन् प्रत्यय परे रहते जिस प्रकार पुंवद्भाव, टिका लोप, विन् और मतुप् प्रत्ययका लोप, यणादि लोप, प्र, स्थ, स्फ आदि आदेश और भसंज्ञा होती हैं, उसी प्रकार णिच् परे रहते भी उक्त समस्त कार्य हों । पटुमाचष्टे इस विग्रहमें पटयति । पटत्वके कारण वृद्धि होनेसे टिका लोप होकर-अपीपटत् । " णौ चङ्यु० २३१४" इस सूत्रके भाष्यमें तो वृद्धिसे लोप बलवान् है, ऐसा है । इससे अग्लोपित्वके कारण सन्वद्भाव दीर्घ न होकर-अपपटत् ।

" करोति आचष्टे " इस अर्थमें द्वितीयान्त प्रातिपदिकके उत्तर णिच् हो । पूर्वमें जो " प्रातिपदिकात् धात्वर्थे० " यह गणसूत्र है, उसका ही प्रपञ्च यह गणसूत्र है । करोति आचष्टे, यह जो धात्वर्थ है वही णिच्का अर्थ है, लट्का अर्थ तो विवक्षित नहीं है ।

" तेनातिक्रामति " 'अतिक्रामति ' इस अर्थमें तृतीयान्त प्रातिपदिकके उत्तर णिच् हो, अश्वेनातिक्रामति, इस विग्रहमें अश्वयति । हस्तिनातिक्रामति, इस विग्रहमें हस्तयति ।

" धातुरूपञ्च " णिच् प्रकृति धातुरूपको प्राप्त हो, इस स्थलमें च शब्द अनुक्त समुच्चयार्थक है, वैसे ही वार्त्तिक है कि,

आख्यानवाचक कृदन्त शब्दके उत्तर ' आचष्टे ' इस अर्थमें कृत् प्रत्ययका लुक् और प्रकृतिप्रत्ययापत्ति, अर्थात् आदेशादि विकारके परित्याग करके स्वरूपमें अवस्थान और प्रकृतिकी समान कारक हो * कंसवधमाचष्टे=कंसं घातयति, इस स्थलमें कंस+हन्-इ ऐसा होनेपर-॥

२५७४ हनस्तोऽचिण्णलोः ।७।३।३२॥

हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे ञिति णिति । नन्वत्राऽङ्गसंज्ञा धातुसंज्ञा च कंसविशिष्टस्य प्राप्ता । ततश्चाड्द्वित्वयोर्दोषः । किं च। कुत्वतत्वे न स्याताम् ॥ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् । सत्यम् । प्रकृतिवच्चेति चकारो भिन्नक्रमः । कारकं च चात्कार्यम् । हेतुमण्णिचः प्रकृतेर्हन्यादेर्हेतुमण्णौ यादृशं कारकं धातावनन्तर्भूतं द्वितीयान्तं यादृशं च कार्यं कुत्वतत्वादि तदिहापीत्यर्थः । कंसमजीघतत् ॥ कर्तृकरणाद्धात्वर्थे ॥ कर्तुर्व्यापारार्थं यत्करणं न तु चक्षुरादिमात्रमित्यर्थः । असिना हन्ति । असयति ॥ बष्क दर्शने ॥ १ ॥ चित्र चित्रीकरणे ॥ आलेख्यकरण इत्यर्थः ॥ कदाचिद्दर्शने ॥ चित्रेत्ययमद्भुतदर्शने णिचं लभते । चित्रयति ॥ २ ॥ अंस समाघाते ॥ ३ ॥ वट विभाजने ॥ ४ ॥ लज प्रकाशने ॥ वटि लजि इत्येके ॥ वण्टयति । लञ्जयति । अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यन्ये । वण्टापयति । लञ्जापयति ॥ ७ ॥ शाकटायनस्तु कथादीनां सर्वेषां पुकमाह । तन्मते कथापयति । गणापयतीत्यादि ॥ मिश्र सम्पर्के ॥ ८ ॥ संग्राम युद्धे ॥ अयमनुदात्तेत् । अकारप्रश्लेषात् । अससंग्रामत ॥ ९ ॥ स्तोम श्लाघायाम् । अतुस्तोमत् ॥ १० ॥ छिद्र कर्णभेदने ॥ करणभेदन इत्यन्ये । कर्णेति धात्वन्तरमित्यन्ये ॥ १२ ॥ अन्ध दृष्ट्युपघाते ॥ उपसंहार इत्यन्ये । आन्दधत् ॥ ॥ १३ ॥ दण्ड दण्डनिपातने ॥ १४ ॥

अंक पदे लक्षणे च ॥ आञ्चकत् ॥ अङ्ग च ॥ आञ्जगत् ॥ १६ ॥ सुख दुःख तत्क्रियायाम् ॥ १८ ॥ रस आस्वादनस्नेहनयोः ॥ १९ ॥ व्यय वित्तसमुत्सर्गे ॥ अवव्ययत् ॥ २० ॥ रूप रूपक्रियायाम् ॥ रूपस्य दर्शनं करणं वा रूपक्रिया ॥ २१ ॥ छेद द्वैधीकरणे ॥ अचिच्छेदत् ॥ २२ ॥ छद अपवारण इत्येके ॥ छदयति ॥ २३ ॥ लाभ प्रेरणे ॥ २४ ॥ व्रण गात्रविचूर्णने ॥ ॥ २५ ॥ वर्ण वर्णक्रियाविस्तारगुणवचनेषु ॥ वर्णक्रिया वर्णकरणम्, सुवर्णं वर्णयति । कथां वर्णयति । विस्तृणातीत्यर्थः । हरिं वर्णयति । स्तौतीत्यर्थः ॥ २६ ॥ बहुलमेतन्निदर्शनम् ॥ अदन्तधातुनिदर्शनमित्यर्थः । बाहुलकादन्येऽपि बोध्याः ॥ तद्यथा ॥ पर्ण हरितभावे ॥ अपपर्णत् ॥ विष्क दर्शने ॥ क्षप प्रेरणे ॥ वस निवासे ॥ तुत्थ आवरणे ॥ एवमान्दोलयति । प्रेङ्खोलयति । विडम्बयति । अवधीरयतीत्यादि । अन्ये तु दशगणीपाठो बहुलमित्याहुः । तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः । अपरे तु नवगणीपाठो बहुलमित्याहुः । तेनापठितेभ्योऽपि क्वचित्स्वार्थे णिच् । रामो राज्यमचीकरदिति यथेत्याहुः । चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये । सर्वे पक्षाः प्राचां ग्रन्थे स्थिताः ॥ णिङङ्गान्निरसने ॥ अङ्गवाचिनः प्रातिपदिकान्निरसनेऽर्थे णिङ् स्यात् । हस्तौ निरस्यति–हस्तयते । पादयते । श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च ॥ श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते णिङ् च धात्वर्थे । श्वेताश्वमाचष्टे तेनातिक्रामति वा श्वेतयते । अश्वतरमाचष्टेऽश्वयते । गालोडितं वाचां विमर्शः । तत्करोति गालोडयते । आह्वरयते । केचित्तु णिचमेवानुवर्तयन्ति तन्मते परस्मैपदमपि ॥ पुच्छादिषु धात्वर्थ इत्येव सिद्धम् ॥ णिजन्तादेव बहुलवचनादात्मनेपदमस्तु । मास्तु पुच्छभाण्डेति णिङ्विधिः । सिद्धशब्दो ग्रथान्ते मङ्गलार्थः ॥

॥ इति चुरादिः ॥

२५७४–च्विण् और णल् छोडकर ञित् और णित् प्रत्यय परे रहते हन् धातुको तकार अन्तादेश हो ।

यहां सन्देह है कि, अंगसंज्ञा और धातुसंज्ञा कंसविशिष्ट वधको प्राप्त है, तब अडागम और द्वित्वविषयमें (कंसवधको अडागम और क शब्दको द्वित्व रूप) दोष होगा और "हो हन्तेः०" इससे कुत्व और "हनस्तो०" इससे तत्व भी नहीं होगा, कारण कि, धातुके स्वरूपका ग्रहण रहनेपर उस धातुसे विहित प्रत्यय परे रहते ही कार्य्य होताहै, यह परिभाषा है, यह सत्य है, परन्तु 'प्रकृतिवच्च' इसमें चकार भिन्नक्रम है अर्थात् 'कारकम्' इससे आगे है, चकारसे कार्य्यका संग्रह हुआ, तत्र हेतुमत् णिच्का प्रकृतिभूत हन् आदि धातुको हेतुमत् णिच् परे रहते यादृश कारक अर्थात् धातुके अनन्तभूत द्वितीयान्त और यादृश कार्य्य अर्थात् कुत्व तत्व आदि होतेहैं वैसे ही यहां धात्वर्थणिच्में भी धातुके अनन्तर्भूत द्वितीयान्त और कुत्व तत्व होंगे–कंसमजीघतत् ।

"कर्तृकरणाद्धात्वर्थे" कर्ताके व्यापारार्थ जो करण उसके उत्तर णिच् हो । यह चक्षुरादिमात्र करणके उत्तर नहीं होगा, किन्तु सबसे होगा । असिना हन्ति, इस विग्रहमें असयति ॥ बष्क धातु दर्शनमें है ॥ चित्र धातु चित्र करनेमें है ॥

कहीं अद्भुत दर्शनमें चित्र धातुसे णिच् हो । चित्रयति ॥ अंस धातु समाघातार्थमें है । वट धातु विभाग करनेमें है ॥ लज धातु प्रकाश करनेमें है ॥ वटि धातु और लजि धातु हैं, यह किसी २ पंडितका मत है । वण्टयति । लञ्जयति । अदन्तमें पाठ होनेके कारण अदन्त होनेसे वृद्धि होगी, यह किसी पंडितका मत है, वण्टापयति । लञ्जापयति । शाकटायनमतसे तो कथ आदि सम्पूर्ण धातुओंको पुक् होगा, कथापयति । गणापयति, इत्यादि ॥ मिश्र धातु सम्पर्कमें है ॥ संग्राम धातु युद्धमें है । अकारप्रश्लेषके कारण यह धातु आत्मनेपदी है । अससंग्रामत ॥ स्तोम धातु श्लाघामें है । अतुस्तोमत् ॥ छिद्र धातु कर्णभेदनमें है । कोई २ कहतेहैं करणभेदनमें है । अन्यमतसे 'कर्ण' यह भिन्न धातु है ॥ अन्ध धातु दृष्टिके उपघातमें है । किसीके मतसे उपसंहारमें है । आन्दधत् ॥ दण्ड धातु दण्डनिपातनमें है ॥ अंक धातु पद और लक्षणमें है । आञ्चकत् ॥ अङ्ग धातु भी उक्तार्थक है । आञ्जगत् ॥ सुख धातु और दुःख धातु सुखी और दुःखी करनेमें हैं ॥ रस धातु आस्वादन और स्नेहमें है ॥ व्यय धातु धनव्यय करनेमें है । अवव्ययत् । रूप धातु रूपक्रिया, अर्थात् रूपके दर्शन और करणमें है ॥ छेद धातु द्विधा करनेमें है । अचिच्छेदत् ॥ छद धातु अपवारणमें है । छदयति ॥ लाभ धातु प्रेरणमें ॥ व्रण धातु गात्रविचूर्णनमें है ॥ वर्ण धातु वर्णक्रिया, विस्तार और गुणवचनमें है । वर्णक्रिया शब्दसे वर्णकरण समझना । सुवर्णं वर्णयति । कथां वर्णयति, अर्थात् विस्तार करताहै । हरिं वर्णयति, अर्थात् स्तव करताहै ।

अदन्त धातुके निदर्शन (पाठ) बहुल प्रकारसे है । बहुल ग्रहणसे इसके अतिरिक्त धातु भी अदन्तमें जानना, यथा–पर्ण धातु हरितभावमें है । अपपर्णत् ॥ विष्क धातु दर्शनमें है । क्षप धातु प्रेरणमें है ॥ वस धातु निवासमें है । तुत्थ धातु आवरणमें है ॥ इसी प्रकार आन्दोलयति । प्रेङ्खोलयति । विडम्बयति । अवधीरयति, इत्यादि जानना ।

अन्य पंडित लोग दशगणीपाठ बहुल करके है ऐसा कहते हैं, इससे उक्त गणोंमें अपठित भी अनेक सूत्रोक्त, लौकिक और वैदिक धातुओंका संग्रह हुआ । कितने पंडित तो नव-

गणी पाठ बहुल करके कहतेहैं, इससे अपठित धातुओंके भी उत्तर कहीं २ स्वार्थमें णिच् होगा, यथा—'रामो राज्यमचीकरत्' कोई कहतेहैं कि, चुरादिगणमें पठित धातुके ही उत्तर भी कभी णिच् हो कभी नहीं हो, यह सम्पूर्ण पक्ष प्राचीनोंके ग्रन्थमें पठित हैं ।

अङ्गवाचक प्रातिपदिकके उत्तर निरसनार्थमें णिङ् हो, हस्तौ निरस्यति=हस्तयते । पादयते ।

श्वेताश्व, अश्वतर, गालोडित और आह्वरक शब्दके उत्तर धात्वर्थमें णिङ् हो और श्वेताश्व पदमें अश्वपदका, अश्वतर शब्दमें तर प्रत्ययका, गालोडित पदमें इत भागका और आह्वरक शब्दके ककारका लोप हो, यथा—श्वेताश्वमाचष्टे तेनाति क्रामति वा, इस विग्रहमें श्वेतयते । अश्वतरमाचष्टे, इस विग्रहमें अश्वयते । गालोडित शब्दसे वाणीका विमर्श जानना । तत्करोति—गालोडयते। आह्वरयते । कोई२ इस स्थलमें णिच्का ही अनुवर्त्तन करतेहैं, उनके मतसे परस्मैपद भी होगा ।

पुच्छादिमें प्रातिपदिकाद्धात्वर्थे इसीसे धात्वर्थमें णिच् और णिजन्तसे ही बहुलवचनसे आत्मनेपद सिद्ध होगा, फिर "पुच्छभाण्ड० २६७६" यह सूत्र नहीं करना चाहिये । ग्रन्थान्तमें सिद्ध शब्द मङ्गलार्थ है ॥

॥ इति तिङन्ते चुरादिप्रकरणम् ॥

अथ ण्यन्तप्रक्रिया ।

२५७५ तत्प्रयोजको हेतुश्च ।१।४।५५॥

कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात् ॥

२५७५-कर्त्ताके प्रयोजककी हेतुसंज्ञा और कर्त्तृसंज्ञा हो ॥

२५७६ हेतुमति च । ३ । १ । २६ ॥

प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात् । भवन्तं प्रेरयति भावयति । णिचश्चेति कर्तृगे फले आत्मनेपदम् । भावयते । भावयांबभूव ॥

२५७६-प्रयोजक व्यापारमें प्रेषणादि अर्थ होनेपर धातुके उत्तर णिच् हो, भवन्तं प्रेरयति=भावयति । "णिचश्च२५६४" इस सूत्रसे कर्तृगामी क्रियाफल होनेपर आत्मनेपद होगा, भावयते । भावयाम्बभूवे ॥

२५७७ ओः पुयण्ज्यपरे । ७।४।८० ॥

सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्वं स्यात्पवर्गयणजकारेष्ववर्णपरेषु परतः । अबीभवत् । अपीपवत् । मूङ् । अमीमवत् । अयीयवत् । अरीरवत्। अलीलवत्। अजीजवत् ॥

२२७७-अवर्णपरक पवर्ग, यण् और जकार परे रहते सन् परे जो अङ्ग उसके अवयव अभ्याससम्बन्धी उकारके स्थानमें इकार हो, अबीभवत् । अपीपवत् । मूङ् अमीमवत् । अयीयवत् । अरीरवत् । अलीलवत् । अजीजवत् ॥

२५७८ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा । ७।४। ८१ ॥

एषामभ्यासोकारस्य इत्त्वं वा स्यात्सन्यवर्णपरे धात्वक्षरे परे । असिस्रवत्। असुस्रवत्। नाग्लोपात हृस्वनिषेधः । अशशासत् । अडुढौकत् । अचीचकासत् । मतान्तरे । अचचकासत् । अग्लोपीति सुब्धातुप्रकरणे उदाहरिष्यते । ण्यन्ताण्णिच् । पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपः। चोरयति। णौ चङीति हृस्वः। दीर्घो लघोः । न चाग्लोपित्वाद्द्वयोरप्यसम्भवः। ण्याकृतिनिर्देशात् । अचूचुरत् ॥

२५७८-सन् और अवर्ण परे है जिसके ऐसे धात्वक्षर परे रहते सु, श्रु, द्रु, प्रु, प्लु और च्यु धातुके अभ्यासावयव उकारके स्थानमें विकल्प करके इकार हो, असिस्रवत्, असुस्रवत् । "नाग्लोपि०" इस सूत्रसे हृस्व नहीं होकर—अशशासत्। अडुढौकत् । अचीचकासत् । मतान्तरमें, अचचकासत्। अग्लोपी धातुका उदाहरण नामधातुके प्रकरणमें दिया जायगा। ण्यन्त चुर धातुके उत्तर हेतुमत् णिच् पश्चात् पूर्वविप्रतिषेधके कारण और अपवादत्वके कारण वृद्धिको बाध करके णिच्का लोप होकर—चोरयति ।

लुङ्में "णौ चङि०२३१४" इस सूत्रसे हृस्व और "दीर्घो लघोः २३१८" इस सूत्रसे दीर्घ होगा । यदि कहो कि, अग्लोपित्वके कारण दोनोंको अर्थात् उक्त सूत्रोंसे उपधाको हृस्व और अभ्यासको दीर्घ होना असम्भव है वह नहीं कहसकते, कारण कि, 'चङ्परे णौ' यहां णिको चङ्परक णित्वजात्याश्रय एक अथवा अनेक णिच् व्यक्तिपरत्व है, इससे णित्वजात्यवच्छिन्न परे अग्लोपी न होनेसे उक्त कार्य्य होंगे । अचूचुरत् ॥

२५७९ णौ च संश्चङोः । ६ । १।३१॥

सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात् । सम्प्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात्सम्प्रसारणं पूर्वरूपम् । अशूशवत् । अलघुत्वान्न दीर्घः । अशिश्वयत् ॥

२५७९-सन् और चङ् परे है जिससे ऐसे णिच् परे रहते श्वि धातुको विकल्प करके सम्प्रसारण हो । 'संप्रसारणं तदाश्रयकार्य्यञ्च बलवत्' अर्थात् सम्प्रसारण और तदाश्रय कार्य बलवान् होताहै, इस परिभाषासे सम्प्रसारण और पूर्वरूप होकर—अशूशवत् । अलघुत्वके कारण दीर्घ न होकर—अशिश्वयत् ॥

२५८० स्तम्भुसिवुसहां चङि ।८। ३ । ११६ ॥

उपसर्गस्थान्निमित्तादेषां सस्य षो न स्याच्चङि । अवातस्तम्भत् । पर्यसीषिवत् । न्यसी-

षहत्। आटिटत्। आशिशत्। बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात्प्रागेव। ओणेर्ऋदित्करणाल्लिङ्गात्। मा भवानिदिधत्। एजादावेधतौ विधानान्न वृद्धिः। मा भवान्प्रेदिधत्। नन्द्रा इति नदराणां न द्वित्वम्। औन्दिदत्। आड्डिडत्। आर्चिचत्। उब्ज आर्जवे। उपदेशे दकारोपधः। भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपातनाद्स्य बः। स चान्तरङ्गोऽपि द्वित्वविषये नन्द्रा इति निषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्तते न तु ततः प्राक्। दकारोच्चारणसामर्थ्यात्। औब्जिजत्। अजादेरित्येव नेह। अदिद्रपत्॥

२५८०-चङ् परे रहते उपसर्गस्थ निमित्तके परे स्थित स्तम्भु, सिवु और सह धातुके सकारको षत्व न हो, अवातस्तम्भत्। पर्य्यसीषिवत्। न्यसीषहत्। आटिटत्। आशिशत्।

औणृ धातुमें ऋकारके इत् करनेके कारण बहिरङ्ग होनेपर भी द्वित्वके पूर्वमें ही उपधा ह्रस्व होगा, नहीं तो पहले अजादि धातुके द्वितीय एकाच् णि शब्दको द्वित्व होनेपर उपधाको ह्रस्वकी प्राप्ति ही नहीं है, फिर उसके प्रतिषेधके निमित्त ओणृ धातुका ऋकार इत् करना व्यर्थ ही होजाता, मा भवान् इदिधत्। एजादि एध धातु परे वृद्धिविधानके कारण यहां वृद्धि नहीं होगी, मा भवान् प्रेदिधत्। "नन्द्रा० २४४६" इस सूत्रसे न, द और रकारको द्वित्व न होकर- औन्दिदत्। आड्डिड। आर्चिचत्॥

उब्ज धातु सरलतामें है, उपदेशमें यह धातु दकारोपध है, "भुजन्युब्जौ पाण्युपतापयोः २८७७" इस सूत्रमें निपातनसे दकारके स्थानमें धकार हुआहै, वह अन्तरङ्ग होनेपर भी द्वित्वविषयमें "नन्द्रा० २४४६" इस सूत्रसे निषेधके कारण जि शब्दको द्वित्व होनेपर प्रवृत्त होगा, दकारोच्चारण सामर्थ्यके कारण उसके पूर्वमें नहीं होगा, औब्जिजत्।

"नन्द्रा०" इस सूत्रमें "अजादेर्द्वितीयस्य" इसकी अनुवृत्ति होनेसे आदिभूत अच्के परे ही न, द और रकारको द्वित्व नहीं होगा, इससे 'अदिद्रयत्' यहां दकारको द्वित्व हुआ॥

२५८१ रभेरशब्लिटोः। ७। १। ६३॥

रभेर्नुम् स्यादचि। न तु शब्लिटोः। अररम्भत्॥

२५८१-अच् परे रहते रभ धातुको नुम्का आगम हो, शप् और लिट् परे रहते न हो, अररम्भत्॥

२५८२ लभेश्च। ७। १। ६४॥

अललम्भत्। हेरचङीति सूत्रेऽचङीत्युक्तेः कुत्वं न। अजीहयत्। अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्। असस्मरत्। अददरत्। तपरत्वसामर्थ्यादत्र लघोर्न दीर्घः॥

२५८२-अच् परे रहते लभ धातुको भी नुम्का आगम हो, शप् और लिट् परे न हो-अललम्भत्। "हेरचङि २५३१" इस सूत्रमें "अचङि" ऐसा प्रतिषेध होनेसे कुत्व नहीं होकर-अजीहयत्। "अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् २५६६" इस सूत्रसे अत्व होकर-असस्मरत्। अददरत्। अत्‌में तपरत्वके कारण यहां लघु अभ्यासको दीर्घ नहीं हुआ॥

२५८३ विभाषा वेष्टिचेष्ट्योः। ७। ४। ९६॥

अभ्यासस्यात्वं वा स्याच्चङ्परे णौ। अववेष्टत्-अविवेष्टत्। अचचेष्टत्-अचिचेष्टत्। भ्राजभासेत्यादिना वोपधाह्रस्वः। अबिभ्रजत्-अबभ्राजत्॥ काण्यादीनां वेति वक्तव्यम्॥ * ॥ ण्यन्ताः कणरणभणश्रणलुपहेठः काण्यादयः षड् भाष्ये उक्ताः। ह्वायिवाणिलोटिलोपयश्चत्वारोऽधिका न्यासे। चाणिलोठी अप्यन्यत्र। इत्थं द्वादश। अचीकणत्। अचकाणत्॥

२५८३-चङ्परक णि परे रहते चेष्ट और वेष्ट धातुके अभ्यासको विकल्प करके अकार हो-अववेष्टत्, अविवेष्टत्। अचचेष्टत्, अचिचेष्टत्। 'भ्राजभास० २५६५' इस सूत्रसे विकल्प करके उपधाको ह्रस्व होकर-अबिभ्रजत्, अबभ्राजत्।

काण्यादि धातुओंकी भी उपधाको विकल्प करके ह्रस्व हो * ण्यन्त-कण, रण, भण, श्रण, लुप और हेठ इन ६ धातुओंको भाष्यकारने काण्यादि कहा है, न्यासकारने ह्वायि, वाणि, लोटि और लोपि, इन चार अधिक धातुओंको भी काण्यादि कहाहै, अन्यमतसे चाणि और लोठि धातुभी काण्यादि हैं। इस प्रकार काण्यादि १२ धातु हैं। अचीकणत्, अचकाणत्॥

२५८४ स्वापेश्चङि। ६। १। १८॥

ण्यन्तस्य स्वापेश्चङि सम्प्रसारणं स्यात्। असूषुपत्॥

२५८४-चङ् परे रहते णिजन्त स्वप् धातुको सम्प्रसारण हो, असूषुपत्॥

२५८५ शाच्छासाह्वाव्यावेपां युक्। ७। ३। ३७॥

णौ। पुकोऽपवादः। शाययति। ह्वाययति॥

२५८५-णिच् परे रहते शो, छो, सो, ह्वेञ्, व्येञ् वेञ् और पा धातुको युक्का आगम हो, यह पुगागमका विशेषक है। शाययति। ह्वाययति। सूत्रमें शा छा, इत्यादि आकारान्त निर्देश पुक् आगमकी प्राप्तिकी सूचना करताहै, उसका प्रयोजन तो यह है कि, इस प्रकरणमें "लक्षणप्रतिपदोक्त०" परिभाषाकी प्रवृत्ति नहीं होगी, इस कारण अध्यापयति, क्षापयति, इत्यादि पद सिद्ध हुए॥

२५८६ ह्वः सम्प्रसारणम्। ६। १। ३२॥

सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं स्यात्। अजूहवत्-अजुहावत्॥

२५८६-सन्परक और चङ्परक णि परे रहते ह्वेञ् धातुको सम्प्रसारण हो, अजूहवत्, अजुहावत्, यहां ह्वायि, वाणि, इत्यादि न्यासकारोक्त काण्यादिके अनुसार विकल्प करके उपधाको ह्रस्व हुआ ॥

२५८७ लोपः पिबतेरीच्चाभ्यासस्य। ७।४।४॥

पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्च चङ्परे णौ । अपीप्यत् । अर्तिह्रीति पुक् । अर्पयति । ह्रेपयति । व्लेपयति । रेपयति । यलोपः । क्नोपयति । क्ष्मापयति । स्थापयति ॥

२५८७-चङ्परक णि परे रहते पा धातुकी उपधाका लोप हो, और अभ्यासको ईत् अन्तादेश हो, अपीप्यत् । "अर्त्ति ह्री० २५७०" इस सूत्रसे पुक्का आगम होकर-अर्पयति । ह्रेपयति । व्लेपयति । रेपयति । यकारका लोप होकर-क्नोपयति । क्ष्मापयति । स्थापयति ॥

२५८८ तिष्ठतेरित् । ७।४।५॥

उपधाया इदादेशः स्याच्चङ्परे णौ । अतिष्ठिपत् ॥

२५८८-चङ्परक णि परे रहते स्था धातुकी उपधाके स्थानमें इत् आदेश हो, अतिष्ठिपत् ॥

२५८९ जिघ्रतेर्वा । ७।४।६॥

अजिघ्रिपत्-अजिघ्रपत् ॥ उर्ऋत् ॥ अचीकृतत्-अचिकीर्त्तत् । अवीवृतत्-अववर्त्तत् । अमीमृजत्-अममार्जत्॥पातेर्णौ लुग्वक्तव्यः *॥ पुकोऽपवादः । पालयति ॥

२५८९-चङ्परक णि परे रहते घ्रा धातुकी उपधाको विकल्प करके इत् आदेश हो, अजिघ्रिपत्, अजिघ्रपत् । "उर्ऋत् २५६७" इस सूत्रसे उपधाभूत ऋवर्णके स्थानमें ऋत् होकर-अचीकृतत्, अचिकीर्तत् । अवीवृतत्, अववर्तत्। अमीमृजत्, अममार्जत् ।

णिच् परे रहते पा धातुकी लुक्का आगम हो * यह लुगागम पुगागमका विशेषक है, पालयति ॥

२५९० वो विधूनने जुक् ।७।३।३८॥

वातेर्जुक् स्याण्णौ कम्पेऽर्थे । वाजयति । कम्पे किम् । केशान्वापयति । विभाषा लीयतेः ॥

२५९०-कम्प अर्थ होनेपर णिच् परे रहते वा धातुको जुक्का आगम हो, वाजयति । कम्पभिन्नार्थमें 'केशान् वापयति' इस स्थलमें जुगागम न होकर पुगागम हुआहै । "विभाषा लीयतेः २५०९" इससे आत्व विकल्प पक्षमें ॥

२५९१ लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने । ७।३।३९॥

लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ वा स्तो णौ स्नेहद्रवे । विलीनयति-विलापयति-विलाययति। विलालयति-विलापयति वा घृतम्।ली ई इति ईकारप्रश्लेषादात्वपक्षे नुक् न ॥ स्नेहद्रवे किम् । लोहं विलापयति-विलाययति ॥ प्रलम्भनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम् ॥ * ॥

२५९१-स्नेहद्रव निपातन, अर्थात् स्नेहद्रव होनेपर ली और ला धातुको क्रमसे नुक् और लुक् आगम विकल्प करके हो, विलीनयति,विलापयति,विलाययति, विलालयति, विलापयति वा घृतम्" 'ली ई' ऐसे ईकारप्रश्लेषके कारण आत्व होनेपर नुक् नहीं होगा । स्नेहद्रव न होनेपर लोहं विलापयति ।

शित्भिन्न प्रत्यय परे रहते प्रलम्भन, अभिभव और पूजार्थमें ली धातुको नित्य आकार हो * ॥

२५९२ लियः संमाननशालीनीकरणयोश्च । १ । ३ । ७० ॥

लीङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे ॥ जटाभिर्लापयते । पूजामधिगच्छतीत्यर्थः । श्येनो वर्तिकामुल्लापयते । अभिभवतीत्यर्थः । बालमुल्लापयते । वञ्चयतीत्यर्थः ॥

२५९२-पूजा, अभिभव और प्रलम्भनार्थमें क्रियाका फल कर्तृगामि न होनेपर भी णिजन्त लीङ् और ली धातुसे आत्मनेपद हो, जटाभिर्लापयते, अर्थात् पूजाको प्राप्त होताहै । श्येनो वर्त्तिकामुल्लापयते, अर्थात् श्येनपक्षी वर्त्तिकाको अभिभूत करताहै । बालमुल्लापयते, अर्थात् बालकको वञ्चित करताहै ॥

२५९३ बिभेतेर्हेतुभये । ६ । १ ।५६ ॥

बिभेतेरेच आत्वं वा स्यात्प्रयोजकाद्भयं चेत्॥

२५९३-यदि प्रयोजकसे भय हो तो भी धातुके एकारके स्थानमें विकल्प करके आकार हो ॥

२५९४ भीस्म्योर्हेतुभये । १ । ३ ।६८॥

ण्यन्ताभ्यामाभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ । सूत्रे भयग्रहणं धात्वर्थोपलक्षणम् । मुण्डो भापयते ॥

२५९४-प्रयोजक (हेतु) से भय और स्मय होनेपर भी और स्मि धातुके उत्तर आत्मनेपद हो, सूत्रमें भय शब्दका ग्रहण धात्वर्थ, अर्थात् स्मि धातुके स्मयरूपार्थ का उपलक्षण है । मुण्डो भापयते ॥

२५९५ भियो हेतुभये षुक् ।७।३।४०॥

भी ई इति ईकारः प्रश्लिष्यते । ईकारान्तस्य भियः षुक् स्यात् णौ हेतुभये । भीषयते ॥

२५९५-णिच् परे रहते हेतुसे भय होनेपर ईकारान्त भी धातुको पुक्का आगम हो । भी धातुमें ईकार प्रश्लिष्ट होनेसे उक्त अर्थ हुआ-भीषयते ॥

२५९६ नित्यं स्मयतेः । ६ । १ । ५७॥

स्मयतेरेचो नित्यमात्त्वं स्याण्णौ हेतोः स्मये। जटिलो विस्मापयते । हेतोश्चेद्भयस्मयावित्युक्तेर्नेह । कुञ्चिकयैनं भाययति । विस्माययति । कथं तर्हि विस्मापयन् विस्मितमात्मवृत्ताविति। मनुष्यवाचेति करणादेव हि तत्र स्मयः । अन्यथा शानजपि स्यात् । सत्यम् । विस्माययन्नित्येव पाठ इति साम्प्रदायिकाः । यद्वा । मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते तया सिंहो विस्मापयन्निति ण्यन्ताण्णौ शतेति व्याख्येयम्॥

२५९६-प्रयोजकसे स्मय होनेपर स्मि धातुके एच्के स्थान-में नित्य आकार हो णिच् परे रहते, जटिलो विस्मापयते । पूर्वसूत्रमें 'हेतोश्चेद्भयस्मयौ' ऐसा कहनेके कारण'कुञ्चिकया एनं भाययति-विस्माययति, इस स्थलमें आत्व और आत्मनेपद नहीं हुआ ।

हेतुसे स्मय रहते ही आत्व और आत्मनेपद होनेसे 'विस्मापयन् विस्मितमात्मवृत्तौ' इस स्थलमें किस प्रकारसे आत्व हुआ, क्योंकि, उक्त स्थलमें विस्मय 'मनुष्यवाचा' इस करणसे ही उत्पन्न होताहै, ऐसा न तो शानच् भी हो जायगा। सत्य है, परन्तु इस स्थलमें विस्माययन् ऐसा ही पाठ साम्प्रदायसिद्ध है, अथवा मनुष्यवाक्, यह प्रयोज्यकर्त्री विस्मय करातीहै, उससे सिंह विस्मापित कराके ऐसे णिजन्तसे णिच् अनन्तर शतृ करके उक्त पद सिद्ध हुआहै ॥

२५९७ स्फायो वः । ७ । ३ । ४१ ॥

णौ । स्फावयति ॥

२५९७-णि परे रहते स्फाय धातुको वकार आदेश हो, स्फावयति ॥

२५९८ शदेरगतौ तः । ७ । ३ । ४२ ॥

शदेर्णौ तोऽन्तादेशः स्यान्न तु गतौ । शातयति । गतौ तु । गाः शादयति गोविन्दः । गमयतीत्यर्थः ॥

२५९८-णि परे रहते शद धातुके अन्तमें तकारादेश हो, गति अर्थमें न हो, शातयति । गति अर्थमें 'तो गाः शादयति गोविन्दः' अर्थात् श्रीकृष्ण गौओंको चलातेहैं ॥

२५९९ रुहः पोऽन्यतरस्याम्।७।३।४३॥

णौ ॥ रोपयति-रोहयति ।

२५९९-णि परे रहते रुह धातुके हकारको विकल्प करके पकार आदेश हो-रोपयति, रोहयति ॥

२६०० क्रीङ्जीनां णौ । ६। १ ।४८ ॥

एषामेच आत्त्वं स्याण्णौ । क्रापयति । अध्यापयति । जापयति ॥

२६००-णि परे रहते क्री, इङ् और जी धातुके एच्के स्थानमें आकार हो-क्रापयति । अध्यापयति । जापयति ॥

२६०१ णौ च संश्चङोः ।२। ४ । ५१॥

सन्परे चङ्परे च णौ इङो गाङ्वा स्यात् । अध्यजीगपत्-अध्यापिपत् ॥

२६०१-सन् परक और चङ्परक णि परे रहते इङ् धातु-को विकल्प करके गाङ् आदेश हो, अध्यजीगपत्, अध्यापिपत् ॥

२६०२ सिध्यतेरपारलौकिके६।१।४९॥

ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्त्वं स्याण्णौ । अन्नं साधयति । निष्पादयतीत्यर्थः । अपारलौकिके किम् । तापसः सिध्यति । तत्त्वं निश्चिनोति । तं प्रेरयति सेधयति तापसं तपः॥

२६०२-पारलौकिकभिन्नार्थ, अर्थात् ऐहलौकिकार्थमें विद्यमान सिध धातुके एच्के स्थानमें आकार हो णि परे रहते, अन्नं साधयति, अर्थात् अन्नको निष्पादन करताहै । पारलौकिकार्थमें तो तापसः सिध्यति, अर्थात् तत्वं निश्चिनोति-तं प्रेरयति सेधयति तापसं तपः ॥

२६०३ प्रजने वीयतेः । ६ । १ । ५५॥

अस्यै च आत्त्वं वा स्याण्णौ प्रजनेऽर्थे । वापयति-वाययति वा गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः ॥ ऊदुपधाया गोहः । ६ । ४ ।८९॥ गूहयति ॥

२६०३-णि परे रहते प्रजन, अर्थात् गर्भग्रहणार्थमें वी धातुके एच्के स्थानमें विकल्प करके आकार हो, वापयति, वाययति वा गाः पुरोवातः, गर्भं ग्राहयतीत्यर्थः । "ऊदुपधाया गोहः २३६४" इससे गुह धातुकी उपधाको ऊकार होकर-गूहयति ॥

२६०४ दोषो णौ । ६ । ४ । ९० ॥

दुष इति सुवचम् । दुष्यतेरुपधाया ऊत्स्याण्णौ । दूषयति ॥

२६०४-णि परे रहते दुष धातुकी उपधांको ऊकार हो । 'दुषः' ऐसा कहनेपर भी कोई दोष नहीं होगा । दूषयति ॥

२६०५ वा चित्तविरागे । ६ । ४।९१॥

विरागोऽप्रीतता । चित्तं दूषयति-दोषयति वा कामः । मितां ह्रस्वः । भ्वादौ चुरादौ च मित उक्ताः । घटयति । जनीजॄष् । जनयति । जरयति । ज्ञपणातेस्तु । जारयति ॥ रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः ॥ * ॥ मृगरमणमाखेटकम । रजयति मृगान् । मृगेति किम् । रञ्जयति पक्षिणः। रमणादन्यत्र तु रञ्जयति मृ-

गांस्तृणदानेन। चुरादिषु ज्ञपादिश्चिञ् चिस्फुरोर्णौ। चपयति-चययतीत्युक्तम्। चिनोतेस्तु। चापयति-चाययति। स्फारयति-स्फोरयति। अपुस्फरत्-अपुस्फुरत् ॥

२६०५-चित्तविराग अर्थ होनेपर दुष धातुकी उपधाको ऊकार हो णि परे रहते। विराग शब्दसे अप्रीतता समझना। चित्तं दूषयति,दोषयति वा कामः। "मितां ह्रस्वः२५६८"इस सूत्रसे मित् धातुको ह्रस्व होगा। भ्वादि और चुरादिगणमें मित्संज्ञक धातु उक्त है।उससे णिच् करनेपर-घटयति। "जनीजॄष०" इससे मित्संज्ञा होकर-जनयति। जरयति। क्र्यादिक जॄ धातुका तो 'जारयति' ऐसा रूप होगा ॥

मृगरमणार्थमें रञ्ज धातुके नकारका लोप हो णि परे रहते* मृगरमण, अर्थात् मृगया। रजयति मृगान्।मृगरमणार्थ न होनेपर-रञ्जयति पक्षिणः। रमणभिन्नार्थमें तो रञ्जयति मृगान् तृणदानेन। चुरादिगणमें ज्ञपादि धातुओंके मध्यमें चिञ् धातु पठित है, उसको णिच् परे रहते "चिस्फुरोर्णौ २५६९" इससे विकल्प करके आत्व होकर-'चपयति, चययति' ऐसा रूप कहचुके हैं। स्वादिक चिञ् धातुके तो चापयति, चाययति ऐसे रूप होंगे। स्फारयति, स्फोरयति। अपुस्फरत्, अपुस्फुरत् ॥

२६०६ उभौ साभ्यासस्य। ८।४।२१॥

साभ्यासस्यानितरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति। प्राणिणत् ॥

२६०६-णत्वका निमित्त रहते अभ्यासविशिष्ट अन धातुके दोनों नकारको णत्व हो, प्राणिणत् ॥

२६०७ णौ गमिरबोधने। २। ४।४६॥

इणो गमिः स्याण्णौ। गमयति। बोधने तु प्रत्याययति। इण्वदिकः। अधिगमयति। हनस्तोऽचिण्णलोः। हो हन्तेरिति कुत्वम्।घातयति ॥ ईर्ष्यतेस्तृतीयस्येति वक्तव्यम् ॥ * ॥ तृतीयव्यञ्जनस्य तृतीयैकाच इति वार्थः। आद्ये षकारस्य द्वित्वं वारयितुमिदम्। द्वितीये त्वजादेर्द्वितीयस्येत्यस्यापवादतया सन्नन्ते प्रवर्तते। ऐर्ष्यियत्। ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजन्ताच्चङि षकार एवाभ्यासे श्रूयते। हलादिःशेषात्। द्वित्वं तु द्वितीयस्यैव। तृतीयाभावेन प्रकृतवार्तिकाप्रवृत्तेः। निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ शुद्धेन तुल्योऽर्थःतिन प्रार्थयन्ति शयनोत्थितं प्रिया इत्यादि सिद्धम्। एवं सकर्मकेषु सर्वेषूह्यम् ॥

॥ इति ण्यन्तप्रक्रिया ॥

२६०७-णि परे रहते अबोधनार्थ होनेपर इण् धातुके स्थानमें गमि आदेश हो-गमयति। बोधनार्थ होनेपर तो प्रत्याययति।इण् धातुके समान इक् धातुको भी कार्य हो-अधिगमयति। "हनस्तोऽचिण्णलोः २५७४" इस सूत्रसे हन् धातुके अन्तमें तकारादेश हुआ, "हो हन्तेः०" इस सूत्रसे कुत्व अर्थात् हन् धातुके हके स्थानमें घ हुआ। घातयति ॥

ईर्ष्य धातुके तृतीय व्यञ्जन वर्णको द्वित्व हो, अथवा तृतीय स्वर वर्णको द्वित्व हो* पहिली व्याख्या षकारके द्वित्ववारणार्थ कियाहै, दूसरी "अजादेर्द्वितीयस्य" इसके अपवादके कारण सन्नन्त धातुमें प्रवृत्त होगी। ऐर्ष्यियत्, ऐर्षिष्यत्। दूसरी व्याख्यामें णिजन्तके उत्तर चङ् परे रहते हलादिःशेषके कारण अभ्यासमें षकार ही श्रुत होगा, प्रकृत वार्तिक प्रवर्तित न होगा ॥

निवृत्त प्रेरणार्थमें धातुके उत्तर हेतुमत् णिच् करनेपर केवल धातुके साथ तुल्यार्थमें अर्थात् णिच् न करनेपर भी जैसा अर्थ होगा उस स्थलमें णिच् करनेपर उसी प्रकार अर्थ होगा, इससे ऐसा फल हुआ कि, "प्रार्थयन्ति शयनोत्थितं प्रियाः" इत्यादि पद सिद्ध हुएहैं, इसी प्रकार सकर्मक सम्पूर्ण धातुओंमें ऊह करना चाहिये ॥

॥ इति णिजन्तप्रकरणम् ॥

अथ सन्नन्तप्रक्रिया।

२६०८ धातोः कर्मणः समानकर्तृकादिच्छायां वा। ३। १। ७॥

इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्। धातोर्विहितत्वादिह सन आर्धधातुकत्वम्। इट्। द्वित्वम् ॥ सन्यतः। पठितुमिच्छति पिपठिषति। कर्मणः किम्। गमनेनेच्छतीति करणान्मा भूत्। समानकर्तृकात्किम्। शिष्याः पठन्त्वितीच्छति गुरुः। वाग्रहणात्पक्षे वाक्यमपि। लुङ्सनोर्घस्लृ। एकाच उपदेश इति नेट्। सस्य तत्वम्। अत्तुमिच्छति जिघत्सति। ईर्ष्यतेस्तृतीयस्येति यिसनोर्द्वित्वम्। ईर्ष्यियिषति। ईर्ष्यिषिषति ॥

२६०८-इषि धातुके साथ समानकर्तृक इषि धातुके कर्मीभूत धातुके उत्तर इच्छार्थमें विकल्प करके सन् प्रत्यय हो। धातुके उत्तर विहित होनेके कारण सन्को आर्धधातुकत्व अर्थात् आर्धधातुक संज्ञा हुई, इट् हुआ, पश्चात् द्वित्व हुआ, अभ्यासके अकारके स्थानमें इकार हुआ,सन् परे रहते(२३१७) पठितुमिच्छति=पिपठिषति।

कर्म न होनेपर अर्थात् करणादि होनेपर सन् नहीं होगा। गमनेन इच्छति-इस स्थलमें करण होनेके कारण सन् नहीं हुआ।

समानकर्तृक न होनेपर सन् न होगा, जैसे-शिष्याः पठन्तु इच्छति गुरुः। वाशब्दका ग्रहण करनेसे सन्के विकल्प पक्षमें वाक्यमात्र ही होगा।

लुङ् और सन् परे रहते अद धातुके स्थानमें घस्लृ आदेश हो (२४२७) " एकाच उपदेशे० २२४६ "

इस सूत्रसे इट्का निषेध हुआ, सकारके स्थानमें तकार हुआ-अत्तुमिच्छति=जिघत्सति । " ईर्ष्यतेस्तृतीयस्य " इस वार्त्तिकसे यि और सन्को द्वित्व हुआ-ईर्ष्यियिषति । ईर्ष्यिषिषति ॥

२६०९ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च । १ । २ । ८ ॥

एभ्यः संश्च क्त्वा च कितौ स्तः । रुरुदिषति । विविदिषति । मुमुदिषति ॥

२६०९-रुद, विद, मुष, ग्रह, स्वप और प्रच्छ धातुके उत्तर सन् और चकारसे क्त्वा प्रत्ययकी कित्संज्ञा हो । रुरुदिषति । विविदिषति । मुमुदिषति ॥

२६१० सनि ग्रहगुहोश्च ।७।२।१२॥

ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात् । ग्रहिज्येति सम्प्रसारणम् । सनः षत्वस्यासिद्धत्वाद्भष्भावः । जिघृक्षति । सुघुक्षति ॥

२६१०-ग्रह धातु, गुह धातु और उगन्त धातुके उत्तर स्थित सन्को इट् न हो । "ग्रहिज्या० २४१२" इस सूत्रसे सम्प्रसारण हुआ, सन्के सकारके षत्वके असिद्धत्वके कारण भष्भाव हुआ-जिघृक्षति । घुघुक्षति ॥

२६११ किरश्च पञ्चभ्यः ।७।२।७५॥

कॄ गॄ दृङ् धृङ् प्रच्छ एभ्यः सन इट् स्यात् । पिपृच्छिषति । चिकरिषति । जिगरिषति, जिगलिषति ॥ अचेटो दीर्घो नेष्टः ॥ दिदरिषते । दिधरिषते । कथमुद्दिधीर्षुरिति । भौवादिकयोर्धृङ्धृञोरिति गृहाण ॥

२६११-कॄ, गॄ, दृङ्, धृङ् और प्रच्छ धातुके उत्तर स्थित सन्को इट् हो । पिपृच्छिषति । चिकरिषति । जिगरिषति, जिगलिषति । इस स्थलमें "वॄतो वा" इससे इट्को दीर्घ होना इष्ट नहीं है ।

दिदरिषते । दिधरिषते । अब शंका करतेहैं कि, ' उद्दिधीर्षुः ' पद किस प्रकारसे सिद्ध हुआ ? कारण कि, उक्त सूत्रसे इट् होकर ' उद्दिधरिषुः ' ऐसा होना चाहिये था ? समाधान-यह भौवादिक धृङ् और धृञ् धातुका रूप है । पिपृच्छिषति ॥

२६१२ इको झल् । १ । २ । ९ ॥

इगन्ताज्झलादिः सन् कित्स्यात् । बुभूषति । दीङ् । दातुमिच्छति दिदीषते । एज्विषयत्वाभावान्मीनातिमिनोतीत्यात्वं न । अत एव सनि मीमेति सूत्रे मा धातोः पृथङ्मीग्रहणं कृतम् ॥

२६१२-इगन्त धातुके उत्तर झलादि सन् प्रत्ययकी कित्संज्ञा हो । बुभूषति ॥ दीङ् धातु यथा-दातुमिच्छति=दिदीषते । एच् विषयत्वके अभावके कारण " मीनाति मिनोति० २५०८ " इस सूत्रसे इस स्थलमें आत्व नहीं होगा, इस कारण " सनि मीमा० २६२३ " इस सूत्रमें मा धातुसे पृथक् मी धातुका ग्रहण किया है ॥

२६१३ हलन्ताच्च । १ । २ । १० ॥

इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् । गुहू । जुघुक्षति । बिभित्सति । इकः किम् । यियक्षते । झलिकिम् । विवर्धिषते । हल्ग्रहणं जातिपरम् । तृंहू-तितृक्षति । तितृंहिषति ॥

२६१३-इक्के समीपस्थ हल्के परे स्थित जो झलादि सन् प्रत्यय उसकी कित्संज्ञा हो । गुहू धातु-जुघुक्षति । बिभित्सति । इक्के समीपस्थ न होनेपर यियक्षते । झलादि न होनेपर विवर्द्धिषते । इस सूत्रमें हल् ग्रहण जातिपर है इससे यहांभी कित्त्व हुआ जैसे-तृंहू धातु-तितृक्षति, तितृंहिषति ॥

२६१४ अज्झनगमां सनि ।६।४।१६॥

अजन्तानां हन्तेरजादेशगमेश्च दीर्घः स्याज्झलादौ सनि । सन्लिटोर्जेः । जिगीषति । विभाषा चेः । चिकीषति-चिचीषति । जिघांसति ॥

२६१४ झलादि सन् प्रत्यय परे रहते अजन्त धातुके हन् धातुको तथा अजादेश अर्थात् अच्के स्थानमें आदिष्ट गम धातुको दीर्घ हो । " सन् लिटोर्जेः २३३१ " यहां यह सूत्र स्मरणार्थ है । जिगीषति । " विभाषा चेः० २५२५ " चिकीषति, चिचीषति । जिघांसति ॥

२६१५ सनि च । २ । ४ । ४७ ॥

इणो गमिः स्यात्सनि न तु बोधने । जिगमिषति । बोधने प्रतीषिषति । इण्वदिकः । अधिजिगमिषति । कर्मणि तङ् । परस्मैपदेष्वित्युक्तेर्नेट् । झलादौ सनीति दीर्घः । जिगांस्यते । अधिजिगांस्यते । अजादेशस्येत्युक्तेर्गच्छतेर्न दीर्घः । जिगंस्यते । सञ्जिगंसते ॥

२६१५-सन् परे रहते इण् धातुके स्थानमें गमि आदेश हो, बोधनार्थमें न हो । जिगमिषति । बोधनार्थमें प्रतीषिषति । " इण्वदिकः " यहां इस वार्त्तिकका स्मरण कराया है-अधिजिगमिषति । कर्म्मवाच्यमें तङ् हुआ, "गमेरिट् परस्मैपदेषु " इस सूत्रमें ' परस्मैपदेषु ' ऐसा कहनेके कारण इट् नहीं हुआ, झलादि सन् प्रत्यय परे रहते दीर्घ हुआ-जिगांस्यते । अधिजिगांस्यते ।

अच्के स्थानमें आदिष्ट ऐसा कहनेसे केवल गम धातुको दीर्घ न होगा-जिगंस्यते । सञ्जिगंसते ॥

२६१६ इङश्च । २ । ४ । ४८ ॥

इङो गमिः स्यात्सनि । अधिजिगांसते ॥

२६१६-सन् परे रहते इङ धातुके स्थानमें गम आदेश हो । अधिजिगांसते ॥

२६१७ रलो व्युपधाद्धलादेः संश्च । १ । २ । २६ ॥

उश्च इश्च वी ते उपधे यस्य तस्माद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः । द्युतिस्वाप्योः सम्प्रसारणम् । दिद्युतिषते-दिद्योतिषते। रुरुचिषते-रुरोचिषते। लिलिखिषति-लिलेखिषति । रलः किम् । दिदेविषति । व्युपधात्किम् । विवर्तिषते । हलादेः किम् । एषिषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते । उपधाकार्यं हि द्वित्वात्प्रबलम् । ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात् ॥

२६१७-उकार और इकारोपध हलादि रलन्त धातुके परे स्थित सेट् क्त्वा, और सन् प्रत्ययकी कित्संज्ञा हो । "द्युतिस्वाप्योः संप्रसारणम् २३४४" इस सूत्रसे सम्प्रसारण हुआ-दिद्युतिषते, दिद्योतिषते । रुरुचिषते, रुरोचिषते । लिलिखिषति, लिलेखिषति । रलन्त न होनेपर दिदेविषति ॥

उवर्ण इवर्ण उपधा न होनेपर विवर्तिषते ॥

हलादि न होनेपर एषिषिषति, इस स्थलमें द्वित्व नित्य होनेपर भी गुणसे बाधित होगा, क्योंकि उपधाका कार्य द्वित्वसे बलवत् है, ओणृ धातुका ऋकार इत्करण सामान्यापेक्ष ज्ञापक है ॥

२६१८ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् । ७ । २ । ४९ ॥

इवन्तेभ्य ऋधादिभ्यश्च सन इड्वा स्यात् । इडभावे हलन्ताच्चेति कित्त्वम् । च्छ्वोरिति वस्य ऊठ् । यण् । द्वित्वम् । दुद्यूषति-दिदेविषति । स्तौतिण्योरेवेति वक्ष्यमाणनियमान्न षः । सुस्यूषति-सिसेविषति ॥

२६१८-सन् परे रहते इवन्त धातु और ऋध धातु भ्रस्ज, दम्भु, श्रि, स्वृ, यू, ऊर्णु, भृ, ज्ञपि और सन् धातुके उत्तर विकल्प करके सनको इट् हो । इट्के अभाव पक्षमें "हलन्ताच्च २६१३" इस सूत्रसे कित्व होगा । "च्छ्वोः० २५६१" इस सूत्रसे ऊठ् हुआ, पश्चात् यण् हुआ, द्वित्व हुआ-दुद्यूषति-दिदेविषति । "स्तौतिण्योरेव० २६२७" इस वक्ष्यमाण सूत्रके नियमसे षत्व नहीं होगा-सुस्यूषति । सिसेविषति ॥

२६१९ आप्ज्ञप्यृधामीत् । ७ । ४ । ५५ ॥

एषामच ईत्स्यात्सादौ सनि ॥

२६१९-सकारादि सन् प्रत्यय परे रहते आप, ज्ञपि और ऋध धातुके अच्के स्थानमें ईत् हो ॥

२६२० अत्र लोपोऽभ्यासस्य । ७ । ४ । ५८ ॥

सनि मीमित्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात् । आप्तुमिच्छति ईप्सति । अर्धितुमिच्छति । रपरत्वम् । चर्त्वम् । ईर्त्सति-अर्दिधिषति । बिभ्रर्जिषति-बिभर्जिषति-बिभ्रक्षति-बिभर्क्षति ॥

२६२०-"सनि मीमा० २६२३" इस सूत्रसे आरम्भ करके जो कार्य्य कहे गये हैं वह होनेपर अभ्यासका लोप हो । आप्तुमिच्छति=ईप्सति । अर्धितुमिच्छति-इस विग्रहमें रपरत्व और चर्त्व होकर ईर्त्सति, अर्दिधिषति । बिभ्रर्जिषति, बिभर्जिषति, बिभ्रक्षति, बिभर्क्षति ॥

२६२१ दम्भ इच्च । ७ । ४ । ५६ ॥

दम्भेरच इत्स्यादीच्च सादौ सनि । अभ्यासलोपः । हलन्ताच्चेत्यत्र हल्ग्रहणं जातिपरमित्युक्तम् । तेन सनः कित्त्वान्नलोपः। धिप्सति-धीप्सति-दिदम्भिषति । शिश्रीषति-शिश्रयिषति । उदोष्ठ्यपूर्वस्य। सुस्वूर्षति-सिस्वरिषति। युयूषति-यियविषति । ऊर्णुनूषति-ऊर्णुनुविषति-ऊर्णुनविषति । न च परत्वाद्गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यम् । द्विर्वचनेऽचीति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपातिदेशादादेशनिषेधाद्वा । न च सन्नन्तस्य द्वित्वं प्रति कार्यित्वान्निमित्तता कथमिति वाच्यम् । कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते न त्वननुभवन्नपि । न चेह सन् द्वित्वमनुभवति । बुभूर्षति । बिभरिषति । ज्ञपिः पुगन्तो मित्संज्ञः पकारान्तश्चौरादिकश्च । इडभावे । इको झलिति कित्त्वान्न गुणः। अज्झनेति दीर्घः परत्वाण्णिलोपेन बाध्यते। आपज्ञपीति ईत् । ज्ञीप्सति । जिज्ञपयिषति । अमितस्तु । जिज्ञापयिषति । जनसनेत्यात्वम् । सिषासति । सिसनिषति ॥ तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः ॥ * ॥

२६२१-सकारादि सन् प्रत्यय परे रहते दम्भ धातुके अच्के स्थानमें इत् हो और सूत्रमें चकारनिर्देश होनेके कारण ईत् भी हो । "हलन्ताच्च २६१३" इस सूत्रमें हल् शब्दका ग्रहण करनेसे जातिपरत्व है, ऐसा कहा है, इससे यह फल हुआ कि, सन्के कित्वके कारण नकारका लोप होगा-धिप्सति, धीप्सति, दिदम्भिषति । शिश्रीषति, शिश्रयिषति । "उदोष्ठ्यपूर्वस्य २४९४" यह सूत्र स्मरणार्थ है । सुस्वूर्षति, सिस्वरिषति । युयूषति, यियविषति ।

ऊर्णुनूषति, ऊर्णुनुविषति, ऊर्णुनविषति । इस स्थलमें परत्वके कारण गुण और अवादेश करनेपर अभ्यासका उकार श्रूयमाण न हो, यह बात कही जा सकती है, किन्तु वह नहीं होगा, क्योंकि "द्विर्वचनेऽचि २२४३" इस सूत्रके अनुसार